अतः दृश्यते आचार्येण पाणिनिना तु अष्टाध्याय्यामादौ अपादानस्य आलोचना कृता। पाणिनिना तु अपादानकारकस्य आलोचनायां ध्रुवमपायेऽपादानमिति सूत्रमेव संज्ञारूपेण प्रस्तूतम्। पाणिनिव्याकरणे षड्विधानि सूत्राणि लक्ष्यन्ते। तेषु संज्ञासूत्रन्तु संज्ञासंज्ञिप्रत्यायकम्। अत्र संज्ञा त्वपादानमिति संज्ञी तु 'ध्रुवमपाये' इति। पाणिनिना अपादानसंज्ञाविधायकानि कानिचन सूत्रान्तराणि प्रणीतानि। तदुत्तरकाले भाष्यशेखरादिषु मूलसंज्ञासूत्रमादाय महती सूक्ष्मातिसूक्ष्मा आलोचना प्रस्तूता। परन्तु महाभाष्यकारेण पतञ्जलिना तदीये महाभाष्ये अपादानकारकविधायकानि सवार्तिकसप्तसूत्राणि प्रत्याख्यातानि। शोधपत्रेऽस्मिन्नपादानकारकस्य विविधा विषया विचारपूर्वकमुपस्थापिताः सन्ति। न हि प्रयोजनमनुद्दिश्य कस्मिन्नपि कार्ये प्रवृत्तिर्भवति। ममापि अस्मै शोधपत्रविरचनायामस्ति प्रयोजनम्। तत्तु व्याकरणचर्चायाः नैरन्तर्यरक्षार्थं तथा स्वात्मनः पाठकानाञ्च सूक्ष्मेक्षिकायाः विवर्धनाय च इति।

अपादानस्य लक्षणम्

अप्पूर्वकमाङ्पूर्वकं दाधातोरुत्तरं भावे ल्युटि अपादानमिति शब्दः निष्पन्नः। दाधातोरर्थस्तु दानम्। आङ्पूर्वकं दाधातोर्थस्तु ग्रहणम्। पुनश्च अप्पूर्वकम् आङ्पूर्वकं दाधातोरर्थस्तु कुतश्चित् ग्रहणम्। सम्प्रदानस्य अर्थस्तु सम्यक् रूपेण प्रदानम्। अपादानं सम्प्रदानस्य विपरीतार्थकबोधकमिति स्पष्टं प्रतीयते। अतः यस्मात् कस्यचन वस्तुनः ग्रहणं भवति, विश्लेषो वा सञ्जायते तदपादानं भवति। सूत्रकारेण पाणिनिना तूक्तम् 'ध्रुवमपायेऽपादानमि'ति। सूत्रमिदं 'कारके' इत्यधिकारे पठितम्। अतः सम्पूर्णं सूत्रशरीरं भवति अपाये यद् ध्रुवं तदपादानकारकसंज्ञं स्यात्। ततश्च दीक्षिताचार्येणोक्तं, "अपायो विश्लेषः, तस्मिन्साध्ये ध्रुवमवधिभूतं कारकमपादानं स्यात्। "[1] इति। सूत्रेऽस्मिन् 'ध्रुवमिति' विशेष्यवाचकपदम्। अतस्तस्यादौ व्युत्पत्तिः निरूप्यते। ध्रुवमिति पदं कुटादिगणत्वात् 'ध्रु'धातोः पचाद्यच् इत्यनेन अचि प्राप्ते ङित्वे उवङ् इत्यनेन ध्रुवमिति पदस्य सिद्धिः। तेन ध्रुवपदस्यार्थः गतिः स्थैर्यं वा। पुनश्च ध्रुधातोरुत्तरम् ' इगुपधज्ञाप्रीकिरः कः' इत्यनेन कप्रत्ययेन निष्पन्नध्रुवस्यार्थः 'स्थिरम्' इति। भट्टोजिना ध्रुवपदस्यार्थः अवधित्वं प्रतिपादितम्। अप्पूर्वकमिण्धातोः अचि निष्पन्नस्यापायशब्दस्यार्थस्तु 'विश्लेषः' इति। ततः द्वयोः संयुक्तयोरेकतरस्य चलनाद्विश्लेषो भवति।

---

1 वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः), कारकप्रकरणम्, पृष्ठाङ्कः ६५३ सम्पा. गिरिधरशर्मा, परमेश्वरानन्दशर्मा च, संस्क. २०१४, प्रका. मोतिलालबनारसीदासः।

विश्लेषेऽस्मिन् यत् तादृशचलनानाश्रयो भवति तदेवावधिभूतं 'ध्रुवमि'ति वा। अर्थात् अपाये विश्लेषे वा साध्ये यत्तादृशस्य विश्लेषस्य आश्रयः न भवति तस्यैव ध्रुवत्वमपादानत्वञ्च। यथा वृक्षात् पर्णं पतति इत्यत्र पत्रस्य वृक्षात् विभागपूर्वकभूमिसंयोगानुकूलव्यापारे वृक्षः गत्यनाविष्टो भवति अर्थात् पत्धातोः व्यापारस्याश्रयः न भवति। तादृशव्यापारत्वं पत्रे वर्तमानात् वृक्षस्यैवात्र ध्रुवत्वम्। अवधिस्तु ध्रुवशब्दस्य हि नामान्तरमात्रम्। शाब्दिकैरपि उच्यते, " अवधीयते यः एकरूपतया ज्ञायते सोऽवधिः", [2] इति। एवं व्युत्पत्त्या तु ज्ञायते अपादाने ध्रुवन्तु स्थिरमेव स्यात्। न हि तस्मिन् गतिः काङ्क्षिता। तेन वृक्षात् पर्णं पतति इत्यत्रैव अपादानं स्यात् नान्यत्र। परन्तु धावतोऽश्वात् पतति इत्यत्र धावतोऽश्वस्य ध्रुवत्वाभावादपादानत्वसिद्धिरेव न भवति। अत्र अपादानत्वसिद्धये हि वैयाकरणैः धात्वर्थव्यापारानाश्रयस्य ध्रुवत्वं स्वीकृतम्। परं वाक्यपदीयकारेण तु चलाचलमुभयात्मकं ध्रुवत्वं स्वीकृतम्। तन्नये ध्रुवं नाम कूटस्थं निष्क्रियमिति द्रव्यस्वभावः। तन्न सूत्रे ग्राह्यम्। सूत्रे तु अपायविषयकं ध्रौव्यं काङ्क्षितम्। [3] भर्तृहरिनये अपाये योऽपैति स चलं भवेद्चलं वा ध्रुवमवधि वा तत् प्रति उदासीनमेव। [4] अत्र अतदावेशादित्यस्य अर्थनिरूपणे नागेशकैयटयोः मतानैक्यं दृश्यते। कैयटेनात्र तु 'अपाये यदनाविष्टं तदपाये ध्रुवमुच्यते' इति व्याख्या कृता[5]। नागेशनये तु अत्र 'अतदावेशादि'त्यस्यार्थः न तु ध्रुवस्य विभागजन्यव्यापारानाश्रयणादिति करणीयमपि तु अध्रौव्यस्याविवक्षणादिति कर्तव्यम्।

महाभाष्यकारेण पतञ्जलिनापि एवमेव मतं स्वीकृतम्। ततः गतियुक्तेष्वपादानसंज्ञा नोपपद्यते अध्रुवत्वादित्याक्षेपमुपस्थाप्य पश्चात् समाधत्ते। तत्रोदाहरणं प्रदत्तं तेन - 'अश्वात्त्रस्तात्पतितः'। 'रथात्प्रवीतात्पतितः'। 'सार्थाद्गच्छतो हीनः' इति। आक्षेपानन्तरं स्वयमेव समाधानं करोति यत् न हि अश्वस्य त्रस्तत्वेऽपि अध्रौव्यं विवक्षितम्, परन्तु ध्रौव्यमेव। वस्तुतः अत्र अश्वे विद्यमानमश्वत्वमाशुगामित्वमश्वस्य त्रस्तत्वेऽपि ध्रुवमेव। पुनश्च धावतः पतितः, त्वरमाणात्पतित इत्यादौ अत्यन्तं गतियुक्तेष्वपि अध्रौव्यं न विवक्षितं ध्रौव्यमेव। यद्युच्यते असत्यपि ध्रुवत्वे कथं तस्य विवक्षा स्यादित्यत्र भाष्यकारेणोक्तं सतोऽप्यविवक्षा भवति। यथा अल्पत्वाल्लोम्नां एडका अलोमिकेत्युच्यते। एवमेव कृशातिशय्यात् अनुदरा कन्येति। एवमेव असतोऽपि विवक्षा भवति। तद्यथा कुण्डिकायां पानीयबाहुल्यात्समुद्रत्वम्, समुद्रस्य वा सुतरत्वात्कुण्डिकात्व-

---

2 व्याकरणदर्शनेर इतिहास, श्रीगुरुपदहालदारः पृष्ठाङ्कः ३०८ संस्क. २०१७ प्रका. संस्कृतवुकडिपो, प्रदेशः . कलिकाता

3 द्रव्यस्वभावो न ध्रौव्यमिति सूत्रे प्रतीयते। अपायविषयं ध्रौव्यं यत्तु तावद् विवक्षितम्।। १३८।। (वाक्यपदीयम्, पदकाण्डम्, द्वितीयभागः)

4 अपाये यदुदासीनं चलं वा यदि वाचलम्। ध्रुवमेवातदावेशात्तदपादानत्वमुच्यते।। (पूर्ववत्)

5 व्याकरणमहाभाष्यम्, प्रदीपटीका १अ.४पा.३आ.२४सू पृष्ठाङ्कः ३५६ सम्पा. नन्दिकिशोरशास्त्री संस्क. आङ्गलाब्दः १९९९ प्रका. प्रतिभाप्रकाशनम्।

CC BY

विवक्षायां समुद्रः कुण्डिका इति व्यवहारः। एवमेव 'धावतोऽश्वात्पतितः' इत्यत्र अश्वस्य असत्यपि ध्रौव्ये ध्रुवत्वमेव विवक्षितम्। नागेशेनापि महाभाष्यकारस्य अनुरूपमतं प्रदर्शितम्। [6]

पूर्वमुक्तं यत् अपायः नाम विश्लेषो विभागो वा। तस्मिन् साध्ये यदवधिभूतं तदपादानसंज्ञं स्यात्। ननु खगः वृक्षं त्यजति इत्यत्रापि वृक्षेण सह खगस्य विभागो भवति। अतोऽत्रापि अपादानं स्यादिति अत्रोच्यते वैयाकरणैः न खलु अत्र अपादानं स्यात् प्रकृतधात्वर्थविभागबोधकत्वात्। त्यज्धातोरर्थस्तु विभागावच्छिन्न-क्रिया। विभागरूपफलभागित्वे वृक्षे सत्त्वात्तस्य कर्मत्वापत्तिः अपि च विभागजनकीभूतव्यापारानाश्रयत्वात् अपादानत्वापत्तिः स्यादित्यवस्थायाम् अपादानमुत्तराणि कारकाणि बाधन्ते इति न्यायेन कर्मत्वप्राप्तिः हि स्यात्। ततश्च मञ्जुषायामपादानस्य लक्षणं सम्यगुक्तम् -

'तत्कर्तृसमवेततत्तत्क्रियाजन्यप्रकृतधात्ववाच्यविभागाश्रयत्वमपादानत्वम्'[7] इति।

यथा रामो ग्रामादायातीत्यत्र रामस्तु कर्ता, तस्मिन् समवायेन वर्तमाना समवेता क्रिया तु उत्तरदेशसंयोगानुकूला पादप्रक्षेपादिगमनक्रिया, तज्जन्यप्रकृतधात्ववाच्यो यो विभागः तदाश्रयत्वं ग्रामस्यास्तीति लक्षणसमन्वयः। एवन्तु तत्त्वबोधिनीकारेणापि समर्थितम्। [8]

ननु वृक्षात् पर्णं पतति, धावतोऽश्वात्पतितः इत्यादौ प्रकृतधात्वर्थव्यापारानाश्रयत्वस्य ध्रुवत्वलक्षणं युज्यते परन्तु 'परस्परान्मेषावपसरतः' अत्रोभयोर्मेषयोः गत्याविष्टत्वात् कस्य अवधित्वं स्यादिति शङ्का जायते। अत्र शाब्दिकानां मध्ये मतद्वैविध्यं दृश्यते। प्रथमतः, सृधातुना उभयोः मेषयोः गतिद्वयस्योपादानादेकनिष्ठां गतिं प्रति अपरस्य अपादानत्वे नास्ति क्षतिः। ततः उभयोर्मध्ये एकस्य कर्तृत्वम् अपरस्य च विभागाश्रयत्वम् अपादानात्वञ्च। [9] न खलु एवं वक्तव्यम्। न हि धातुनैकेन युगपत् क्रियाद्वयस्य प्रतीतिः सम्भवति। आश्रयभेदेन क्रियाभेदसत्त्वेऽपि न स्वतः क्रियायां भेद उत्पद्यते। ततः हि तिङन्तपदम् एकशेषारम्भे न प्रयोजकं भवति क्रियाया एकरूपत्वात्। एवं नागेशाचार्येण भूषणकारादीनां मतं खण्डयित्वा शब्दोपाधिमङ्गीकृत्य समाधानं प्रस्तूतम्। परस्परस्मान्मेषावपसरतः इत्यादौ मेषपदोपात्तस्यैव क्रियाश्रयत्वात् कर्तृत्वं, परस्परपदोपात्तस्य विभागाश्रयत्वात् उपादानत्वम्। वस्तुतः दीक्षितनागेशयोः मध्ये पार्थक्यमेतदेव यत् दीक्षितस्य मतम्

---

6 "प्रधानव्यपाराश्रयत्वरूपस्य त्वदभिमताऽध्रौव्यस्यात्र कदाप्यसत्त्वात्। तस्मान्मदुक्त एव सूत्रार्थ उचितो, भाष्यार्थश्चेति सुधियो विभावयन्तु" इति (महाभाष्यम्, उद्योतटीका)

7 परमलघुमञ्जुषा, कारकार्थनिरूपणम् पृष्ठाङ्कः २५३ सम्पा. जयशङ्करलालत्रिपाठी संस्क. सं २०६२ प्रका. चौखम्बा कृष्णदास अकादमी स्थानम् . वाराणसी

8 "प्रकृतधात्वर्थानाश्रयत्वे सति तज्जन्यविभागाश्रयो ध्रुवम्" इति (वैयाकरणसिद्धान्तकौमुदी, तत्त्वबोधिनी टीका)

9 "परस्परान्मेषावपसरत इत्यत्र तु सृधातुना गतिद्वयस्याप्युपादानादेकनिष्ठां गतिं प्रतीतस्यापादानत्वं न विरुध्यते। " इति (प्रौढमनोरमा, प्रथमभागः, पृष्ठाङ्कः १८५, सम्पा. रमाकान्तपाण्डेयः संस्क. २००७ ई., प्रका. चौखम्बाविद्याभवनम् स्थानम् . वाराणसी)

अर्थानुसारि नागेशस्य तु प्रयोगानुसारि। अर्थात् अत्र परस्परशब्दस्य मेषशब्दस्य च मेष एवार्थः। अतोऽत्र मेषशब्दस्य 'सृ'धातोः विभागरूपव्यापारस्य आश्रयत्वात् कर्तृसंज्ञा भवति, 'परस्पर'पदस्य च तादृशव्यापारस्य अनाश्रयत्वात् अपादानत्वम्। परन्तु परस्परमेषपदयोरुभयोरेव मेषवाच्यत्वे हि कथं तयोः संज्ञाभेदः इत्याशङ्कायान्तूच्यते न दोषः। 'शब्दभेदादर्थभेदः ' इति न्यायेन यथा आत्मा आत्मानं पश्यतीत्यत्र शब्दभेदादेकस्य कर्मसंज्ञा अपरस्य च कर्तृसंज्ञा सिद्ध्यति तद्वत् अत्रापि सिध्येत्। [10] सममेव वाक्यपदीयेऽपि श्रुयते। [11]

ध्रुवमपायेऽपादानमित्यत्र ध्रुवमिति पदग्रहणाभावे विभागजनकव्यापाराश्रयस्य कर्तुरपि अपादानत्वापत्तिः स्यात्। 'अपाये' इति पदग्रहणाभावे पुनः 'वृक्षस्य पर्णं पतति' इत्यत्र विभागजनकपतनक्रियायां ध्रुवस्य वृक्षस्य अपादानसंज्ञा भवत्येव। परन्तु 'अपाये' इति ग्रहणेन कारणत्वेन विवक्षिते विभागजनकव्यापारे कारकतया विवक्षितस्य ध्रुवस्य हि अपादानसंज्ञा भविष्यति। अत्र 'वृक्षस्य' इत्यत्र विश्लेषक्रियायां सम्बन्धत्वेन अर्थादेतत् वृक्षसम्बन्धिपत्रमिति बोधान्नापादानत्वम्।

अपादानस्य कारकत्वविचारः

अपादानस्य कारकत्वविचारात् प्राक् कारकस्य सामान्यस्वरूपं ज्ञातव्यम्। करोतीति कारकमिति विग्रहे 'कृ'धातोः ल्युटि निष्पन्नोऽयं शब्दः। अतः कारकं नाम यत् क्रियां निवर्तयति साधयति। क्रियायाः साधने यत् स्वतन्त्रतया परतन्त्रतया चोपकारकं भवति स कारकम्। यथा देवदत्तः पचतीत्यत्र देवदत्तेन स्वतन्त्रतया पाकक्रियायाः व्यापारसमूहाः साध्यन्ते। अतः स कर्ता। एवं कर्मणः फलाश्रयत्वेन, करणस्य प्रकृष्टोपकारकत्वेन, अधिकरणस्य क्रियायाः आधारत्वेन प्रकृतधात्वर्थव्यापारस्य उपकारकत्वात् कारकत्वं सिद्ध्यति एव। अपादाने तु यो प्रकृतधात्वर्थव्यापारानाश्रयो भवति तस्य हि अपादानसंज्ञा सिद्ध्यति। व्यापारं नाम क्रिया। [12] अतः व्यापारानाश्रयत्वं नाम क्रियायामनाश्रयत्वमेव। तथात्वे अपादानस्य कारकत्वं कथं सम्भवेत् ? अपादानकारके ध्रुवस्य अपादानत्वं सूत्रकारेण प्रतिपादितम्। तस्य ध्रुवस्य पुनः औदासीन्यं भर्तृहरिणा ज्ञापितम्। ध्रुवस्यौदासीन्यन्तु अपायक्रियां प्रति एव। तथात्वे कथमस्य कारकत्वं सिद्ध्यति ? ज्ञेयमत्र यत् यद्यपि अपादानं साक्षान्न क्रियायाः उपकारकं भवति परन्तु अपायस्य आधाररूपेण स्पन्दनादिक्रियां प्रति तस्य निमित्तत्वमस्ति एव। अतः प्रकृतधात्वर्थव्यापारानाश्रयत्वेऽपि अपायस्य अवधित्वेन आधारत्वेन चास्य कारकत्वं सिद्ध्यति। [13]

---

10 लघुशब्देन्दुशेखरः, कारकप्रकरणम् पृष्ठाङ्कः ४९९, सम्पा. गोपालशास्त्री नेने संस्क. २०१५ ई. प्रका. चौखम्बाप्रकाशनम् स्थानम् . वाराणसी)

11 मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्। मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्।। १४१ इति (वाक्यपदीय, पदकाण्डः द्वितीयभागः)

12 "व्यापारस्तु भावनाऽभिधा साध्यत्वेनाभिधीयमाना क्रिया" इति (वाक्यपदीय)

13 ध्रुवं न कारकं मन्ये नोपकारी भवेद् यतः। अपायाधारभूतोऽसौ क्रियते न स कथ्यते।। इति

CC BY

अपादानकारकस्य विभागः

भर्त्तृहरिकैयटादीनां नये अपादानस्य त्रयो भेदाः सः लक्ष्यन्ते। ते च -

"निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा।

अपेक्षितक्रियञ्चेति त्रिधापादानमुच्यते।। " १३६।। इति। (वाक्यपदीयम्, पदकाण्डम्, द्वितीयभागः)

अपादानस्य भेदास्तु निर्दिष्टविषयम्, उपात्तविषयं, अपेक्षितविषयञ्चेति। यत्र धातुनाऽपायलक्षणो विषयः निर्दिष्टस्तन्निर्दिष्टविषयम्। अर्थात् यत्र साक्षादुल्लिखितेन धातुना अपायलक्षणस्य विषयोऽधिगम्यते तत्र निर्दिष्टविषयम् अपादानं भवति। तद्यथा, 'पर्वतादवरोहति' इत्यत्र पर्वतस्य अपायत्वमधिगन्तुं नास्ति क्रियान्तरस्य प्रयोजनम्।

यत्र तु धातुर्धात्वन्तरार्थाङ्गं स्वार्थमाह तदुपात्तविषयम्। अर्थात् यत्र अपाये क्रियायां क्रियान्तरस्य अर्थः गौणतया मुख्यभावेन वा अन्तर्भवति तत्र उपात्तविषयमपादानम्। यथा, बलाहकाद् विद्योतते। अत्र हि निःसरणाङ्गे विद्योतने विद्योतनाङ्गे निःसरणे वा द्युतिर्वर्तते बलाहकान्निःसृत्य ज्योतिर्विद्योतने, बलाहकाद्वा विद्योतमानं निःसरतीत्यर्थः।

यत्र क्रियावाचिपदं न श्रुयते, केवलं क्रिया प्रतीयते तदपेक्षितक्रियम्। अपादानेऽस्मिन् अश्रुतक्रिया अध्याह्रियते। यथा, ' कुतो भवान् ? पाटलिपुत्रात्। ' अत्र 'आगच्छति' इति अश्रुतक्रियायाः अध्याहारेण हि अर्थसङ्गतिः भवति। उपात्तविषयापेक्षितक्रिययोः पार्थक्यं तु उपात्तविषये क्रियान्तरार्थस्य अन्तर्भूतत्वात् श्रूयमाणधातुना हि अपायो बोध्यते, अपेक्षितक्रियायान्तु अनुक्तक्रियाया आकाङ्क्षायां वाक्यं प्रयुज्यते।

अपायभेदेनापि अपादानं द्विविधम्। तत्तु बोध्यः दृष्टश्च। माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः इत्यत्र पाटलिपुत्रस्य अपादानत्वम् अपायो वा बुद्धिपरिकल्पितः। ग्रामादायाति देवदत्तः इत्यत्र ग्रामस्य अपायः साक्षात् दृश्यते। अतोऽत्र दृष्टोऽपायः।

विभागस्य कर्मत्वापत्तिखण्डनम्

शाब्दिकानां नये धात्वर्थः द्विविधः फलं व्यापारश्च। अत्र फलशब्देन न लौकिकफलस्य ग्रहणं पारिभाषिकफलस्यैव। तत्र फलस्य लक्षणमाह "तद्धात्वर्थजन्यत्वे सति तद्धातुजन्योपस्थितिविषयत्वम्। " इति। अपि च "कर्तृप्रत्ययसमभिव्याहारे तद्धातुजन्यशाब्दबोधीय- धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वे सति तद्धातुवाच्यत्वं फलत्वम्" [14] इति। उभयलक्षणे हि फलस्य धात्वर्थत्वं तथा धात्वर्थव्यापारजन्यत्वं प्रदर्शितम्। 'कर्तृप्रत्ययसमभिव्याहारे' इत्यस्यार्थः कर्तृवाच्ये एव। यथा देवदत्तः तण्डुलं पचति इत्यत्र 'ति'

---

14 वैयाकरणभूषणसारे धात्वर्थनिर्णयः पृष्ठाङ्कः ११ सम्पा. चन्द्रिकाप्रसादद्विवेदी, संस्क. २०१६, प्रका. चौखम्बासंस्कृतप्रतिष्ठानम्, स्थानम् . दिल्ली

इत्याख्यातस्यार्थः शाब्दिकनये कर्ता। अस्य तु देवदत्तेन सह अभेदान्वयः। अतोऽत्र कर्तृप्रत्ययसमभिव्याहारोऽस्ति। पाक्धात्वर्थजन्यं फलन्तु तण्डुलस्य विक्लित्तिः, अतस्तस्मिन् कर्मत्वम्। एवमेव वृक्षात् पर्णं पतति इत्यत्रापि कर्तृप्रत्ययसमभिव्याहृतत्वात् पत्धात्वर्थव्यापारजन्यस्य कर्मत्वं स्यात्। वृक्षात् पर्णस्य पतने पत्धात्वर्थव्यापारे यथा अधोदेशसंयोगो भवति तद्वत् वृक्षात् पर्णस्य विभागोऽपि जायते। एवमेव 'ग्रामादायाति देवदत्तः' इत्यत्रापि प्रकृतधात्वर्थस्तु यद्यपि उत्तरदेशसंयोगः तथापि धात्वर्थव्यापारेण ग्रामात् देवदत्तस्य विभागोऽपि सञ्जायते। तर्हि विभागाश्रयस्य कथं सम्भवेदपादानत्वम्? प्रकृतधात्वर्थव्यापार-जन्यत्वादस्य कर्मत्वापत्तिरेव भवेत्।

वस्तुतोऽत्र विभागस्य प्रकृतधात्वर्थफलत्वापत्तिरेव वृथा। न हि अत्र विभागः प्रकृतधात्वर्थफलं स तु गमनेन यत्नेन वा अनिवार्यत्वादुत्पद्यते। यतः गमनेन उत्तरदेशसंयोगस्तु पूर्वदेशसंयोगनाशमन्तरेण न सम्भवति। परन्तु विभागः फलत्वावच्छेदकसम्बन्धेन उत्पद्यमानेऽपि न हि स इष्टविषयः। न हि कर्तुः ग्रामाद् गमनकाले विश्लेषः काङ्क्षितः परमुत्तरदेशसंयोग एव इष्टः। इष्टफलमेव प्रकृतधात्वर्थफलाश्रयो भवति। यद्युच्यतेऽत्र नियामकः कस्तर्हि मूलसूत्रमेव प्रमाणम्। तत्तु 'कर्तुरीप्सिततमं कर्म' इति। कर्तुरीप्सितन्तु उत्तरदेशसंयोगरूपफलमतस्तस्य हि कर्मत्वम्। प्रकृतधातुस्तु तदर्थबोधक एव। वस्तुतः विभागमन्तरेण संयोगः न सम्भवति। ततः वृक्षाद्भूमिं पतति इत्यत्र भूमिनिष्ठसंयोगः पर्णनिष्ठविश्लेषोऽभयानुकूलव्यापारः पतत्यर्थः। अत्र विश्लेषस्य धातुना लभ्यमानेऽपि अपादानसंज्ञायां ध्रुवग्रहणान्न विभागाश्रयस्य कर्मत्वमपि त्वपादानत्वमेव। अपि चात्र विभागस्य फलतावच्छेदकसम्बन्धेन आश्रयत्वाभावादपि न कर्मत्वापत्तिः।

ननु यदि देवदत्तस्य ग्रामाद्विभाग एव काङ्क्षितो भवेत्तर्हि तद्बोधकस्य धातोरेव प्रयोगः कर्तव्यः। तदा तु ग्रामं त्यजति इत्यादिप्रयोगः स्यात्। अत्र तु व्यापारव्याधिकरणविभागस्यैव धात्वर्थत्वेन कर्मत्वं भवत्येव। अन्यथा विभागस्य गमनादिक्रियायां कर्मत्वापत्तौ तु गम्-पत्-त्यज्धातूनां पर्यायतापत्तिः स्यात्। अतः अपादाने न हि विभागस्य प्रकृतधात्वर्थफलाश्रयत्वं स्वीकृतम्।

ननु 'सार्थाद्धीयते' इत्यत्र देवदत्तस्य व्यापाराश्रयत्वात् कर्तृत्वापत्तौ सार्थस्य कर्मत्वापत्तिः स्यात्। तर्हि किमर्थमत्रापादानमित्यत्रोच्यते यद्यप्यत्र स्वार्थस्य देवदत्तनिष्ठव्यापारजन्यफलाश्रयत्वेन कर्मत्वे प्राप्तेऽपि 'अपादाने चाहीयरुहो'रिति। सूत्रेणापादानत्वस्य विहितत्वान्न दोषः। तच्च कर्मप्रत्ययान्तहीधातुविषयकमेव, 'हीये'ति निर्देशात्। [15]

---

15 बृहच्छब्देन्दुशेखरः, द्वितीयभागः, पञ्चमीकारकप्रकरणम्, पृष्ठाङ्कः ९०३, सम्पा. श्रीसीतारामशास्त्री, संस्क. २०५५ वैक्रमाब्दे, प्रका. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, स्थानम् . वाराणसी।

अपादानकारके शाब्दबोधः

शाब्दबोध: नाम अन्वयबोधः। वाक्ये यानि पदानि सन्ति पदेषु चावयवाः तेषां सर्वेषां अन्वयबोधः हि शाब्दबोधः। वाक्यार्थज्ञाने पदज्ञानं पदार्थज्ञानञ्च कारणं शाब्दबोधस्तु फलमिति नैयायिकानां मतम्। [16] अतः वाक्यार्थज्ञानाय वाक्यस्थपदविभक्त्यादीनां ज्ञानमावश्यकम्। पदन्तु द्विविधं सुबन्तं तिङन्तं च। यास्काचार्यनये तु चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। [17] तत्र नामपदमेव सुबन्तपदं आख्याताश्च तिङन्तपदानि। तत्र नामाख्यातयोर्मध्ये आख्यातार्थस्यैव प्राधान्यम्। [18] अतः वाक्ये तिङन्तपदानां क्रियापदानां हि प्राधान्यम्। तदपेक्षायां हि पदानामन्वयः करणीयः। भूषणसारेऽपि कौण्डभट्टेन एवमेव सम्मतम्। [19]तन्नये धात्वर्थः द्विविधः फलं व्यापारश्च। तत्र व्यापारः हि प्रधानः। व्यापारं तु साध्यत्वेनाभिधीयमाना क्रिया। तिङ् अर्थात् आख्यातस्तु आश्रयः फलव्यापारयोः। फलाश्रयस्तु कर्म। व्यापाराश्रयस्तु कर्ता। तत्र व्यापारस्य प्राधान्यात् तिङः अर्थः कर्ता। कर्तरि व्यापारस्य अभेदान्वयः इति शाब्दिकानां मतम्। ततः वृक्षात् पर्णं पतति इत्यत्र 'पतती'ति क्रियायां फलम् अधोदेशसंयोगः, तदनुकूलव्यापाराश्रयस्तु पर्णम्। वृक्षादित्यत्र पञ्चम्यर्थस्तु अवधिः। अतः अत्र शाब्दबोधस्तु वृक्षावधिकं पर्णकर्तृकं पतनमिति शाब्दबोधः। पर्वतात्पततोऽश्वात् पतति अश्ववाह इत्यत्र पर्वतावधिकपतनाश्रयाभिन्नाश्वावधिकमश्ववाहकर्तृकं पतनमिति शाब्दबोधः। एवमेव परस्परस्मान्मेषावपसरतः इत्यत्र परस्परमेषावधिकं द्वित्वावच्छिन्नमेषकर्तृकमपसरणमिति शाब्दबोधः। [20]

नैयायिकानां नयेऽपि फलव्यापारौ धात्वर्थः। परन्तु तेषां नये आख्यातार्थस्तु कृतिः। अर्थात् देवदत्तः ग्रामादायाति इत्यत्र आयातीत्यस्य तेरर्थः कृतिः। कृतिरपि कर्तरि एव आश्रीयते। नैयायिकानां नये संख्याभिधानयोग्यस्तु कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यश्च। [21] अर्थात् ग्रामादायाति देवदत्तः इत्यत्र 'ति' इति एकत्वसंख्याभिधानं देवदत्तः इति प्रथमान्तपदेन भवति। अपादानत्वञ्च स्वनिष्ठभेदप्रतियोगितावच्छेदकी-

---

16 पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।। ८१।। (भाषापरिच्छेदः, शब्दखण्डम्, सम्पा. चौधुरीरायकूलसम्भूता ड. अनामिकामहोदया। प्रका. संस्कृतपुस्तकभाण्डारः। मुद्रणसमयः १४१९ वङ्गीयसंवत्सरस्य श्रीपञ्चमीतिथ्याम्।)

17 तद् यान्येतानि चत्वारि पदजातानि नामाख्याते। चोपसर्गनिपाताश्च तानीमानि भवन्ति।। १.१.८ (निरुक्तम्, सम्पा. वन्द्योपाध्यायोपाह्वः उदयचन्द्रः, प्रका. संस्कृतवुकडिपो, मुद्रणकालः. १४२१वङ्गीयाब्दस्य वैशाखमासि।)

18 तद्यत्रोभे भावप्रधाने भवतः।। १.१ ११।। (पूर्ववत्)

19 फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः। फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।। २।। (वैयाकरणभूषणसारः, धात्वर्थनिर्णयः, सम्पा. चन्द्रिकाप्रसादद्विवेदिः, प्रका. चौखम्बासंस्कृतप्रतिष्ठानम्, मुद्रणसमयः . २०१६तमे आङ्गलाब्दे)

20 परमलघुमञ्जुषा, कारकार्थनिरूपणम्, पत्रांक २६२, सम्पा. जयशङ्करलालत्रिपाठी, प्रका. चौखम्बाकृष्णदासंस्थानम्।

21 भाषापरिच्छेदः, शब्दखण्डम् ; पृष्ठाङ्कः २३९, सम्पा. अनामिकारायचौधुरी, संस्क. २०१३ ई., प्रका. संस्कृतपुस्तकभाण्डारः, स्थानम् . कलिकाता

भूतक्रियाजन्यविभागाश्रयत्वमिति। अत्र स्वं नाम ग्रामः। भेदपदेनात्र विभागजनकीभूता या आगमनक्रिया तादृशक्रियावान्नित्याकारको बोध्यः। स च भेदः ग्रामे एव सम्भवति न तु कर्तरि देवदत्ते। तस्मिन् विभागजनकीभूतागमनक्रियासत्त्वात् तथा च ग्रामनिष्ठः य उक्तभेदस्तत्प्रतियोगी देवदत्तस्तत्र देवदत्तेन प्रतियोगितापि वर्तते पतनक्रियापि वर्तते इति उक्तभेदप्रतियोगितावच्छेदकत्वं क्रियायां प्राप्तं भेदप्रतियोगितावच्छेदकीभूतक्रियाजन्यविभागो वृक्षे वर्तते इति वृक्षस्य स्वनिष्ठभेदप्रतियोगितावच्छेदकीभूत-क्रियाजन्यविभागाश्रयत्वं प्राप्तं तदेवापादानत्वम्। [22]

अतः ग्रामाद्देवदत्त आयातीत्यत्र शाब्दबोधस्तु -

ग्रामनिष्ठविभागानुकूलगमनव्यापारानुकूलकृतिमान् देवदत्तः।

एवं वृक्षात् पर्णं पतति इत्यत्र तु,

वृक्षनिष्ठविभागानुकूलपतनव्यापारानुकूलकृतिमत् पर्णमिति शाब्दबोधः।

अपादानकारकविधायकानि सूत्रान्तराणि तथा भाष्यकारैस्तेषां प्रत्याख्यानञ्च

आचार्येण पाणिनिना ध्रुवमपायेऽपादानमिति सूत्रं विहाय अपादानकारकविधायकानि अन्यानि सूत्राण्यपि विहितानि। न केवलं सूत्रम् आचार्येण वररुचिना अपादानकारकविधायकमेकं वार्तिकमपि प्रणीतम्। यद्यपि सूत्रवार्तिकाभ्यामेतेषां सूत्राणां प्रयोजनमुपलब्धं सूत्रकारेण वार्तिककारेण च परन्तु महाभाष्यकारेण तु सूत्राणामेषां निष्प्रयोजनत्वं स्वीकृत्य प्रत्याख्यातम्। आचार्येण पतञ्जलिना द्विविधोऽपायः स्वीकृतः दृष्टः बुद्धिपरिकल्पितश्च। तन्नये उभयविधोऽपायः ध्रुवमपायेऽपादानमिति सूत्रेणैव सिद्ध्यति, नास्ति सूत्रान्तराणां प्रयोजनम्। अधुना एतेषां सूत्राणां तथा तेषां प्रत्याख्यानकारणञ्च विशदेनालोच्यते।

जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्

जुगुप्सा निन्दा, विरामो विरतिः, प्रमादोऽनवधानता एतदर्थकानां धातूनां कारकमपादानसंज्ञं स्यादित्यर्थः। यथा पापात् जुगुप्सते। ध्रुवमपायेऽपादानमिति सूत्रे पूर्वं पठितं यत् संश्लेषपूर्वको विश्लेषः एवापायः। परन्तु पापं न दृश्यमानं वस्तु। अतः पापस्य विभागावधित्वेन ध्रुवत्वमेव न दृश्यते। अतः अत्र अपादानं न स्यात्। यद्यपि अत्र दृष्टोऽपायः नास्ति परन्तु बुद्धिकल्पितोऽपायोऽस्त्येव। अतस्तेनापादानत्वम्।

बुद्धिकल्पितोऽपायस्तु गौणः। अतः गौणग्रहणासम्भवे पापस्य क्रियाजनकतया प्रयोगाविवक्षायां सम्बन्धिजनकतया विवक्षायां 'पापस्य जुगुप्सते' एवं कारकशेषत्वात् षष्ठी स्यादिति न। कारकं नाम साधकम्। एवं साधकत्वं कारकाधिकारे सर्वेषां कारकाणां साधकत्वमस्त्येव। पुनः साधकतमं करणमिति यस्मिन् सूत्रे

22 व्युत्पत्तिवादः, पञ्चमीकारकम् ; सम्पा. राधावल्लभत्रिपाठी, प्रका. राष्ट्रियसंस्कृतसंस्थानम्, संस्क. २०११

CC BY

साधकग्रहणेन प्रकर्षे लब्धे तमप्ग्रहणन्तु अप्रसिद्धार्थकत्वेन गौणस्यापि ग्रहणं ज्ञापयति। अतोऽत्रापि बुद्धिकल्पितोऽपायः अस्त्येव। यतः अत्र अपायस्य प्रत्यक्षदर्शनं न सम्भवति ततः पृथक् वार्तिकारम्भः।

भाष्यकारनये तु अत्र ध्रुवमपायेऽपादानम् इत्यनेनैव अपादानत्वं स्यात्। व्यर्थमयं वार्तिकारम्भः। तन्नये अधर्माज्जुगुप्सते इत्यत्र यः एषः मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति दुःखोऽधर्मः नानेन कृत्यमस्तीति। एवं बुद्ध्या अधर्मदुःखादिना सह संश्लेषपूर्वकं सः तस्मान्निवर्तते। अतः मूलसूत्रेणैवास्य सिद्धिः भविष्यतीति नास्ति सूत्रस्यास्य प्रयोजनम्। पुनश्च 'धर्माद्विरमति', 'धर्मान्निवर्तते', 'धर्मात्प्रमाद्यति', 'धर्मान्मुह्यति' इह यः एषः मनुष्यः संभिन्नबुद्धिर्भवति सः पश्यति नेदं करिष्यतीति स बुद्ध्या संप्राप्य निवर्तते। [23]

भीत्रार्थानां भयहेतुः

भयम् आकुलीभावः, त्राणम् अनर्थप्रतिघातः। भयं तथा त्राणमिति पदोत्तरं भावे क्विप्प्रत्यये कृते भीत्रयोः पदयोः निष्पत्तिः। ततः भीत्रयोरर्थः तेषां भीत्रार्थानाम्। अर्थशब्दः द्वन्द्वान्ते श्रूयमाणत्वात् प्रत्येकं योगः। तेन भयार्थः त्राणार्थ इति स्यात्। सूत्रस्यार्थः भयार्थाणां त्राणार्थाणां धातूनां प्रयोगे यो भयहेतुः भयस्य कारणं वा अर्थात् यस्मात् विभेति त्रायते वा सः अपादानसंज्ञं स्यात्। सूत्रार्थः भयार्थाणां त्राणार्थाणां धातूनां प्रयोगे यो भयहेतुः भयस्य कारणं वा तदपादानसंज्ञं स्यात्। यथा 'चोरात् त्रायते', 'व्याघ्रात् बिभेति'। व्याघ्राद्बिभेति इत्यत्र भीधातोः भयहेतुतास्ति। परन्तु 'चोरात्त्रायते' इत्यत्र त्राधातोः भयहेतुता कथम् ? 'चोरेभ्यस्त्रायते' इत्यत्र अनर्थपरिहाराय निवर्तयतीति। चोरजनितवधबन्धनादिः अनर्थः तस्य हेतुः चोरः। अतोऽस्य भयहेतुतास्ति। भीत्रधात्वोः प्रयोगे एव अपादानं स्यान्न खल्वन्यत्र। तेन 'व्याघ्रं पश्यति' इत्यत्रापादानत्वं न स्यात्।

अत्र अपायः न दृष्टः, बुद्धिकल्पित एव। ततः पृथक् सूत्रोपदेशः। परन्तु भाष्यकारनयेऽत्र ध्रुवमपायेऽपादानमित्यनेन अपादानत्वमस्त्येव। तन्नये वृकेभ्यो विभ्यतीत्यत्र यः एषः मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति यदि वृकाः मां पश्यति ध्रुवो मे मृत्युरिति। सः बुद्ध्या संप्राप्य निवर्तते। ततो प्रकृतसूत्रेणैवापादानत्वं स्यात्।

पराजेरसोढः

अत्र असोढ इत्यत्र सहधातोः क्तप्रत्यये धत्वढत्वष्टुत्वढलोपेषु कृतेषु 'सहिवहोरोदवर्णस्य' इत्योत्त्वे सोढ इति रूपम्। तत्र क्तार्थो न भूतकालो विवक्षितः। पराजेः धातोः प्रयोगे योऽसह्योऽर्थः सः अपादानं भवति। यथा 'अध्ययनात् पराजयते' इति। अत्र अध्ययनात् ग्लायतीत्यर्थः। 'पराजयते' इत्यत्र 'विपराभ्यां जे' इत्यनेन तङ्। 'शत्रून् पराजयति ' इत्यत्र सकर्मकत्वे तिरस्करोति शत्रोः असह्यत्वाभावान्नापादानता। अत्र तु परत्वात् स्वत एव

23 व्याकरणमहाभाष्यम्, पृष्ठाङ्कः ३५६ ग्रन्थस्य विवरणं पूर्वमुक्तम्।

कर्मत्वसिद्धे असोढग्रहणं व्यर्थमिति चेन्न। कर्मत्वाविवक्षायां शेषषष्ठीं बाधित्वा पञ्चमी स्यात्। अतः कर्तव्यमेव असोढग्रहणम्। भाष्यकारेण सूत्रमिदमपि प्रत्याख्यातम्। तन्नये 'अध्ययनात् पराजयते' इत्यत्र प्रेक्षापूर्वकारी मनुष्यः चिन्तयति यत् दुःखमध्ययनं दुर्धरश्च, गुरवश्च दुरुपचारा इति सः बुद्ध्या संप्राप्य निवर्तते।

वारणार्थानामीप्सितः

प्रवृत्तिविघातो वारणम्। प्रवृत्तिः नाम कस्मिंश्चित् विषये कर्तुं स्वतः वृत्तिः नाम तेन विषयेन सह कर्तुः संयोगसाधनाय तीव्रेच्छा हि प्रवृत्तिः। प्रवृत्तिविघातो नाम तस्मात् वस्तुनः तं विमुखीकरणम्। अर्थात् कर्ता यथा तस्य काङ्क्षिते वस्तूनि संयोगसाधयितुं न शक्नुयात् तदनुकूलव्यापारविशेष एव वारणम्। एवं वारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यात्। तद्यथा 'यवेभ्यो गां वारयति' इत्यत्र द्वौ कर्तारौ स्तः। एकस्तु यवभक्षणे उद्यतः गोकर्ता। अपरस्तु गां यवेभ्यो वारयतीति वारणकर्ता। अत्र यस्य ईप्सितेभ्यः वारयति तस्य ईप्सिते हि अपादानसंज्ञा स्यात्। अत्र वारणकर्तुरीप्सितं गां तस्येप्सितेभ्यः माषेभ्यः वारयति। अतोऽत्र यवे एवापादानसंज्ञा स्यात्।

पुनश्च यवानां स्वकीयतया संरक्षणीयत्वेन ईप्सितत्वादपादानत्वम्, न तु गोः तस्य परकीयत्वेन ईप्सितत्वात्। गोस्तु अनीप्सितत्वात् 'तथायुक्तं चानीप्सितम्' इत्यनेन कर्मत्वं स्यात्। पुनश्च यदा गावस्तु स्वकीयाः, यवा एव परकीयाः तत्र गवि कर्मत्वात् वारणं न सम्भवतीति न, यद्यपि गौः स्वकीयः तथापि माषाणां संरक्षणीयत्वेन हीप्सितत्वम्। माषाणां भक्षणे विनाशे सति माषकर्ता गामपहृत्य बध्नीयात्, गोस्वामिनं च दण्डयेत् अतः यवानां रक्षितुमिष्टत्वात् अपादानत्वं गोस्तु स्वकीयत्वेनेप्सितत्वाद् कर्मत्वम्। सूत्रेऽस्मिन् ईप्सिते सत्त्वेऽपि कथं गवि कर्मत्वं स्यादपादानत्वं कथं नेत्यत्रोच्यते यवानां परकीयत्वादीप्सितत्वमेव केवलं किन्तु गोस्तु स्वकीयत्वात् ईप्सिततमत्वाच्च कर्तुरीप्सिततमं कर्म इत्यनेन कर्मत्वमेव स्यात्। [24]

भाष्यकारनये अस्यापि सूत्रस्य बुद्ध्या अपायगम्यत्वात् नास्ति पृथगुल्लेखेन प्रयोजनम्। पश्यत्ययं यदीमा गावस्तत्र गच्छन्ति ध्रुवं तावत् सस्यविनाशः। सस्यविनाशे अधर्मं राजभयश्च। एवं सः बुद्ध्या संप्राप्य निवर्तते। अतः मूलसूत्रेणैवास्य सिद्धिः भविष्यतीति महाभाष्यकारस्य राद्धान्तः।

अन्तर्द्धौ येनाऽदर्शनमिछति

'अन्तर्द्धिः' नाम व्यवधानम्। 'येनादर्शनमि'त्यत्र न दर्शनम्, दृश्धातोः ल्युटि सिद्धम्। ल्युटः कृत्प्रत्यत्वात् तस्य कर्तरि 'कर्तृकर्मणोः कृतिः ' इति सूत्रेण षष्ठी भवितव्या। तेन यस्य अदर्शनमित्येव साधुरिति न, अत्र तु

---

24 "गवादिनिष्ठव्यापाराभावस्यैव मुख्यतयोद्देश्यत्वेन तदाश्रयत्वेनेच्छाविषयत्वात्तासां कर्मत्वमिति भावः"। (पातञ्जलमहाभाष्य, उद्योतटीका)

CC BY

आत्मनः येनादर्शनमिति आत्मरूपकर्मणः गम्यमानत्वात् 'उभयप्राप्तौ कर्मणि' इत्यनेन कर्मणि हि षष्ठी स्यात्, कर्तरि तु तृतीया। नागेशाचार्येण तूक्तम् 'छन्दोवत्सूत्राणि भवन्ति' इति न्यायेन षष्ठी न स्यात्।

तु .दीक्षिताचार्येणोक्तं वृत्तौ - 'व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यात्' इति।[25] अत्र आत्मशब्देन इच्छतिकर्ता विवक्षितः। अर्थात् यः स्वस्य कस्माच्चित् दर्शनस्य अभावमिच्छति। एवं व्यवधाने सति यत् कर्तृकेण दर्शनस्य अभावमिच्छति तस्मिन्नपादानत्वं स्यात्। यथा, मातुः निलीयते कृष्णः इत्यत्र आत्मनः माताकर्तृकस्य दर्शनस्याभावमिच्छति अतः मातरि अपादानत्वम्।

अन्तर्द्धाविति पदोपदेशेन बोध्यते यत्, व्यवधाने सति हि अपादानत्वं स्यात्। पुनः चोरान्न दिदृक्षते इत्यत्र चोरकर्मकदर्शनाभावेच्छानुकूलव्यापारोऽर्थः, तथापि अत्र प्रकारान्तरेण चोरकर्तृकेण आत्मकर्मकदर्शनाभावेच्छायां चोरस्य अपादानत्वं स्यात्। परन्तु अत्र व्यवधानाभावान्नापादानसंज्ञा। सूत्रेऽस्मिन् 'येने'ति पदाभावे तु यस्य दर्शनाभावेच्छा भवति तस्यापि अपादानत्वं स्यात्। तेन उपाध्यायादन्तर्धत्ते शिष्यः इत्यत्र शिष्यस्यापि अपादानत्वसिद्धिः भवति। 'इच्छती'ति पदग्रहणेन पुनः दर्शनभावाभावेऽपि यत्कर्तृकदर्शनाभावेच्छा तस्मादेवापादानत्वं सिद्धम्।

भाष्यकारनये इदमपि मूलसूत्रेणैव सिद्धत्वात् व्यर्थमेव। 'उपाध्यायादन्तर्धत्ते' इत्यत्र कश्चन अलसः शिष्यः पश्यति यदि तमुपाध्यायः पश्यति तर्हि ध्रुवं तस्य प्रेषणमुपालम्भो वा। अतः गुरोः भयात् स यथा उपाध्यायस्य दृष्टिगोचरं न स्यात्तस्मादन्तर्धत्ते। एवं सः बुद्ध्या संप्राप्य निवर्तते। अतः मूलसूत्रेणैव सिद्धेः पुनः नास्ति सूत्रस्यास्य प्रयोजनम्।[26]

आख्यातोपयोगे

अत्र आख्याता नाम वक्ता। उपयोगस्य अर्थस्तु नियमपूर्वकविद्यास्वीकारः। नियमन्तु भूमिशयनभिक्षावृत्त्यादिः। अर्थात् नियमपूर्वकविद्यास्वीकारे वक्ता अपादानसंज्ञो भवति। यथा, उपाध्यायादधीते। भाष्यकारनये नास्ति अस्यापि सूत्रस्य पृथक् प्रयोजनम्। गुरोः मुखाद् अपक्रान्तं वचनं शिष्यस्य हृदि ज्ञानरूपेण प्रविशति। अतः मूलसूत्रेणैव सिद्धमिदम्।[27]

जनिकर्त्तुः प्रकृतिरिति

'जनिर्जननमुत्पत्तिः' इति निर्देशात् 'जनिः' इत्यस्यार्थ उत्पत्तिः। प्रकृतिस्तु कारणम्। अत्र अत्रापादाननिमित्तयोरुभयोर्कारणयोरेव ग्रहणम्। ततश्च आचार्येण द्विविधमेवोदाहरणं प्रस्तूतम्। ब्रह्मणः प्रजाः

---

25 वैयाकरणसिद्धान्तकौमुदी (प्रथमभागः) कारकप्रकरणम्, पृष्ठाङ्कः ६६१ महामहोपाध्यायेन गिरिधरशर्मणा परमेश्वरशर्मणा सम्पादिता।

26 व्याकरणमहाभाष्यम्, पृष्ठाङ्कः ३६४, पूर्ववत्।

27 व्याकरणमहाभाष्यम्, पृष्ठाङ्कः ३६४, पूर्ववत्।

प्रजायन्ते। अत्र ब्रह्मा यथा प्रजानामुपादानकारणं तथैव निमित्तमपि। पुनश्च पुत्राद् प्रमोदो जायते इत्यत्र नास्ति उपादानं निमित्तं च। तथापि अपादानस्वीकारात् गम्यते यत् इह कारकाधिकारे कारणत्वरूपेण कारकसाधारणस्य ग्रहणं भवति। परन्तु यो हि यस्माज्जायते सः तस्मान्निर्गच्छतीति युक्त्या महाभाष्यकारेणास्यापि सूत्रस्य प्रत्याख्यानं कृतम्।

भुवः प्रभवः

भवनं भूः। संपदादित्वात् क्विप्। भुवः कर्ता भूकर्ता, तस्येत्यर्थः। भूकर्तुः प्रभवस्तथा। प्रभवति प्रथमं प्रकाशतेऽस्मिन्निति प्रभवः, प्रथमप्रकाशस्थानमित्यर्थः। न खलु अत्र प्रभवतीत्यस्य उत्पद्यते इत्यर्थः स्वीकार्यः तथात्वे तु हिमवतो गङ्गा प्रभवति इति प्रयोगः न स्यात्। न हि गङ्गा हिमवतः उत्पद्यते प्रथमं प्रकाशते। ततश्च तत्त्वबोधिनीकारेण प्रभवः इत्यस्य अर्थस्तु सिद्धस्य प्रथममुपालम्भ इति। [28] पूर्वसूत्रवदनुरूपयुक्त्या भाष्यकारेण अस्यापि सूत्रस्य प्रत्याख्यानं कृतम्।

भाष्यकारसिद्धान्तस्य शाब्दिकानां समर्थनं विरोधश्च

भाष्यकारस्य सिद्धान्त अर्थात् प्रत्याख्यानस्य सिद्धान्तः। भाष्यकारेण ध्रुवमपायेऽपादानमिति सूत्रं व्यतिरिच्य अपादानकारकविधायकानां सूत्रान्तराणां गौणत्वम् अङ्गीकृत्य तेषां समेषां प्रत्याख्यानं कृतम्। भाष्यकारस्य मतस्यास्य भाविकाले शाब्दिकेषु कैश्चन समर्थितं कैश्चन पुनः प्रत्याख्यातम्। भाष्यकारस्य मतं समर्थ्य आचार्येण पद्मनाभेन तदीये सुपद्मव्याकरणे अपादानस्य संज्ञायाम् "अवधिरपायादिष्वपादानम्" इत्येतावदेवोक्तम्। न हि ग्रन्थेऽस्मिन् अपादानकारकस्य अन्येषां सूत्राणामुल्लेखः दृश्यते। एवमेव कलापव्याकरणेऽपि अपादानस्य संज्ञायां निगदितं यत्, "यतोऽपैति भयमादत्ते वा तदपादानम्" इति। अत्रापि पाणिनेः सप्तसूत्री न दृश्यते जुगुप्सेति वार्तिकञ्च। एवं सुपद्मकलापजैनेन्द्रादिव्याकरणे तु महामुनेः पतञ्जलेः समर्थनं दृश्यते।

परन्तु पाणिनिसम्प्रदाये न केनापि शाब्दिकेन पाणिनिकृतसूत्राणां प्रत्याख्यानं समर्थितम्। तैः सर्वैः हि स्वकीये ग्रन्थे एतेषां सूत्राणाम् आलोचना कृता। अपि च वोपदेवाचार्यः, भोजदेवः, क्रमदीश्वरः, श्रीजीवगोस्वामिप्रमुखवैयाकरणा अपि पाणिनिकात्यायनयोः सूत्रवार्तिकयोः समर्थनं कृतम्। तत्र भट्टोजीदीक्षितेन तु तस्य 'शब्दकौस्तुभः' इति ग्रन्थे अपादानकारकस्य आलोचनायां भाष्यकारस्य सूत्रप्रत्याख्यानस्य निष्प्रयोजनत्वं व्यक्तम्। अपि च तत्र सूत्राणामेषां प्रयोजनमपि तेन निगदितम्। तन्नये कारकप्रकरणे गौणस्यापि ग्रहणं भवति। "साधकतमं करणम्" इति सूत्रे तमप्ग्रहणमेव तत्र प्रमाणम्।

28 वैयाकरणसिद्धान्तकौमुदी, (प्रथमभागः) कारकप्रकरणम् पृष्ठाङ्कः ६६३

CC BY

सूत्रेऽस्मिन् तमप्ग्रहणबलात् अधिकरणकारके गौणाधारस्यापि आधारोऽधिकरणमिति सूत्रेण आधारत्वं सिद्ध्यति। अन्यथा 'तिलेषु तैलमि'त्यत्र हि आधारत्वप्राप्तिः स्यान्न तु गङ्गायां घोषः नेत्यत्र। एवमिहापि गौणस्यापायस्यापि ग्रहणं कर्तव्यम्। अपायादिपदानां स्वरितत्वाद्वा 'स्वरितेनाधिकारः' इत्यनेन गौणोऽप्यर्थो गृह्यते इति व्यवस्थापनात्। भाष्यकारेण चोराद्बिभेतीत्यत्र भयान्निवर्तते, पराजयते इत्यत्र ग्लान्या निवर्तते, वारयतीति प्रवृत्तिं प्रतिबध्नन्निवर्तयतीति अधीते उपाध्यायान्निःसरन्तं शब्दं गृह्णातीत्यर्थः। एवं निवृत्तिनिःसरणादिधात्वन्तरार्थविशिष्टे स्वार्थे वृत्तिमाश्रित्य मूलसूत्रेण एतेषां सिद्धिः प्रदर्शिता। परन्तु धातूनां मुख्यार्थबाधात् शेषषष्ठीविवक्षया अत्र सर्वत्र षष्ठीप्रयोगः दुर्वारः। पुनश्च उपाध्यायनटयोः क्रियानुकूलव्यापारांशे नास्ति कोऽपि विशेषः। उभावेव शिष्यान् श्रोतॄन् वा गाथां श्रावयति। विशेषस्तु विद्यास्वीकारप्रक्रियायाम्। तत्र नियमपूर्वकविद्यास्वीकारे एवापादानम्। एवं विशेषविधानायास्ति पृथक् सूत्रस्य प्रयोजनम्। पुनश्च अनभिधानब्रह्मास्त्रमाश्रित्य प्रत्याख्यानं तु नातीवमनोरमम्। यथा 'उपाध्यायादधीते शिष्यः' इत्यत्र मूलधात्वर्थं परित्यज्य वृत्तेराश्रयणे धातूनामभिधानाभावात् अनभिहितत्वात् शिष्यः इति कर्तृपदे तृतीयापत्तिः स्यात्। महाभाष्ये सूत्राणामेषां प्रत्याख्यानं दृष्ट्वा कातन्त्रादिव्याकरणे एतेषां सूत्राणां पृथगुल्लेखोऽपि न कृतः। परन्तु तन्न संगच्छते। यतः पाणिनिसूत्राणां वेदाङ्गत्वात् सौत्रत्वादस्य पारायणे श्रवणे च धर्मलाभो भवति। दृष्टप्रयोजनन्तु शास्त्रस्य प्रयोगे वर्तते अदृष्टन्तु पुण्यलाभे। अतः प्रत्याख्यातसूत्राणां दृष्टप्रयोजनाभावेऽपि अदृष्टप्रयोजनन्तु वर्तते एव। स्वयं पतञ्जलिना 'वृद्धिरादैच्' इति सूत्रभाष्ये निगदितम्,

"प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थक्येन भवितुम्, किं पुनरियता सूत्रेण" इति।

उपसंहारः

महर्षिणा पाणिनिना अष्टाध्याय्यां यानि सूत्राणि विरचितानि तानि सर्वाणि हि प्रमादरहितानि। तत्र प्रत्येकं सूत्राणां सूत्रघटकवर्णानाञ्च अर्थवत्ता अस्ति। अपि च तदीये ग्रन्थे याः कृत्रिमसंज्ञाः गृहीताः ताः सर्वा एव ग्रन्थकारस्य सूक्ष्मदृष्टिमेव ज्ञापयन्ति। ततो हि ध्रुवमपायेऽपादानमित्यस्मिन् सूत्रे ध्रुवग्रहणं न व्यर्थम्। न वा ध्रुवस्य स्थैर्यार्थत्वात् चलाचलमुभयात्मकं पृथक्तया स्वीकर्तव्यम्। अत्र ध्रुवस्य अपायं प्रति औदासीन्यमेव विहितम् आचार्यैः। यतोऽपैति तदपादानमित्येव स्वीकारे योऽपैति तस्यापि अपादानत्वसिद्धिः भवत्येव विभागस्य द्विष्ठत्वात्। ततः वृक्षात् पर्णं पततीत्यत्र पर्णस्यापि अपादानत्वापत्तिः भवति। पुनश्च ध्रुवत्वग्रहणे तु परत्वात्तत्तत्संज्ञाप्राप्तावपि शेषत्वविवक्षायां माषाणामश्नीयादित्यादाविव षष्ठ्या इष्टतया तत्रापादानसंज्ञाया वारणीयत्वादित्यवधेयम्।

दीक्षितादिग्रन्थे कर्तृकारकस्य कारकप्रकरणे प्राथम्येन आलोचना दृश्यते। तत्तु संगच्छते एव। यतः तस्मिन् कर्तरि एव धात्वर्थव्यापाराणामाश्रयः भवति अपि च स एव केवलं कारकेषु स्वतन्त्रः। तेन प्रवर्तिते एव अन्यानि कारकाणि स्वस्वक्रियासाधने प्रवर्तन्ते। अतः कर्तृकारकस्य हि प्राधान्यं सङ्गतम्। परन्तु पाणिनिना कथमपादानं प्राथम्येन आलोचितम् इत्यत्रोच्यते भाष्यकारेणैव, 'अपादानमुत्तराणि कारकाणि बाधन्ते' इति। ततो हि 'कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे' इत्यत्र 'बिभ्यति' इति भीधातोः प्रयोगेऽपि अपादानसंज्ञायां प्राप्तायामपि परत्वात् अधिकरणमेव सिध्यति। पुनश्च धनुषा विध्यति, धनुषः विध्यति इत्यत्रापि परत्वात् करणसंज्ञा एव स्यात्।

भाष्यकारेण येषां सूत्राणां वार्तिकानाञ्च निष्प्रयोजनत्वं विहितं प्रत्याख्यातञ्च तत्तु न स्वीकार्यम्। अस्ति एतेषां सूत्राणां प्रयोजनम्। पाणिनिना एकैकेन सूत्रेण अपादानकारकस्य प्रयोगस्थानं स्पष्टतया सुविहितम्। पाणिनिः न केवलम् आचार्यः आसीत् सः तु आचार्याणामपि आचार्यः प्राचार्यः एव। सर्वेषां सौविध्यार्थम् आचार्येण शिष्याणां सुखबोधाय च तेन एषां सूत्राणां विधानं कृतम्। अपि च ग्रन्थस्य साधुत्वरक्षार्थमपि तेन विहितानि सूत्राण्येतानि। अन्यथा साक्षात् सूत्रेण अभिधानाभावात् इष्टानापत्तिः सम्भवेत्। स्वयं पतञ्जलिना हि प्रत्याख्यानादनन्तरं कथितम्, "सामर्थ्ययोगान्न हि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्(६/१/७७/२) इति। वस्तुतः अपादानकारकविषये एवंतया बहुविषयं विचार्यमस्ति। तेषु मया शोधपत्रेऽस्मिन् यथासाध्यम् आलोचितमिति शम्॥

****

परिशिष्टम्

- शास्त्री, सी.(सम्पा).(१९९८).बृहच्छब्देन्दुशेखरः(द्वितीयोभागः). सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।
- नेने, गो.(सम्पा). (२०१५). लघुशब्देन्दुशेखरः. चौखम्बाप्रकाशनम्।
- द्विवेदी, च. (सम्पा).(२०१६). वैयाकरणभूषणसारः. चौखम्बासंस्कृतप्रतिष्ठानम्।
- मिश्रः, सु. (सम्पा).(२०१५). वाक्यपदीयम्. वनारसमर्केन्टाईलकम्पानी।
- रायचौधुरी, अ. (सम्पा).(२०१३). भाषापरिच्छेदः. संस्कृतपुस्तकभण्डारः।
- मुखोपाध्यायः, सः. (सम्पा).(२००६). वैयाकरणसिद्धान्तकौमुदी (कारकप्रकरणम्). साहित्यनिकेतनम्।

- शर्मा, गि., शर्मा, प.(सम्पा).(१९६२). वैयाकरणसिद्धान्तकौमुदी (प्रथमोभागः). मोतीलालबनारसीदासः।
- पाण्डेयः, र.(सम्पा).(२००७). प्रौढमनोरमा. चौखम्बाविद्याभवनम्।
- त्रिपाठी, ज. (सम्पा). (२०६२वि.सं.) परमलघुमञ्जुषा. चौखम्बा-कृष्णदास-एकादेमी।
- दाहालः, लो. (सम्पा). (२०१८). परमलघुमञ्जुषा. चौखम्बा-सुरभारती-प्रकाशनम्।
- वन्द्योपाध्यायः, उ. (सम्पा). (१४२१वङ्गाब्दः) . निरुक्तः. संस्कृतवुकडिपो।
- हालदारः, गु.(२०१७).व्याकरण-दर्शनेर-इतिहासः. संस्कृतवुकडिपो।
- वर्णी, वि. (सम्पा).(१९६३). व्याकरणमहाभाष्यम्(द्वितीयभागः). हरयाणा-साहित्य-संस्थानम्।
- त्रिपाठी, रा., त्रिपाठी, ह. (सम्पा). (२०११). व्युत्पत्तिवादः. राष्ट्रियसंस्कृतसंस्थानम्।

****

Author's Detail

Name	:	**SUSHMITA SAHA**
Designation	:	शोधकर्त्री, संस्कृतविभागः, पश्चिमवङ्गराष्ट्रियविश्वविद्यालयः
Address	:	8/239, KALIDHAM, ARABINDA SARANI, BLOCK – C, DUM DUM CANTONMANT DUM DUM, NORTH 24 PARGANAS, WEST BENGAL -700028
Email Id	:	srija.susmita94@gmail.com

प्राची प्रज्ञा (ISSN 2348-8417) The peer reviewed Referred E-Journal in Sanskrit, Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

आकाङ्क्षाविमर्शः

- मोनिरा खातुन

शोधसारः (Abstract)

शाब्दबोधाय असाधारणकारणवत् साधारणकारणमप्यपेक्षितमस्ति। साधारणकारणान्तर्गतकारणम् इदमाकाङ्क्षा स्यात्। तर्कसंग्रहे उक्तमन्नंभट्टेन आकाङ्क्षेयं वाक्यार्थज्ञानहेतुरिति। पदमेकं पदान्तराभावात् यद्यन्वयानुभावकत्वं न भवेत्तर्हि बोधनीयं पदद्वयेऽस्त्याकाङ्क्षा। भाषापरिच्छेदस्य मुक्तावल्यामुक्तं – यत् पदेन विना यत् पदस्य अन्वयाननुभावकत्वं तेन पदेन सह तस्याकाङ्क्षा इति। यथा घटमानयेति वाक्यात् घटपदम् अम्पदमृते अम्पदमपि घटपदमृते घटवृत्तिकर्मतानुकूल-आनयनानुकूलकृतिमान् त्वमिति शाब्दबोधो नोत्पद्यते। अतः स्वीकरणीया पदद्वयेऽस्त्याकाङ्क्षा। वस्तुतः आनुपूर्विवर्णसन्निवेश एवाकाङ्क्षा इति नैयायिकानां मतम्। वेदान्तिनां मते तु जिज्ञासाविषयत्वयोग्यता एव आकाङ्क्षा। वैयाकरणैस्तु वाक्यसमयग्राहिकरूपा आकाङ्क्षा स्वीकृता। अलंकारशास्त्रे तु प्रतीतिपर्यवसानविरहरूपेण आकाङ्क्षा अङ्गीकृता। आकाङ्क्षा पदे वर्तते इति मन्यन्ते नैयायिका आलंकारिकाश्च। तदस्वीकृत्य वैयाकरणाः वेदान्तिनश्च कथयन्ति यत् पदार्थवृत्तिर्खल्वाकाङ्क्षा इति। आकाङ्क्षायाः प्रयोजनमवलम्ब्य मतभेदोऽस्ति। मीमांसकाः वैयाकरणाश्च मन्यन्ते वाक्यार्थज्ञानं प्रति आकाङ्क्षा कारणं भवेदिति। किन्तु न्यायनये तत्र आकाङ्क्षाज्ञानमेव कारणम्। यतः पदार्थेन सह पदार्थान्तरस्य सम्बन्धः आकाङ्क्षाभास्यः। सम्बन्धोऽयन्तु अभिधादिवृत्तिभास्य इत्यूचुः प्राभाकराः। कुमारिलभट्टनये च तात्पर्यवृत्तिभास्यः। नैयायिकाः कौमारिलाश्च स्वमतं सेधितुम् अभिहितान्वयवादमवलम्बन्ते। प्राभाकरास्तु अन्विताभिधानवादमाश्रयन्ते। सर्वमेतदवलम्ब्य अस्यां शोधपत्रिकायामालोचयिष्यामि।

विशेषा शब्दाः(Key Words) : आकाङ्क्षा, व्युत्पत्तिवादः, परमलघुमञ्जूषा, अभिहितान्वयवादः, तात्पर्यवृत्तिः।

****

आकाङ्क्षास्वरूपः

मेयसिद्धिः मानाधीनमिति न्यायाद्विवक्षामि शब्दप्रमाणाधीनमेवास्ति शाब्दबोधः। प्रमाया असाधारण-कारणं करणमित्युच्यते दार्शनिकैः। शाब्दबोधाय असाधारणकारणवत् साधारणकारणमप्यपेक्षितमस्ति। आम्-पूर्वककाङ्क्षिधातोरुत्तरम् अच्-प्रत्ययं प्रयुज्यादावाकाङ्क्षो भवेत्। ततः स्त्रीयां टाप्-प्रत्ययं प्रयुज्य आकाङ्क्षापदम् उपजायेत[1]। आकाङ्क्षापदेन इच्छां बोधयन्ति लौकिकाः। काङ्क्षि काङ्क्षायामित्युक्तं पाणिनीयधातुपाठे। अमरकोशेऽप्युक्तम् – इच्छा काङ्क्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः इति।

---

[1] नन्दिग्राहिपचादिभ्यो ल्युणिन्यचः - ३/१/१३४; अजाद्यतष्टाप् – ४/१/४ (अष्टाध्यायी)।

CC BY

न्यायनये आकाङ्क्षास्वरूपः

दर्शनशास्त्रे त्वन्यार्थे गृह्यते आकाङ्क्षापदस्यार्थः वाक्यार्थज्ञानहेतुत्वात्। कारणमृते कार्यं नोत्पद्यते। यद्याकाङ्क्षापदेनेच्छैव गृह्येत तर्हि अनिश्चितवाक्याच्छाब्दबोधापत्तिर्जायते। यतोऽनिश्चितवाक्यं प्रति कस्यापि कापीच्छा न स्यात्। तत्र त्विच्छाभावेऽपि शाब्दबोधः प्रजायते[2]। वस्तुतः पदस्य पदान्तरव्यतिरेक-प्रयुक्तान्वयाननुभावकत्वमाकाङ्क्षा इति आन्नंभट्टीयं लक्षणं संदृश्यते तर्कसंग्रहे। अर्थात् पदमेकं पदान्तराभावात् अन्वयानुभावकजनकं चेन्न स्यात्तर्ह्येवधेयं पदद्वयेऽस्त्याकाङ्क्षा। पदस्येति इत्यनेन पदनिष्ठम् अन्वयाननु-भावकत्वम्, पदेन इत्यनेन अन्वयबोधानुपाधायकत्वञ्च बोधनीयम्। निरुक्तटीकायामुक्तं – यत्पदस्य यत्पदव्यति-रेकप्रयुक्तं यत्पदाभावप्रयोज्यम् अन्वयाननुभावकत्वं शाब्दबोधाजनकत्वं तत्पदस्य तत्पदेन सहाकाङ्क्षा इति। यथा घटमानयेति वाक्यात् घटनिष्ठकर्मतानुकूल-आनयनानुकूल-कृतिमान् त्वमिति शाब्दबोधो जायते। वाक्येऽस्मिन् घटपदम् अम्पदमृते अम्पदमपि घटपदमृते घटवृत्तिकर्मतेति शाब्दबोधो बोधयितुं न शक्नोति। अतोऽस्त्याकाङ्क्षा पदद्वयेऽस्मिन्।

इदं न सङ्गतम्। घटपदेऽम्पदे चाकाङ्क्षायां सत्यामपि अम्घट इति वाक्याच्छाब्दबोधो नोत्पद्यते। अतः अव्यवहितपूर्ववृत्तित्वसम्बन्धेन अव्यवहितोत्तरत्वसम्बन्धेन वा अन्वयाननुभावकत्वमाकाङ्क्षा इति वाच्यम्। घटमानयेत्यादौ घटपदम् अम्पदस्य अव्यवहितपूर्वे विद्यमानात् अम्पदं घटपदस्य अव्यवहितोत्तरे विद्यमानाच्च सा समस्या दूरीभूयेत्[3]। वस्तुतः आकाङ्क्षेयं पदसमभिव्याहारविशेषा। समभिव्याहारपदेन आनुपूर्विवर्णसन्निवेश अवधेयः। पूर्वपूर्ववर्णविशिष्टचरमवर्णत्वमेवानुपूर्वी उच्यते। भाषापरिच्छेदे विश्वनाथेनोक्तं – यत्पदेन विना यस्याऽननुभावकता भवेत् साकाङ्क्षा इति। अर्थात् यत् पदमपहाय यत् पदम् अन्वयस्य अनुभावजनकं न भवेत् तर्हि बोद्धव्यं तेन पदेन सह तस्य पदस्य आकाङ्क्षा अस्ति इति। अत्र अन्वयपदेन सम्बन्ध अनुभावकपदेन च ज्ञानमेव सूचितम्।

वेदान्तनये आकाङ्क्षास्वरूपः

आकाङ्क्षाविषये वेदान्तिनां मतं किञ्चित् भिन्नमेव। ते कथयन्ति यत् पदार्थानां परस्परजिज्ञासा-विषयत्व-योग्यत्वम् आकाङ्क्षा[4] इति। अर्थात् एकपदार्थज्ञानजा अपरपदार्थविषयका या जिज्ञासा जायेत तज्जिज्ञासायाः

---

[2] ननु आकाङ्क्षा इच्छा, तथा च इच्छायाः शाब्दबोधहेतुत्वमापतितम्। तच्च न युज्यते, अनिश्चितोऽपि वाक्याच्छाब्दबोधोत्पत्त्या इच्छायाः शाब्दबोधकारणत्वासम्भवात् (तर्क.निरु. सम्पा. श्रीसत्कारिशर्मणा वङ्गीयेन, प्र.चौखम्भा संस्कृत संस्थान, वाराणसी, पु.मु. २०७२ वि.स.पृ.६६)।

[3] अव्यवहितोत्तरत्वादिसम्बन्धेन यत्पदप्रकारकज्ञानव्यतिरेकप्रयुक्तो हि यादृशशाब्दबोधाभावस्तादृशशाब्दबोधे तत्पदे तत्पदत्वमाकाङ्क्षा (तर्क. न्या.बो. तत्रैव पृ. ६६)।

[4] वेदान्तपरिभाषा, सम्पा.श्रीमत्पञ्चाननभट्टाचार्य तर्कसांख्यवेदान्ततीर्थ, प्र. संस्कृत पुस्तक भाण्डार, कलिकाता, मु. १३७७ वङ्गाब्दे, पृ. १७१।

यद्विषयत्वं स्यात् तस्य विषयत्वस्य योग्यतैव आकाङ्क्षा भवति। यथा ददाति इति क्रियापदं श्रुत्वा को ददाति, किं ददाति, केन ददाति, कस्मै ददाति, कस्मात् ददाति, कुत्र ददाति इत्यादिरूपेण कर्तृ-कर्म-करण-सम्प्रदान-अपादान-अधिकरणानां पदार्थानां विषये जिज्ञासा जायते। अतो वाक्यार्थान्तर्गताः कर्तृकर्मक्रियादिपदार्थाः परस्परजिज्ञासाविषयत्वात् जिज्ञासाविषयत्वयोग्यतारूपाकाङ्क्षाविशिष्टा इति वाच्यम्। जिज्ञासारहितपुरुषाणां वाक्यार्थेऽतिव्याप्तिनिवारणाय लक्षणे योग्यत्वं पदमुपात्तम्। यथा यस्य पुरुषस्य वाक्यं श्रुत्वा अर्थबोधो जातः कर्तृक्रियादौ जिज्ञासा त्वजाता तत्रावधेयं जिज्ञासाविषयत्वेऽसत्यपि शाब्दबोधः प्रजायते। अतो योग्यत्वपदमपहाय यदि जिज्ञासाविषयत्वमेव लक्षयेत्तर्हि कारणाभावात् कार्याभाव इति न्यायात् जिज्ञासारहितवाक्यादपि शाब्दबोधो भवितुं नार्हति। किन्त्वत्र जिज्ञासाविषयत्वयोग्यत्वात् भवेच्छाब्दबोधः। अतो लक्षणे योग्यतापदमावश्यकमस्ति[5]।

व्याकरणनये आकाङ्क्षास्वरूपः

परमलघुमञ्जूषायां महान् वैयाकरणः नागेशभट्टो वाक्यसमयग्राहिकारूपेण आकाङ्क्षां स्वीकृतवान्[6]। यदा कश्चित् पुरुषः कस्यचित् पदस्य अर्थबोधानन्तरं तेन पदार्थेन सह सम्बद्धपदार्थं ज्ञातुं यामिच्छां प्रकाशयेत् सा इच्छैव आकाङ्क्षानाम्ना परिचीयते। यथा घटमानय इति वाक्यान्तर्गतं घटपदस्य श्रवणानन्तरमानयपदं श्रोतुं या इच्छा प्रजायते सैवाकाङ्क्षा स्यात्। किन्त्वत्र शङ्क्यते यत् घटो कर्मत्वम् आनयनं कृतिरिति वाक्ये घटपदं श्रुत्वा येच्छा जायते सा कर्मत्वपदेन सम्पादयेत्। किन्तु घटो कर्मत्वम् आनयनं कृतिरिति वाक्यात् कोऽपि शाब्दबोधो न भवति। विचिन्त्येदं नागेशभट्टेन आकाङ्क्षायाः द्वितीयलक्षणं कृतम् – उत्थापकताविषयतान्यतरसम्बन्धेन उभयसम्बन्धेन वाऽर्थान्तरजिज्ञासा आकाङ्क्षा इति[7]। अर्थात् सा अर्थान्तरजिज्ञासा उत्थापकतासम्बन्धे विषयतासम्बन्धे एतदुभयसम्बन्धे वा गृह्यते। यथा पश्य मृगो धावति इति वाक्ये पश्यपदार्थो धावनार्थस्य उत्थापकोऽस्ति। यतः पश्यपदश्रवणानन्तरम् उत्थापिताकाङ्क्षा धावतिपदेन शम्यते। अत उत्थापकतासम्बन्धेन आकाङ्क्षा पश्यपदार्थेऽस्ति। एवं धावतिपदेन सूचिता धावनक्रिया दर्शनक्रियया उत्थापितजिज्ञासायाः विषया स्यात्। अतो धावनक्रियायां विषयतासम्बन्धेन आकाङ्क्षा अस्ति। घटः कर्मत्वम् आनयनं कृतिरिति वाक्ये तु उत्थापकतासम्बन्धेन विषयतासम्बन्धेन चाकाङ्क्षाभावात् वाक्यार्थबोधाभावो दृश्यते। प्रधानतः क्रियापदैः सह

---

[5] अजिज्ञासोरपि वाक्यर्थबोधाद् योग्यत्वमुपात्तम् (तत्रैव पृ. १७२)।

[6] शाब्दबोधसहकारिकारणानि आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्याणि। वाक्यसमयग्राहिकाऽऽकाङ्क्षा। (परमलघूमञ्जूषा, सम्पा.डा.जयशङ्कर लाल त्रिपाठी, प्र. चौखाम्बा कृष्णदास अकादमी, वाराणसी, मु. २०६१ पृ.८३)।

[7] तत्रैव पृ. ८६

CC BY

कारकाणां, कारकैः साकञ्च क्रियापदानामस्त्याकाङ्क्षा। घटमिति कारकपदेन या आकाङ्क्षा सम्पादनीया सा खल्वसम्पादनीया कर्मत्वपदेन। अतः कृतं द्वितीयलक्षणं नागेशभट्टेन।

अलंकारनये आकाङ्क्षास्वरूपः

साहित्यदर्पणे आकाङ्क्षालक्षणकाले विश्वनाथकविराजेनोक्तम् – आकाङ्क्षा प्रतीतिपर्यवसानविरहः इति[8]। प्रतीतिपदेन पदजन्यपदार्थोपस्थितिः पर्यवसानपदेन अन्वयबोधजनकाभिलाषरहितो विरहपदेन च अभावो बोधनीयः। अतः पदजन्यपदार्थोपस्थितेरन्वयबोधजनकत्वेन अभिलाषरहिताभाव आकाङ्क्षोच्यते।

ननु भावरूपाकाङ्क्षा कथमभावरूपा भवेदित्याशङ्कायां वक्तव्यं लक्षणे पर्यवसानविरहाभ्याम् अभावद्वयमेव सूचितम्। अभावस्याभावो वस्तुतः प्रतियोगिस्वरूपः न त्वतिरिक्तः। तत्र श्रोतुः जिज्ञासैव प्रतियोगी। अतः सा जिज्ञासा आकाङ्क्षा भवेत्[9]। यथा पयसा सिञ्चतीति वाक्ये पयसापदश्रवणानन्तरं श्रोतुः तदन्वयिपदान्तरस्य पुनः या शुश्रूषा उत्पद्यते सा आकाङ्क्षानाम्ना परिचीयते। सा आकाङ्क्षा सिञ्चतिपदं श्रुत्वा शाम्यति। प्रतीतिपर्यवसानं क्वचित् स्वाभाविकरूपेण क्वचिच्च जनितान्वयबोधत्वेन पर्यवसितं स्यात्।

आद्यं यथा गौरश्व पुरुषः हस्तीति। अत्र गवादिपदैरुपस्थितपदार्थः स्वाभाविकरूपेणैव अन्वयबोधजनकाभिलाषरहितोऽस्ति। द्वितीयञ्च विमलं जलं नद्याः कच्छे महिश्चरति। अत्र नद्यापदेनोपस्थितपदार्थो जलपदार्थेन सह अन्वितो भूत्वा आकाङ्क्षारहितो भवेत्। पुनः कच्छेन सह नद्या अन्वयाभिलाषो नास्ति। यद्यन्वयं चिकीर्षेत्तर्हि तात्पर्यवशादेव नद्याः कच्छे महिषश्चरति इत्येवं करणीयम्। अत्र प्रतीतिपर्यवसानं जनितान्वयबोधरूपेण अस्ति।

आकाङ्क्षाया आश्रयः

आकाङ्क्षा खलु पदवृत्तिरिति मन्यन्ते नैयायिकाः आलंकारिकाश्च। किन्तु तदस्वीकृत्य वैयाकरणाः वेदान्तिनश्च ऊचुः आकाङ्क्षा पदार्थवृत्तिरिति। किन्त्विच्छारूपा आकाङ्क्षा आत्मधर्मत्वादपि कथम् अचेतनपदेऽचेतनपदार्थे वा वर्तेत इति पृष्टे वक्तव्यं सा खलु उपचारादेवारोप्यते। समवायसम्बन्धेन आत्मवृत्तिरिच्छारूपाकाङ्क्षा विषयतासम्बन्धेन स्वविषये आरोप्यते। यथा एको पदार्थो सम्बन्धभेदेन विविधाधिकरणे वर्तेत तद्वदत्राप्यवधेयम्। घटो यथा संयोगसम्बन्धेन भूतले, समवायसम्बन्धेन कपाले कालिकसम्बन्धेन च महाकाले वर्तितुं शक्नोति, इच्छारूपाकाङ्क्षापि तथा विषयितासम्बन्धेन स्वविषये वर्तितुं

---

[8] साहित्यदर्पणः, सम्पा. आचार्य कृष्णमोहन शास्त्री, प्र. चौखम्भा संस्कृत संस्थान, वाराणसी, पु.मु. २०७२ वि.स. पृ.२७

[9] स च प्रतीतिपर्यवसानविरहश्च श्रोतुः तत्तत्पदश्रवणकर्तुः जिज्ञासारूपः अन्वयिपदान्तरबोधेच्छास्वभावः (तत्रैव लक्ष्मी टीका)।

शक्नोति[10]। एतद्विषये आलंकारिकानां मतं किञ्चत् भिन्नमस्ति। यद्यपि ते मन्यन्ते उपचारवशादेव आकाङ्क्षा पदार्थे आरोप्यते तथापि तत्र स्वजन्यजनकत्वरूपपरम्परासम्बन्धेनैव स्यात्। इच्छारूपा आकाङ्क्षा आत्मनि समवायसम्बन्धेन पदार्थे च स्वजन्यजनकत्वरूपपरम्परासम्बन्धेन स्वाश्रयोपस्थापकत्वसम्बन्धेन वा वर्तते।

नैयायिकाः मन्यन्ते यत् साकाङ्क्षं पदमिति प्रयोगात् आकाङ्क्षा पदे एव वर्तते इति। यत्किञ्चित् पदश्रवणानन्तरं या इच्छा प्रजायते ता खलु निराश्यते पदान्तरश्रवणेन। एतेनानुमीयते पदवृत्तिर्भवेदाकाङ्क्षा इति। साहित्यदर्पणेऽपि पदानां धर्मत्वरूपेणैव अङ्गीकृता आकाङ्क्षा - अत्राकाङ्क्षायोग्यतयोरात्मार्थधर्मत्वेऽपि पदोच्चयधर्मत्वमुपचारात्[11]। वैयाकरणाः तन्न स्वीकुर्वन्ति। उचूस्ते साकाङ्क्षं पदमिति प्रयोग उपचारादेव प्रयुज्यते। यतो यत्किञ्चित् पदश्रवणानन्तरम् अर्थबोधे सत्यपि अन्वयबोधस्यापूर्णात् वाक्यार्थपूर्णार्थम् अर्थान्तरमेवापेक्षते। यथा राज्ञः पुरुषः इति वाक्ये राजा पुरुषमपेक्षते ममायमिति। पुरुषोऽपि राजानमपेक्षते अहमस्येति। अतो साकाङ्क्षं पदमिति वाक्यस्य स्पष्टार्थः साकाङ्क्षः पदार्थः। महाभाष्ये पतञ्जलिमुनिः समर्थः पदविधि इति सूत्रस्य व्याख्याकाले उवाच पदं विशेषणं पदार्थस्तु विशेष्यः। विशेष्यस्य प्राधान्यात् आकाङ्क्षा पदार्थे एव वर्तनीया।

यद्यपि वेदान्तिभिः पदार्थे एव आकाङ्क्षा स्वीकृता तथापि तद्विषये तेषां विश्लेषणं किञ्चित् भिन्नमेव। जिज्ञासाविषयत्वयोग्यतैव आकाङ्क्षा इत्युक्तं पूर्वमेव। किन्त्वियं योग्यता कुत्र विद्येदिति पृष्टे वेदान्तपरिभाषायाम् उक्तं – तदवच्छेदकञ्च क्रियात्वकारकत्वादिकमिति[12]। अर्थात् क्रियापदं श्रुत्वा कारकपदं श्रवणविषयं स्यात्। कारकपदं श्रुत्वा वा क्रियापदं श्रवणविषयं स्यात्। यतः कारकपदेषु क्रियापदेषु चास्ति श्रवणविषययोग्यता। अस्याः योग्यतायाः अवच्छेदकधर्मो भवेत् क्रियात्वं, कर्तृत्वं, कर्मत्वं, करणत्वं, सम्प्रदानत्वम्, अपादानत्वम्, अधिकरणत्वञ्च। अन्यूनानतिरिक्तवृत्तित्वम् अवच्छेदकत्वमिति न्यायात् क्रियात्व-कर्तृत्व-कर्मत्वादीनि अवच्छेदकानि अवच्छेद्ययोग्यतायाः समनियतत्वानि स्युः। अर्थात् यत्र क्रियात्व-कर्तृत्व-कर्मत्वादीनि अवच्छेदकानि सन्ति तत्र अवच्छेद्ययोग्यता अपि अस्ति। यथा वनं गोश्चरतीति वाक्ये वनपदार्थनिष्ठं कर्मत्वं, गोपदार्थनिष्ठं कर्तृत्वं, चरतिपदार्थनिष्ठं क्रियात्वञ्चास्ति। एतेषाम् अवच्छेदकधर्माणाम् अवच्छेद्यं भवेद् योग्यता। सा खलु गोपदार्थनिष्ठा, वनपदार्थनिष्ठा, चरतिपदार्थनिष्ठा च। इयं योग्यता एवाकाङ्क्षा। अतः पदार्थवृत्तिर्भवेदाकाङ्क्षा।

---

[10] सा चैकपदार्थज्ञाने तदर्थान्वययोग्यार्थस्य यज्ज्ञानं तद्विषयेच्छा ‘ अस्यान्वय्यर्थः कः’ इत्येवंरूपा पुरुषनिष्ठैव तथापि तस्या स्वविषयेऽर्थे आरोपः (परमलघुमञ्जूषा, तत्रैव)

[11] साहित्यदर्पणः, तत्रैव पृ. २८

[12] वेदान्तपरिभाषा, तत्रैव, पृ. १७२

आकाङ्क्षायाः प्रयोजनम्

त्रिविषयाधीने विशिष्टज्ञाने विशेष्यविशेषणवत् तयोर्सम्बन्धोऽपि ज्ञातव्यः। यथा घटोऽयमिति विशिष्टज्ञानार्थं विशेष्यो घटो विशेषणं घटत्वं तयोर्सम्बन्धः समवायश्चापि ज्ञातव्यः तथा शाब्धबोधे विशिष्टवाक्यार्थं ज्ञातुं पदार्थेन सह पदार्थान्तरस्य सम्बन्धज्ञानमप्यवधेयम्। नैयायिका अभिहितान्वयवादमवलम्ब्य ऊचुः सम्बन्धोऽयमाकाङ्क्षाभास्यः। मीमांसकाः प्राभाकराः तदस्वीकृत्य अन्विताभिधानवादमवलम्ब्य ऊचुः सम्बन्धोऽयमभिधादिवृत्तिभास्यः। कुमारिलभट्टेन तु तात्पर्यवृत्तिरङ्गीकृता।

अभिहितान्वयवादः

नैयायिका अभिहितान्वयवादिनः। पदैरभिहितानाम् अभिधादिवृत्त्या प्रतिपादितानां पश्चादन्वय इत्यभिहितान्वयः। अर्थात् पदमादावभिधादिवृत्त्या स्वार्थं प्रकाश्य पदान्तरेण सह पश्चादन्वेति। यथा घटमानय इति वाक्ये घटपदमभिधावृत्त्या कम्बुग्रीवादिमन्तं पदार्थं प्रकाशयति। तदनन्तरम् अम्पदेन कर्मत्वं प्रकाशयति। ततो पदार्थद्वयस्य सम्बन्धज्ञानमाकाङ्क्षया प्रकाश्यते।

व्युत्पत्तिवादे गदाधरभट्टाचार्येणोक्तं शाब्दबोधे चैकपदार्थोऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते[13]। सम्बन्धोऽयं क्वचिदभेदः क्वचिच्च भेदः। अभेदसंसर्गः कुत्र भवेत् इति चेत् तद्विषये प्रोक्तम् – अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्त्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते इति[14]। अर्थात् कस्यचित् प्रातिपदिकस्योत्तरं या विभक्तिरस्ति सैव विभक्तिः यदि प्रातिपदिकान्तरस्योत्तरं स्यात्तर्हि बोधनीयमुक्तप्रातिपदिकद्वयस्य सम्बन्धोऽभेदः। आद्यो यथा नीलो घटः इति वाक्ये नीलप्रातिपदिकस्योत्तरं सुविभक्तिरस्ति। सा सुविभक्तिरेव घटप्रातिपदिकस्योत्तरमप्यस्ति। अतो घटपदार्थेन सह नीलपदार्थस्य अभेदः सम्बन्धोऽस्ति। द्वितीयः स्वाव्यवहितपूर्ववर्तिपदेन सह उपस्थितपदार्थस्य यथा नीलघटम्। तद्व्यतिरिच्य विरुद्धविभक्तिमता पदेन सह अभेदसम्बन्धो भवेत्। यथा नीलस्य घटः।

अन्विताभिधानवादः

प्राभाकरैरभिहितान्वयवादं तिरस्कृत्य अन्विताभिधानवादोऽङ्गीकृतः। पदानि अन्वितानि भूत्वा पश्चाद् विशिष्टमर्थं कथयन्तीति यो वदति सोऽन्विताभिधानवादी। पदं न केवलम् अभिधादिवृत्त्या स्वार्थं प्रकाशयति अपि त्वितरपदार्थान्वितपदार्थं प्रकाशयति। यथा घटमानय इति वाक्ये घटपदेन न केवलं घटत्वपदार्थ अपि च कर्मत्वान्वितो घटपदार्थः प्रकाश्यते। एवम् अम्पदेन न केवलं कर्मत्वम् अधिकन्तु घटत्वधात्वर्थाभ्यां सह अन्वितकर्मत्वं प्रकाश्यते। अतः सम्बन्धः अभिधादिवृत्तिभास्यः।

---

[13] व्युत्पत्तिवादः, सम्पा.शुक्लश्रीराजनारायणशास्त्री, प्र.जयकृष्णदासहरिदासगुप्त, चौखम्बा संस्कृत सीरिज आफिस, बनारस, मु.१९९२ वि.स.पृ.१

[14] तत्रैव पृ. २२

तात्पर्यवृत्तिः

मीमांसकः कुमारिलभट्टस्तु तात्पर्यवृत्तिमवलम्ब्य पदार्थानां सम्बन्धं स्वीकृतवान्। वक्तुरिच्छा तात्पर्यम् इत्युच्यते। वक्ता यद्विवक्षति तदेव तत्पदस्य तात्पर्यं भवेत्। यथा अयमिति पुत्रो राज्ञः पुरुषोऽपसर्यताम् इति वाक्ये यथा पुत्रपदं राजपदमपेक्षते तथैव पुरुषपदं राजपदमपि। अर्थात् राजपदस्याकाङ्क्षा पुत्रपुरुषपदाभ्यां सह अस्ति। कथमत्र शाब्दबोधो भवेदित्याशंकायामुक्तं तात्पर्यवशादेव। अर्थात् यदि वक्ता पुत्रपदेन सह अन्वेतुमिच्छेत् तर्हि तेन सह आकाङ्क्षा गृह्येत्। यदि च पुरुषपदेन सह अन्वेतुमिच्छेत्तर्हि तत्र गृह्येदाकाङ्क्षा। अतः पदार्थानां परपस्परसम्बन्धः तात्पर्यवृत्तिभास्यः।

उपसंहारः - यथार्थमाकाङ्क्षालक्षणम्

शोधपत्रिकायामादौ आकाङ्क्षालक्षणमुक्तम्। किन्तु यदि श्रोतुर्जिज्ञासा आकाङ्क्षा स्यात् तर्हि रक्तः पटोऽस्तीति वाक्यस्य पटः अस्ति इत्यंशं श्रुत्वा शाब्दबोधो भवितुं नार्हति। यतः तत्र जिज्ञासानिवर्तकं रक्तपदं न श्रूयते। जिज्ञसानिवर्तकहीनादपि तु सम्पूर्णवाक्यार्थमश्रुत्वा तत्र शाब्दबोधो भवेत्। द्वितीयतः कश्चित् यदि स्वतन्त्ररूपेण उच्चारितं पटोऽस्तीति वाक्यं श्रृणोति तत्रापि शुक्लादिविषयका जिज्ञासा वर्तते। किन्तु तत्रापि जिज्ञासाहीनादेव शाब्दबोधो भवेत्। अतो जिज्ञासा न त्वाकाङ्क्षा। यदि समभिव्याहारविशेषः आकाङ्क्षा स्यात्तर्हि गत्वा अन्नं विद्यालयः खादति देवदत्तः इति वाक्यात् शाब्दबोधो भवितुं नार्हति। यतः अत्र वाक्यार्थबोधनाय देवदत्तः विद्यालयं गत्वा अन्नं खादति इत्येवं रूपेणान्वयः करणीयः। किन्तु समभिव्याहारविशेषरूपा सा आकाङ्क्षा अत्र नास्ति। अतो जिज्ञासां प्रति योग्यता एवाकाङ्क्षा। योग्यतापदेन स्मारितपदार्थद्वयस्य अविनाभावः तज्जन्यश्च श्रोतुः सम्बन्धज्ञानस्य प्रागभावः सूच्यते। यथा ओदनं पचति इति वाक्ये पदाभ्यां स्मारिते पदार्थद्वये अविनाभावोऽस्ति। यतः क्रियापदमृते कारकपदं कारकपदमृते च क्रियापदं न भवेत्। नीलमुत्पलमिति वाक्येऽपि नीलपदेन स्मारितनीलाक्षिप्तं गुणसामान्यम् उत्पलपदेन च स्मारितोत्पलाक्षिप्तं द्रव्यसामान्यं परस्परम् अविनाभावविशिष्टम्। ततः तद्वाक्यादुत्थापितसंसर्गबोधस्य प्रागभावोऽपि अस्ति। अतो एतादृशायाः जिज्ञासायाः योग्यत्वमेव आकाङ्क्षा[15]।

अकाङ्क्षाभास्येन पदार्थसम्बन्धग्रहे समस्या

यदि पदार्थानां परस्परसम्बन्ध आकाङ्क्षया गृह्येत्तर्हि वक्तुर्वाक्यप्रयोगद्विक्षणानन्तरं श्रोतुरर्थबोधो भवेत्। एवं रूपेण यदि विश्लेषणं कुर्यात् यत् क-क्षणे उच्चारितं पदं ख-क्षणे श्रोतुः समीपे अर्थं प्रकाशयेत्, ग-क्षणे

---

[15] आकाङ्क्षापदार्थस्तर्हि कः? जिज्ञासां प्रति योग्यता। सा च पदस्मारित तदाक्षिप्तयोरविनाभावे सति श्रोतरि तदुत्पाद्यसंसर्गावगमप्रागभावः (न्यायकुसुमाञ्जलिः, सम्पा. अध्यापक श्री श्रीमोहनभट्टाचार्य तर्कवेदान्ततीर्थ, प्र. पश्चिमवङ्ग राज्य पुस्तकपर्षत्, कलिकाता, मु. १९९५ ईश. पृ. २८५)

CC BY

पुनरुच्चारितं पदं घ-क्षणे अर्थं प्रकाशयेत्, तदनन्तरं ङ-क्षणे आकाङ्क्षया पदार्थद्वयस्य सम्बन्धोऽवगम्यते। तदनन्तरं च-क्षणे सम्पूर्णवाक्यार्थो बोध्यते इति। क्रममिदमवलम्ब्य यदि वाक्यार्थं बुबुत्सति तर्हि वक्तुर्वाक्यप्रयोगस्य द्विक्षणानन्तरं तृतीयक्षणे शाब्दबोधो भवेत्। किन्तु लौकिकजगति अयं न दृश्यते। वक्तुर्वाक्यप्रयोगानन्तरमेव शाब्दबोधो भवति। यदि सूक्ष्मरूपेण चिन्तयेत्तर्हि अवगन्तव्यं यत् क्रमेणानेन श्रोतुः सम्पूर्णवाक्यार्थबोधो भवितुं नार्हति। यदि वक्ता ख-क्षणे वाक्यस्य अन्तिमं पदमुच्चार्य क्रमानुसारेण ग-क्षणे घ-क्षणे ङ-क्षणे च वाक्यान्तरं पदमुच्चारयेत् तर्हि ग-क्षणे पूर्वोच्चारितपदजन्यं ज्ञानं भवेत् अधुनोच्चारितपदजन्यं ज्ञानं वा भवेत्। यतः न्यायनये अणुपरिमाणमता मनसा युगपज्ज्ञानं नोत्पद्यते[16]। [१६]

अभिधादिवृत्त्या पदार्थसम्बन्धग्रहे समस्या

अन्विताभिधानवादमवलम्ब्य यदि पदार्थानां सम्बन्धो अभिधादिवृत्तिभास्य इति गृह्येत् तर्हि निर्विकल्पकज्ञानेऽपि सम्बन्धज्ञानं स्वीकरणीयम्। निर्विकल्पकज्ञानन्तु न विशिष्टज्ञानं सम्बन्धज्ञानाभावात्। अतः मतमिदमपि न ग्रहणीयम्।

सम्बन्धः तात्पर्यवृत्तिभास्यः

अतः पदार्थानां परस्परः सम्बन्धः तात्पर्यवृत्त्यैव ग्राह्यः इति मतं सुसंगतम्। न्यायमञ्जर्यामुक्तं महानैयायिकेन जयन्तभट्टेन -

अभिधात्री मता शक्तिः पदानां स्वार्थनिष्ठता। तेषां तात्पर्यशक्तिस्तु संसर्गावगमावधिः[17]।।

अर्थात् पदमादौ अभिधादिवृत्त्या स्वार्थं प्रकाश्य पश्चात् तात्पर्यवृत्त्या संसर्गं प्रकाशयतीति शम्॥

****

Author's Detail

Name : **MONIRA KHATUN**
Designation : M. Phil. Research Scholar, Department of Sanskrit
Address : University Of Calcutta, Subhasgram(R.N.C. Road, Sonarpur, South 24 Parganas, West Bengal - 700147
Email Id : monirakhatun1947@gmail.com

---

[16] युगपज्ज्ञानानुत्पत्तिः मनसो लिङ्गम् (न्यायदर्शन, प्रथमखण्ड, सम्पा. महामहोपाध्याय पण्डित श्रीयुक्त फणिभूषण तर्कवागीश, प्र. पश्चिमवङ्ग राज्य पुस्तकपर्षत्, कलिकाता, मु. १९८१ ईश. पृ. २२२)

[17] न्यायमञ्जरी ३७२

आचार्यमाहात्म्यं कुलशेखरसूरिवैभवञ्च

- डा. बी. केशवप्रपन्न पाण्डेयः

कुम्भे पुनर्वसौ जातं केरले केळिपट्टने।
कौस्तुभांशं प्रपद्येऽहं राजानं कुलशेखरम्॥[1]

श्रियःपतिरवाप्तसमस्तकामः समस्तकल्याणगुणगणः जगज्जन्मादिकारणं परात्परः परमपुरुषः पर-ब्रह्माभिधानः परमं पदमधितिष्ठन् चेतनोज्जिजीविषया सिसृक्षुस्तान् करणकलेबरैः संयोज्य, विधिनिषेधपराणि शास्त्राणि, तदुपदेष्टारमाचार्यं च प्रदाय शरणापन्नजीवेषु विद्यमानातिशयप्रीत्या अर्थपञ्चकज्ञानमुपदिदेश।

तथापि स्वेच्छाप्रवृत्तिमतो विरुद्धानुष्ठानपरांश्च चेतनान् स्वधर्मे प्रवर्तयितुं नरो नारायणश्च भूत्वा भूमावतीर्य शिष्याचार्यधर्मान् स्वयमनुष्ठाय प्रादर्शयत्। पुनश्च नैकधावततार तानेतान् सत्पथे प्रवर्तयितुं पौनःपुन्येन। परं तत्राप्यसाधारणैः धर्मैः अस्य परत्वं विज्ञाय अभाग्याः चेतनाः सुदूरङ्गताः। ततश्च मनुष्यसजातीयोऽजनि रामकृष्णादिना रूपेण। तत्रापि ते मनुष्यास्तं भगवन्तं नैवागणवन् यतोऽसौ अतिमानुषैः समुद्रादिभिः व्यापारैः निहीनैरपि कपिस्नेहादिभिः कदाचित् स्वस्य परत्वम् अन्यदावरत्वञ्च प्रकटीचकार।

एवं सर्वथैव भगवत्प्रवृत्तिप्रतिकूलवृत्तिषु चेतनेषु, स भगवान् सुसूक्ष्मं विचिन्त्य कांश्चन चेतनान् विशेषतोऽभिवीक्ष्य, तानिमान् शठकोपकुलशेखरादिदिव्यसूरीन् संसारिमध्ये प्रावेश्य, वश्यैरेव गजैः मत्त-मतङ्गजान् इव एभिः दिव्यसूरिभिरेवैतानभाग्यान् संसारविषयमग्नान् जीवान् स्वायत्तीकर्तुं प्रायतत। ते तु दिव्यसूरयो भगवतो निर्हेतुककृपया सन्तीर्णतन्मायाः, साक्षात्कृत-यथावस्थित-तत्त्वहित-पुरुषार्थज्ञानाः, भगवत्पारतन्त्र्य-काष्ठा-निष्ठाः, नित्यानन्दानुभवयोग्यानपि संसारेषु नितरां क्लिश्यमानचेतनानुद्वीक्ष्य निर्विण्णाः परोपदेशमुखेन तान् सुपथा प्रवर्त्य ननन्द भगवान् नितरां निजप्रयत्नसाफल्यात्। एवं **'स्वासाध्ये कर्मणि सिद्धहस्ता इमे'**[2] इति किल भगवान् एतेषु आचार्यवरेषु विशेषतोऽनुरक्तो भवति। अनेकेषु च भगवतोऽतरेषु यथा मत्स्यादिदशावताराः प्रधानाः भवन्ति तथैव आचार्येषु दिव्यसूरिषु च शठकोपकुलशेखरप्रभृति-रामानुजाद्यवताराः मुख्यतमा भवन्ति। एतादृशानां महतां विषये शास्त्रेषु महद्वैशिष्ट्यमपि प्रदर्शितम्। तेषां दिव्यावतरणमुद्दिश्य कानिचन पौराणिकपद्यानि यथा –

कलिस्साधुरिति प्रोक्तो वेदव्यासेन धीमता।

---

[1] आळ्वार्वैभवे

[2] श्रीमद्वरवरमुनिविरचितप्रमाणसङ्ग्रहादुद्धृतः, स्तोत्ररत्ने-२

कृतादिषु प्रजा राजन् कलाविच्छन्ति संभवम्॥

कलौ खलु भविष्यन्ति नारायणपरायणाः।

ताम्रपर्णी प्रतीची च कृतमाला पयस्विनी॥

कावेरी च महानद्यस्तासां तीरेषु योगिनः।

भविष्यन्ति कलेः काले द्रामिड्या भाषया स्वयम्॥

वेदार्थविशदीकारं करिष्यन्तीति शुश्रुमः।

महाभागवता लोके द्रमिडेषु भूरिशः॥

परमैकान्तिनो विष्णोः पार्षदाः कृतदेहिनः।

भविष्यन्ति कलौ प्राप्ते इति व्याससुतोऽब्रवीत्॥ [3]

इत्यनेकैः पुराण-स्मृति-पाञ्चरात्र-संहितादिवचनैः अनादिकालसंसारसागरनिमग्नानां जीवानामुद्धरणाय कृतावताराणां भगवतो नित्यसूरिपदभाजानाम् शठकोपकुळशेखरादिदिव्यसूरीणाम् अवतारादिविशेषा वर्णिताः। तादृशानां भगवतः कृपया तत्सन्तीर्णमायानां साक्षात्कृतयथावस्थितज्ञानानां तत्त्वहितपुरुषार्थपराणां सदा भगवत्पारतन्त्र्यसुखैकरसिकानां नित्यं तद्गुणामृतसिन्धुनिमग्नानां करुणैकहृदयानां कृपया परया चेतनोज्जीवन-पराणां भगवद्गुणानुभवपरीवाहरूपाणां चतुस्सहस्रदिव्यप्रबन्धरचयितानां वैष्णवकुलधनानां महनीयानाम् अनितरसाधारणवैभवम् अधोनिर्दिष्टेन पद्येन दृश्यते यथा –

आह्लादशीतनेत्राम्बुः पुलकीकृतगात्रवान्।

सदा परगुणाविष्टो द्रष्टव्यः सर्वदेहिभिः।। [4]

अस्य भावार्थो यथा –

सदा भगवद्गुणानुभवजनितप्रीतिपरवशः शीतलतरानन्दबाष्पविसरेणैव तादृशपारवश्येण रोमाञ्चितगात्रः, भागवतोत्तमः, सर्वदेहिभिः ज्ञानिभिरज्ञानिभिश्चापि द्रष्टव्यः। भगवांस्तु कर्मज्ञानभक्तिज्ञाननिष्ठैरेव द्रष्टव्यो भवति। परमेते हि भागावताः प्रातस्मरणीयाः सदा सर्वत्र सर्वदेहिभिः ज्ञानिभिरज्ञानिभिश्चापि द्रष्टव्याः पूजनीया इत्यर्थः। 'सदा द्रष्टव्य' इति सदा दर्शनविषयत्वमप्येतेषामेवेति प्रोक्तम्। श्रीयामुनाचार्योऽपि स्वकीये स्तोत्ररत्ने एतादृशानामाचार्याणां विषये एव स्वस्य महान्तं विशेषादरं प्रदर्शयति यथा –

नाथाय नाथमुनयेऽत्र परत्र चापि

नित्यं यदीयचरणौ शरणं मदीयम्। [5] इति।

---

[3] भारते हरिवंशे दक्षिणद्वारकामाहात्म्ये एकोनषष्टितमे अध्याये गोभिलं प्रति नारदः

[4] श्रीमद्वरवरमुनिकृतप्रमाणसङ्ग्रहे

अनेन पद्येन स्वामिना श्रीयामुनाचार्येण स्वस्याचार्यभूतं पितामहं नाथमुनिं महतादरेण प्रणम्य तदीयचरणावेव ऐहिकामुष्मिकयोः शरणमिति तत्सम्बन्धेनैव भगवतो दिव्यधाम्नोऽपि प्राप्तिरिति संभाव्य तच्चरणाब्जशरणवरणं करोति। जगद्गुरुः भगवद्रामानुजाचार्योऽपि तदीयमानसिकाचार्यस्य यामुनाचार्यस्य पादारविन्दसंश्रयणेनैव स्वस्यास्तित्वं धन्यत्वञ्च मन्यते। यथा –

यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः।

वस्तुतामुपयातोहं यामुनेयं नमामि तम्।। [6]

एवमेतादृशैः प्रमाणिकैः वचनैराचार्याणां वैशिष्ट्यं तल्लोकोत्तरत्वञ्च प्रत्युपपादि। भगवान्नारायणोऽपि कश्चिद्विनीतम् आचार्याभिमानिनं तदनुकूलञ्च शिष्यमेवानुगृह्य निजदिव्यधाम अपि ददाति न तु स्वतन्त्रं आचार्यपादारविन्दासंश्रितं स्वकीयं कञ्चन भक्तम्।

उक्तञ्च -

यावज्जीवं जगति नियता देहयात्रा भवित्री

त्यक्त्वा सर्वे त्रिचतुरदिवग्लानभोगा न भोगाः।

दत्ते रङ्गी निजमपि पदं देशिकादेशकाङ्क्षी

किन्ते चिन्ते प्रियमिति किल स्मेर वक्त्राविभाषी॥ [7]

अत इदानीं तादृशेषु महनीयेषु भगवदात्मभूतेषु तद्भक्तमणिषु दिव्यसूरिषु अन्यतमानां सदा रङ्गराजदर्शैनकजीवनलक्ष्याणां रङ्गराजप्रवणानां द्राविड्याम् आळ्वार् इति नामभाजां श्रीमत्कुलशेखर-दिव्यसूरिणां सर्वक्षेमङ्करं वैभवमुपस्थाप्यते। यद्दिव्यवैभवज्ञानेनान्येऽपि भगवद्भक्तास्तथा प्रवर्तेरन् इति धियाऽऽस्वाद्यते इह।

भरतखण्डे केरळे देवभाषया तिरुवञ्चिक्कलम् इति प्रथिता काचन नगरी। तत्र शेराख्ये क्षत्रियकुले भगवतः कौस्तुभांशः श्रीकुलशेखरनामा नरपतिः अवततार। कलौ सप्तविंशतिसंख्याकेषु हायनेषु अतीतेषु पराभवनाम्नि संवत्सरे कुम्भमासि शुक्लद्वादशीयुते गुरुवासरे महानुभावोऽयं भूमिमामलञ्चकार। कुलशेखरराडयं भगवत्कृपा-कटाक्षजनितनिखिलतत्त्वज्ञानः विजितेन्द्रियः समुज्झिताभिमानः जगदिदं निस्स्वार्थेन भावेन परिपालयामास। प्रजा अपि तदाचरितधर्मपथि एव आत्मानं नियोज्य धर्मपथात् रेखामात्रमपि नातिक्रामन्ति स्म। सर्वेऽपि वर्णाश्रमिणः स्वस्वधर्मे सर्वथा आरूढास्सन्तः करणत्रयेणापि शास्त्रोक्तस्वस्वधर्माचारान् श्रद्धयानुससस्रुः।

---

[5] स्तोत्ररत्ने - २

[6] स्तोत्ररत्ने -१

[7] देशिकस्तोत्रे

कुलशेखरसूरिश्चाऽयं सदा भगवति न्यस्तसमस्तात्मभारः राजकीयकार्यकलापांश्च भगवन्निष्ठ एव सहजतया वहति स्म।

परन्तु सन्ततं भगवदनुभवजनितातिशयप्रेम्णा भगवदभिमततमश्रीरङ्गयात्रोत्सुकतया रङ्गनाथदिव्याभिलाषी प्रत्यहं श्रीरङ्गदिव्यक्षेत्रयात्रामुद्घोषयति स्म। मुकुन्दमालायाः प्रथमादेव पद्यादस्य दिव्यसूरेः श्रीरङ्गयात्रां प्रति विद्यमानानुपमा उत्सुकुता परा श्रद्धा च महती दृश्यते। यथा –

घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने।

तमहं शिरसा वन्दे राजानं कुलशेखरम्।। [8]

किञ्चायं दिव्यसूरिः,

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।

बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति।। [9]इति

शास्त्रोक्तवचनमनुसृत्य निखिलवेदवेदाङ्गवेद्यपरतत्त्वनिर्णयपरमितिहासश्रेष्ठं श्रीमद्रामायणं विदुषां मुखारविन्देभ्यः सश्रद्धमश्र्णोत्। तथा सति श्रीमद्रामायणकथावासरे क्रमप्राप्त एकः प्रसङ्गो यथा –

चतुर्दशसहस्राणि रक्षसां भीमकर्मणां।

एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति।। [10]

इत्याकर्ण्य निरतिशयरामभक्तिपरवशः सन् पुरातनमपि तदितिवृत्तं तदानीन्तनं मन्वानः सद्यो भगवतो रामस्य युद्धे साहाय्यार्थं स्वस्य चतुरङ्गिणीसेनाभिः स्वस्य नानाप्रहरणादिभिः परिकर्मितः राज्याद्बहिर्निर्जगाम। तदनु तत्सचिववराः चातुर्येण केनचित् तरुणविदुषा कथञ्चिद्रामायणप्रसङ्गान्तरमुपस्थाप्य –

तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम्।

बभूव हृष्टा वैदेही भर्तारं परिषष्वजे॥ [11]

इत्यमुं श्लोकार्थं श्रावयामासुः। एवं एतादृशं राघवस्य विजयशंसिनं वृत्तान्तं श्रुत्वा हर्षमनाः स राजा कुलशेखरसूरिः ततो युद्धभूमेः स्वसेनाभिः भगवन्तं राममेवानुध्यायन् स्वनगराभिमुखं न्यवर्तत।

एवं बहूनि राज्ञः कुलशेखरमहात्मनः भगवति महत्प्रीतिवशाचरितानि चरितानि विलक्षणानि सुविख्यातानि श्रीसंप्रदायजगति। तेष्वन्यतमैका कथा राज्ञः कुलशेखरसूरेः भागवतेषु स्थितं महान्तं विस्रब्धं

---

[8] मुकुन्दमाला - १

[9] वायुपुराणम् १-२०१

[10] रामायणम् - ३.२४.२

[11] रामयणम् - ३.३.३९

समादरभावंश्च प्रकटीकरोति। एकदा राज्ञः नीतिपथनिष्णाताः सचिवाः तस्य भागवतजनसम्पर्कं विच्छेत्तुकामाः राज्ञो नित्याराध्यस्य देवदेवस्य रामस्य रत्नमयं हारमेकमपहृत्य तदीयेषु परमसात्त्विकेषु भागवतजनेषु तदपहारित्वदोषमारोपयन्। परं भगवत्कृपाकटाक्षेण प्रत्यक्षितसकलवृत्तान्तः भागवतानां परिशुद्धतां सकल-लोकविदितां कर्तुमनाः विषधरस्थापिते एकस्मिन् घटे स्वहस्तं प्रवेश्य विषधरं सर्पं बहिरानयामास। हन्त परं सर्पो स्रगजायत। तदा तत्रत्याः लज्जिताः तदमात्याः स्वाचरितदुराचारानङ्गीकृत्य क्षमां प्रार्थयामासुः। ततो भगवते रामाय तं हारं समर्प्य राजाऽपि कुलशेखरः सुचिराभिलषितां स्वनगरे असकृदुद्घुष्टां रङ्गयात्रां सफलयामास। तत्र भगवतो रङ्गनाथस्यासीमकृपया प्राप्ततदीयदर्शनः आत्मानं धन्यं मेने। सूरिरयं विविधभगवदनुभवजनितपरीवाहरूपं ***"पञ्चोत्तरशतपद्यपरिमितं पेरुमाळ् तिरुमोळि"***[12] इति प्रसिद्धं द्राविडभाषामयं प्रबन्धं विरचय्य लोकमिममुपचकार।

1. तत्र प्रथमदशके सर्वैरपि अवयवैः करणत्रयेणापि च भगवतः रङ्गनाथस्य विषये कदाकदेति निवेदयामास।
2. द्वितीये दशके परमपुरुषानुभवजनितकिङ्करता ततो भगवतः किङ्कराणां विषये किङ्करता, अन्ततो भागवतचरणारविन्दपांसुलतामात्मनः शरणमिति संभावयति।
3. तृतीयदशके भागवतकैङ्कर्यपर्यवसन्नभगवत्कैङ्कर्यरूपपरमपुरुषार्थमनोरथसत्त्वेऽपि रजस्तमःप्रचुराणां देहात्माभिमानिनां विषयप्रवणानाम् अनात्मज्ञानां सहवासे तादृशमनोरथस्यापि अकिञ्चित्करत्वापत्त्या तादृपामरजनसहवासे अनभिरुचिं प्रार्थयन् स्वस्य भगवदेकप्रावण्यं प्रकटीचकार।
4. तुरीये तु भगवान् रङ्गनाथः स्वयं वेङ्कटाचलेऽपि सन्निधत्ते इति धिया महत्या भक्त्या च तदधीशं शरणमुपगम्य कैङ्कर्यादीनि संप्रार्थ्य तत्रैव तिर्यक्स्थावरजन्मानि प्रार्थयति।
5. पञ्चमे स्वस्यानन्यगतित्वमनेकैः निदर्शनैः उय्यवन्दपेरुमाळ् सन्निधौ विज्ञाप्य भगवदेकस्यैव उपायत्वमुररीकरोति।
6. षष्ठे दशके तु अतिक्रान्तदशः विपाकापन्नप्रेमदशापन्नः गोपिकातादात्म्यभावनया स्वयमपि कृष्णलीलासमासक्तवल्लवीजनो भूत्वा तमेव बहुमुखमनुभवति स्म।
7. सप्तमे दशके निरतिशयभोग्यभूतमेतादृशं वस्तु यावता कालेन नानुभूतं तावते कालायानुतप्यमानो यशोदानुभूतां श्रीकृष्णबाललीलामनालोकितवत्याः कृष्णजनन्याः देवक्याः प्रलापप्रकारान् तदात्मभावात् प्रकटीचकार।

---

[12] चतुस्सहस्रदिव्यप्रबन्धेऽन्यतमो भागः

CC BY

8. ततोऽष्टमे कौसल्यातादात्म्यापन्नोयऽयं बालं श्रीरामं कौसल्याभावेन डोलायामारोप्य तल्लालनवर्णनम् दर्शयति।
9. नवमे भगवतो रामस्य वनवासप्रस्थानसमये विश्लेषमसहमानो दशरथो भूत्वा तदात्म्यात् श्रीकुलशेखरसूरेः महान् विलापः करुणापरिपूर्णभावनया वर्णितः।
10. दशमे दशके तु रामभक्तोऽयं रामायणस्य काण्डसप्तकथाः अन्ववादीत्।

किञ्च संस्कृतभाषायां मुकुन्दमालानाम्नीं भक्तिरसनिष्यन्दिनीम् अतिललितरसगुम्फितां भगवतो नारायणस्य सर्वस्मात्परत्वप्रतिपादिनीं नित्यमनुसन्धीयमानां स्तुतिं विरचय्य भगवद्भक्ताननुजग्राहोऽयं दिव्यसूरिः। एतैश्च दिव्यसूरिभिरुपदिष्टाः भगवदनुभवजनितपरीवाहरूपाः प्रबन्धाः दिव्यप्रबन्धा इत्युच्यन्ते। अपि चैतैः दिव्यसूरिभिरनुभूतानि सङ्कीर्तितानि च दिव्यक्षेत्राणि दिव्यदेशा इति कथ्यन्ते यतोऽहि स्वयं विशेषतो भगवान् तेषु क्षेत्रेषु महतादरेण सन्निहितः। एवं भगवद्भक्तिभरितहृदयानां दिव्यसूरीणां दिव्यचरितं तैरनुभूतानां दिव्यगाथानामनुभवेन चात्मनः कृतकृत्यान् सम्भाव्य विरम्यते॥

****

परिशीलितग्रन्थसूची

1) श्रीमल्लोकाचार्यकृतार्थपञ्चकम्, श्रीमदण्णङ्गराचार्यकृतव्याख्यानसहितम्, PNK Press, चेन्नै, 1946

2) स्तोत्ररत्नम्, श्रीयामुनाचार्यैरनुगृहीतम्, श्रीमदण्णङ्गराचार्यकृतव्याख्यानसहितम्, ग्रन्थमाला कार्यालयः, काञ्चीपुरम्, 1960

3) गुरुपरम्पराप्रभावः, पिल्लैलोकजीयर्स्वामिभिरनुगृहीतम्, श्रीमदण्णङ्गराचार्यकृतव्याख्यानसहितञ्च, ग्रन्थमाला, काञ्चीपुरम्, 1975

4) मुकुन्दलमाला, श्रीमदण्णङ्गराचार्यकृतव्याख्यानसहितम्, ग्रन्थमाला कार्यालयः, काञ्चीपुरम्

5) दिव्यसूरिचरितम्, वेङ्कटाचार्यविरचितम्, मैसुरु, 1970

****

Author's Detail

Name	:	**DR. B. KESHAVAPRAPANNA PANDEY**
Designation	:	Assistant Professor, Department of Sanskrit
Address	:	Dwaraka Doss Goverdhan Doss Vaishnav college, Arumbakkam, Chennai – 106
Email Id	:	keshavaprapanna@gmail.com

आधुनिकयुवकेभ्यः श्रीमदादिशङ्कराचार्यस्य प्रासङ्गिकोपदेशाः

- डा. व. सौम्यनारायणः

भूमिका

गुशब्दस्त्वन्धकारस्स्यात् रुशब्दस्तन्निरोधकः।

अन्धकारनिरोधित्वात् गुरुरित्यभिधीयते॥[1]

इति श्लोकेन गुरुशब्दस्य तात्पर्यं ज्ञायते। एवं यः शिष्याणामज्ञानमयमन्धकारं नाशयित्वा ज्ञानदीपेन भास्वता तान् शिष्यान् अनुगृह्णाति सः गुरुः इत्यवगम्यते। अयं गुरुरेव आचार्य इति पदान्तरेण व्यवह्रियते॥

आचिनोति हि शास्त्रार्थान् आचारे स्थापयत्यपि।

स्वयमाचरते यस्मात् तस्मादाचार्य उच्यते ॥[2]

इति शलोकानुसारमाचार्याः परोपदेशे न केवलं कुशलाः अपि तु स्वयमपि न्याय्यात् पथः न प्रविचलन्ति। तादृशेषु आचार्येषु आदिशङ्करभगवत्पादः अन्यतमः॥

पुण्यभूमिरित्याख्यातस्य भारतदेशस्य केरलप्रान्ते पूर्णानदीतीरे विद्यमाने कालडि नामके ग्रामे शिवगुरु-आर्याम्बा दम्पत्योः आदिशङ्करा-चार्यः पुत्रत्वेन जातः।

मूर्धनि हिमकरचिह्नं निटिले नयनाङ्कमंशयोः शूलम्।

वपुषि स्फटिकसवर्णं प्राज्ञास्तं मेनिरे शम्भुम् ॥[3]

इति प्राज्ञैः स्तुतरीत्या आदिशङ्कराचार्यः श्रीशङ्करस्य उमापतेरपराव-तारोऽभवदिति अस्माभिरवगम्यते। पञ्चमे वयसि कृतोपनीतः श्रीशङ्कराचार्यः विद्याभ्यासार्थं गुरुकुलमगच्छत्। षष्टे वयसि **बालबोधसङ्ग्रह** इति ग्रन्थं ग्रथितवानिति विदुषामभिप्रायः। सप्तमे वयसि **कनकधारास्तोत्रं** विरचय्य श्रीमहालक्ष्मीं प्रीणयन् कस्यैचिद्दीनायै वृद्धब्राह्मण्यै कनकामलकानुत्पादयामास॥

मातृभक्तः श्रीशङ्कराचार्यः कदापि स्वजनन्याः वचनमति-क्रान्तो नैवाभवत्। **"मातृदेवो भव", "नास्ति मातृसमो गुरुः"** इति वचनानुसारं तां पूजयन्नासीत्। तामधिकृत्य **"कुपुत्रो जायेत क्वचि-दपि कुमाता नैव भवति"** इति रत्नपञ्च्यात्मक**श्रीमातृपञ्चक**मिति स्तोत्रग्रन्थं लिलेख। अनेन युवकाः मातृभक्ताः भवेयुरिति ध्वन्यते॥

---

[1] द्वयोपनिषदि - 4

[2] म.स्मृ.2.140

[3] श्रीमच्छङ्करदिग् – 2.81

आदिशङ्कराचार्यः मानवोजीवनाय बहून् ग्रन्थान् निरमिमीत। अद्वैतसिद्धान्तानुसारं परमात्मस्वरूपं ज्ञातुं त्रिविधेन मार्गेन ग्रन्थानरचयत्। तत्र **प्रथमं प्रस्थानत्रयमिति** मार्गेण उपनिषद्-श्रीमद्- भगवद्गीता-ब्रह्मसूत्राणि इत्यादीनां भाष्यानि ग्रथितवान्। **द्वितीयेन** तु प्रस्थानत्रयात्मकान् विषयान् **प्रकरणग्रन्थैः** उपादि श। **तृतीयेन** बहुधा **भगवत्स्तोत्रादि**भिः ज्ञान-भक्तिमार्गे शिष्यान् तथा युवकान् प्रेरयामास॥

एतेषु प्रकरणग्रन्थेषु उपदेशसाहस्री, विवेकचूडामणिः, वाक्यवृत्तिः, आत्मज्ञानोपदेशविधिः, प्रश्नोत्तररत्नमालिका, साधनापञ्चकमित्यादयः अतिप्रसिद्धाः। तेषु क्रमशः एकैकस्मिन् ग्रन्थे शिष्याणां तथा युवकानां कृते प्रेरणारूपान् विषयान् पश्यामः॥

विवरणम्

तत्र **प्रथमं** तावत् **उपदेशसाहस्री** नाम ग्रन्थे शिष्यप्रतिबोधि-विधिप्रकरणे न हि ज्ञानेन सदृशं पवित्रमिह विद्यते, श्रद्धावान् लभते ज्ञानम् इति ज्ञानस्यावश्यकतां प्राप्तुं श्रद्धायाः अनिवार्यतां च, **मोक्षसाधनविधिं व्याख्यास्यामः मुमुक्षूणां श्रद्दधानानाम् अर्थिनाम् अर्थाय**[4]इति शङ्काराचार्यः वदति। **अमानित्वादि गुणं च ज्ञानोपायं संयक् ग्राहयेत्**[5] अर्थात् शिष्यैः तथा युवकैः ज्ञानस्य प्रतिबन्धकरूपं मानित्वं त्याज्यमिति आदिशति॥

अज्ञानं तस्य मूलं स्यात् इति तत् हानमिष्यते।

ब्रह्मविद्यात आरब्धा ततो निश्श्रेयसं भवेत्[6] ***॥***

इत्यनेन श्लोकेन, एतस्मिन् संसारे अस्माकं जन्मनः मूलं तावत् अस्माकमज्ञानमेव भवति।

तन्निरसनार्थमस्माभिः ब्रह्मविद्या अधीतव्या यया उन्नत-स्थितिः अर्थात् मोक्षः लभ्यते इति आचार्यस्योपदेशः। इतोऽपि

ननु कर्म तथा नित्यं कर्तव्यं जीवने सति।

विद्यायाः सहकारित्वं मोक्षं प्रति हि तद्व्रजेत्[7] ***॥***

अनेन युवकाः अज्ञानरहिताः भवेयुः तथा मुमुक्षवः विद्याभ्यासेन ज्ञानं प्राप्नुयुरिति आचार्यः आशासते। ज्ञानसंपादनार्थं गुरुं वयमाश्रयामः। सः गुरुः आचार्यो वा कीदृशो भवेदित्युक्ते - आचार्यस्तु **ऊहापोह-ग्रहण-धारण-शम-दम-दया-अनुग्रहादिसम्पन्नः, लब्धागमः,दृष्टादृष्ट-भोगेषु अनासक्तः, त्यक्तसर्वकर्मसाधनः, ब्रह्मवित्,**

---

[4] उ.सा-1.1

[5] उ.सा-1.5

[6] उ.सा-उपो.प्र .1.5

[7] उ.सा-उपो.प्र .1.8

ब्रह्मणि स्थितः, अभिन्नवृत्तः, दम्भ-दर्प-गुहक-शाठ्य-माया-मात्सर्यानृताहङ्कार-ममत्वादि दोषवर्जितः, केवल-परानुग्रह-प्रयोजनः विद्योपयोगार्थी पूर्वमुपदिशेत॥ इति आचार्यत्वस्य गुणपट्टिकामनुगृह्णाति शङ्कराचार्यः॥

युवकाः विभ्रमज्ञानपीडिता न भवेयुरित्यंशं –

बुद्धिस्थः चलतीवात्मा ध्यायतीव च दृश्यते।

नौगतस्य यथा वृक्षाः तद्वत्संसारविभ्रमः[8] ॥ इति श्लोकेन निर्दिशति।

ददतश्चात्मनो ज्ञानं निष्क्रयोऽन्यो न विद्यते।

ज्ञानमिच्छन् तरेत्तस्माति युक्तः शिष्यगुणैस्सदा[9] ॥ इति च शिष्यहितमनुगृह्णाति॥

तत्र **द्वितीयं** तावत् **विवेकचूडामणौ** - मानवाः अप्राप्यं मनुष्यत्वं प्राप्य अलभ्यात्मकं मोक्षं च लब्धुमिच्छन्ति। तदर्थं सत्सङ्गतिमाश्रयन्ति। एतदधिकृत्य -

दुर्लभं त्रयमेवैतत् दैवानुग्रहहेतुकम्।

मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयः[10] ॥ इत्यनेन श्लोकेन आचार्यः सूचयति।

परब्रह्मज्ञानविषयं ज्ञातुं वा लब्धुं वा युवकाः श्रद्धायुक्ताः भवेयुरित्यंशं -

शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणा।

सा श्रद्धा कथिता सद्भिः यया वस्तूपलभ्यते[11] ॥ इति श्लोकेन निर्दिशति। अपि च

कामः क्रोधो लोभदम्भाभ्यसूयाऽहङ्कारेर्ष्या मत्सराद्यस्तु घोराः।

धर्मा एते राजसाः पुंप्रवृत्तिः यस्मादेतत्तद्रजो बन्धहेतुः[12] ॥

इत्यनेन एते रजोगुणाः मानवानां संसारबन्धस्य हेतुभूता भवन्ति। अतः युवकैः तेभ्यो गुणेभ्यो दूरे वर्तितव्याः इति आचार्यः प्रत्यादिशति॥

वैराग्यस्य फलं बोधः बोधस्योपरतिः फलम्।

स्वानन्दानुभवात् शान्तिः एषैवोपरतेः फलम्[13] ॥

निवृत्तिः परमा तृप्तिः आनन्दाऽनुपमः स्वतः।

दृष्टदुःखेष्वनपद्वेगः विद्यायाः प्रस्तुतं फलम्[14] ॥

---

[8] उ.सा-बुद्धय.प्र .5.2

9.उ.सा-सं.मति.प्र .17.87

[10] वि.चू-1.3

[11] वि.चू-26

[12] वि.चू-114

[13] वि.चू -420

इति आभ्यां श्लोकाभ्यां युवकानां कृते वैराग्यस्य आवश्यकतां तस्य फलं च बोधयति शङ्काराचार्यः॥

अन्ततः –

साधुभिः पूज्यमानेऽस्मिन् पीड्यमानेऽपि दुर्जनैः।

समभावो भवेद्यस्य स जीवन्मुक्त इत्युच्यते[15] ॥

अनेन श्लोकेन युवकाः सद्भिः पूज्यमानाः असद्भिः निन्द्यमानाः वाऽपि ते स्थितप्रज्ञाः भवेयुरिति आशासते शङ्कराचार्यः॥

तत्र **तृतीयं** तावत्, **वाक्यवृत्तिर्ना**मके ग्रन्थे -

तापत्रयार्कसन्तप्तः कश्चिदुद्विग्नमानसः।

शमादि साधनैर्युक्तः सद्गुरुं परिपृच्छति[16] ॥

अस्मिन् श्लोके शिष्यः शमादिसाधनैर्युक्तः इति विशेषणेन विशिष्यते। अर्थात् गूढ-तथा बाह्येन्द्रियाणां निग्रहणं शमदमादिसाधनैः कृत्वा ब्रह्मज्ञानमिति साध्यं प्राप्नोति मुमुक्षुः शिष्यः। अनेन इदं ज्ञायते यत् युवकाः शमदमादिभिः विशिष्टज्ञानं प्राप्तुं शक्नुयाः इति॥

शमादिसहितस्तावत् अभ्यसेच्छ्रवणादिकम्[17] ॥

इन्द्रियाणि संयम्य स्थितप्रज्ञाः भूत्वा वेदाभ्यासः विद्याभ्यासो वा युवकैः करणीयः इति वारं वारम् आचार्यः घोषयति॥

तत्र **चतुर्थं** तावत्, **आत्मज्ञानोपदेशविधिः** इति ग्रन्थे - ***अथ आत्मज्ञानोपदेशविधिं व्याख्यास्यामो मुमुक्षवे श्रद्दधानाय यतये वीतरागाय आत्मलाभात् परलाभ-अभावात्॥*** आत्मलाभभूतं आत्मबोधाख्यमुपदेशं शङ्कराचार्यः युवकेभ्यः विवरणं करोति॥

आचार्यप्रसादात् अज्ञाननिद्रा प्रबुद्धः सकलसंसारविमुक्तो विद्वान्॥ इत्यनेन वाक्येन, अज्ञानाख्यनिद्रातः सकलविधप्रति-बन्धकेभ्यः विमुक्ताः युवकाः एव आत्मबोधं प्राप्य विद्वांसो भवन्तीति शङ्कराचार्यस्याभिप्रायः॥

तत्र **पञ्चमं** तावत्, **प्रश्नोत्तररत्नमालिका**यां - युवकैः किं करणीयम्, किमकरणीयम्, किं वचनीयम्, किमवचनीयम्, किं बोद्धव्यम्, किमबोद्धव्यम् इति सर्वमुपदिशति शङ्कराचार्यः। गुरुं शिष्यः प्रश्नान् पृच्छति।

---

[14] वि.चू-421

[15] वि.चू-441

[16] वा.वृ-3

[17] वा.वृ-49

शिष्याय गुरुः तस्य प्रश्नानामुत्तराणि यच्छति। अनया पद्धत्या लिखितमिदं प्रश्नोत्तररत्नमालिकाख्यं ग्रन्थरत्नम्। ततः किञ्चिदास्वादयामः -

भगवन् किमुपादेयम्? गुरुवचनम्,हेयमपि च किम्? अकार्यम्॥

को गुरुः? अधिगततत्त्वः, शिष्यहिताय उद्यतः सततम्[18]।

कः पथ्यतरः? धर्मः, किं विषम्? अवधीरणा गुरुषु[19] ॥

पातुं कर्णाञ्जलिभिः किममृतमिह युज्यते? सदुपदेशः।

नलिनीदलगतजलवत्तरलं किम्? यौवनं, धनं, चायुः[20] ॥

का सुखदा? साधुजनमैत्री, किं मरणम्? मूर्खत्वम्।

आमरणात् किं शल्यम्? प्रच्छन्नं यत्कृतं पापम्[21] ॥

कुत्र विधेयो यत्नः? विद्याभ्यासे सदौषदे दाने।

अवधीरणा क्व कार्या? खल-परयोषित्-परधनेषु[22] ॥

कोऽन्धः? योऽकार्यरतः, को बधिरः? यो हितानि न श्रृणोति।

को मूर्खः? यः कोले प्रियाणि वक्तुं न जानाति[23] ॥

एवमतिसरलया वाण्या शिष्याणां युवकानां च हिताय सुखाय च सन्मार्गं प्रदर्शयति शङ्कराचार्यः॥

तत्र **षष्ठं** तावत्, **साधनापञ्चकम्** इति स्तोत्रग्रन्थे यथा -

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयताम्,

तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम्।

पापौघः परिधूयतां भवसुखे दोषोऽनुसन्धीयतां

आत्मेच्छा व्यवसीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ॥1॥

अनेन श्लोकेन "स्वाध्यायोऽध्येतव्यः" "स्वाध्यायान्मा प्रमदः" "येषां त्रयी वाग्विधेया" "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" "वेदाच्छास्त्रं परं नास्ति" "वेदोऽखिलो धर्ममूलमिदं जगत्" "वेदबोधित-इष्टसाधनताको धर्मः" इत्यादिनीतिविषयान् आचार्यः प्रतिपादयति॥

---

[18] प्र.र-2

[19] प्र.र-3

[20] प्र.र-8

[21] प्र.र-13

[22] प्र.र-15

[23] प्र.र-29

सङ्गस्सत्सु विधीयतां भगवतो भक्तिर्दृढाऽऽधीयतां

शान्त्यादिः परिचीयतां दृढतरं कर्माशु संस्त्यज्यताम्।

सद्विद्वानुपसृप्यतामनुदिनं तत्पादुकाऽऽसेव्यतां

ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरो वाक्यं समाकर्ण्यताम् ॥2॥

अनेन श्लोकेन "भज साधु समागमम्", "कर्तव्यो महाश्रयः", "सत्- सङ्गतिः कथय किं न करोति पुंसाम्", "सर्वधर्माः परित्याज्याः", "भवित्री तु क्रिया सर्वा सतां वाचमनुव्रजेत्", "श्रुतिस्मृती तु विप्राणां चक्षुषी द्वे विनिर्मिते। एकेन हीनः काणस्स्यात् द्वाभ्यामन्धः प्रकीर्तितः॥ ",

कामादिसर्पव्रजगारुडाभ्यां विवेकवैराग्यनिधिप्रदाभ्याम्।

बोधप्रदाभ्यां दृढमोक्षदाभ्यां नमो नमः श्रीगुरुपादुकाभ्याम्॥

इत्यादीनि नयवाक्यान्युल्लेखयति शङ्कराचार्यः॥

"वाक्यार्थश्च विचार्यतां श्रुतिशिरः पक्षः समाश्रीयतां

दुस्तर्कात् सुविरम्यतां श्रुतिमतस्तर्कोऽनुसन्धीयताम्।

ब्रह्मास्मीति विभाव्यताम् अहरहर्गर्वः परित्यज्यतां

देहेऽहं मतिरुज्झ्यतां बुधजनैर्वादः परित्यज्यताम्"॥3॥

इत्यनेन श्लोकेन "विद्वज्जने चारजवम्", "दुर्जनः परिहर्तव्यः", "सद्विद्या यदि किं धनैः", "त्यज दुर्जनसंसर्गः", "कथानुरागो मधुरा च वाणी", "दम्भो दर्पोऽभिमानश्च ....पार्थसंपदमासुरीम्", "अहङ्कारं बलं दर्पं दम्बमानमदान्विताः", "मा कुरु धन-जन-यौवनगर्वम्", "तेषां त्वयासने न प्रश्वसितव्यम्", इत्यादिनीतिसारान् प्रतिपादयति शङ्कराचार्यः॥

क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भिक्षौषधं भुज्यतां

स्वाद्वन्नं न तु याच्यतां विधिवशात् प्राप्तेन सन्तुष्यताम्।

शीतोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यतां

औदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम्॥4॥

"मानवानां बुभुक्षाऽनारोग्यादीनि दूरीकर्तव्यानि", "अतुष्टि दाने न भवितव्यं", "अपृष्टो मा (बहु) भाषेत", "मौनिनः कलहो नास्ति", "ज्ञानिनां मौनं बलम्", "अग्निर्जलायते... इति नीतिशतकसुभाषितं", "साधुभिः पूज्यमानोऽपि... इति विवेकचूडामणिप्रोक्तांशः" इत्यादयः अस्मिन् श्लोके शङ्कराचार्येण ध्वनिताः॥ अन्ते च,

एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां

पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम्।

प्राक्कर्म प्रविलिप्यतां चितिबलात् नाप्युत्तरैः श्लिष्यतां

प्रारब्धं त्विह भुज्यताम् अथ परब्रह्मात्मना स्थीयताम्॥5॥[24]

योगी युञ्जीत सततम् आत्मानं रहसि स्थितः। स्थिरबुद्धिरसम्मूढः ब्रह्मविद् ब्रह्मणि स्थितः[25] ॥ इति श्रीमद्भगवद्गीताश्लोकसारः, "ब्रह्म सत्यं जगन्मिथ्या", "कुरु पुण्यमहोरात्रम्", "सञ्चितं पापं विस्मरत", "प्रारब्धमनुभूयताम्", "आगामि मा चिन्त्यतां", "परे ब्रह्मणि लीयताम्" इत्यादीनि अमृतोपमानि वाक्यानि आदिशङ्कराचार्येण प्रोक्तानि यैः शिष्याः मुख्यतया युवकाः, किं बहुना - ये केऽपि वा सिषाधयिषवः सम्यक् प्रेरिताः भवन्तीत्यत्र न कोऽपि संशयोऽस्ति॥

तत्र **सप्तमं** तावत्, एतदतिरिच्य स्तोत्रग्रन्थैश्च युवकेभ्यः सन्मार्गं प्रदर्शयति आचार्यपादः। यतो हि युवकानाम् उत शिष्याणाम् आत्मतत्त्वप्रबोधाय न केवलं विद्याभ्यासता, किन्तु मातृ-पितृ-गुरु-अतिथि-भगवद्भागवत-देवतादीनाम् उपासना अपि आवश्यकीति शङ्कराचार्यः अमन्यत। अतः भजगोविन्दम्, विष्णु-भुजङ्गम्, शिवभुजङ्गम्, ललितापञ्चरत्नम्, मीनाक्षीपञ्चरत्नम्, सौन्दर्यलहरी इत्यादीनि स्तोत्ररत्नानि आचार्यः अरचयत्। तेषु केषाञ्चन स्तोत्राणां कानिचन फलश्रुतिवाक्यानि पश्यामः –

अरोगतामदोषतां सुसाहितीं सुपुत्रतामां

समाहितायुरष्टभूतिमभ्युपैति सोऽचिरात्[26] ॥

विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिम्[27] ॥

भवन्ति ते बुधभाविताश्रयाः[28] ॥

तेनास्य श्रवणात् तदर्थमननात् ध्यानाच्च सङ्कीर्तनात्

सिध्येत् तत् पुनरष्टधा परिणतं चैश्वर्यमव्याहतं[29] ॥

नरस्तोत्रमेतत्पठित्वोरुभक्त्या

सुपुत्रायुरारोग्यमैश्वर्यमेति[30] ॥

---

[24] साधनापञ्चकम् 1-5

[25] श्री. भ. गी. IV-10

[26] गणेश.पञ्च-6

[27] ल.पञ्च-6

[28] कनक.स्तो-22

[29] द.मू.स्तो-10

[30] शि.भुज-40

स मोहं विहायाशु युष्मत्प्रसादात्

समाश्रित्ययोगं व्रजत्यच्युतं त्वाम्[31] *॥*

गभीराभिर्वाग्भिर्विदधति सभां रञ्जनमयीं[32] *॥*

वचोभिर्वाग्देवी वदनकमलामोदमधुरैः[33] *॥*

प्रकृत्या मूकानामपि च कविता कारणतया

कदा धत्ते वाणीमुखकमलताम्बूलरसताम्[34] *॥*

समापनम्

एवं बहुधा, भाष्यग्रन्थैः प्रकरणग्रन्थैः स्तोत्रग्रन्थैश्च आदिशङ्कराचार्यः युवकेभ्यः शिष्येभ्यः साधकेभ्यश्च एतस्मात् संसारात् उज्जीवनार्थं मार्गं प्रदर्श्य मानवान् च अस्मान् सर्वान् अनुगृह्य स्वयमपि परब्रह्मणा अनुगृहीतोऽभवत्। अत एव एष आचार्यः,

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम्।

नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

इति सर्वैः स्तूयमानः प्रणम्यमानः सर्वदा यशःकायेन विलसति॥

****

<u>उपयुक्तग्रन्थसूची</u>

1. Upadesa Sahasri, V.S Gopala Krishna Iyer,
Ramayana Publishing House,
First Edition, 1971,
Chennai - 600 004

2. विवेकचूडामणिः, शृङ्गगिरि पीठाधीशः श्रीचन्द्रशेखरभारती,
भारतीय विद्याभवनम्,
प्रथमसंस्करणम्, 1973,
मुम्बई,

---

[31] वि.भुज-14

[32] सौ.ल-16

[33] सौ.ल-17

[34] सौ.ल-98

3. Soundarya Lahari, K.K. Subramaniyan,
Moti Lal Banarasi Dass,
First Edition, 1977,
Delhi.

4. https://sanskritdocuments.org/sanskrit/shankaracharya/

5. http://www.vedasforlife.org/dakshinamurthy.html

****

Author's Detail

Name	:	**DR.V.SOWMYANARAYANAN**
Designation	:	Assistant Professor & Head, Department of Sanskrit
Address	:	Dwaraka Doss Goverdhan Doss Vaishnav college, Arumbakkam, Chennai – 106

Email Id anusowmyan@gmail.com

CC BY

उपनिषत्कालिकशिक्षापद्धतेरनुचिन्तनम्

- डा. सत्येन्दु शर्मा

(शोधसारः – उपनिषदः संसारस्य सर्वस्वीकृताः श्रेष्ठग्रन्थाः सन्ति । एतासु शिक्षाविषयकाणि वस्तूनि बाहुल्येन वर्तन्ते । अत्र शिष्याचार्ययोः पारम्परिकं शिक्षणमपि वर्णितमस्तिसामान्यानां पारम्परिकेतरं मुक्तशिक्षणं च । , शोधालेखेऽस्मिन्नुपनिषत्सु निरूपितानि शिक्षाविषयकाणि वस्तूनि समालम्ब्य तात्कालिक्याः शिक्षापद्धतेरनुचिन्तनं करिष्यते ।)

****

शिक्षायाः प्रयोजनम् - उपनिषत्काले शिक्षणस्य विषयेषु प्रमुखतया चत्वारो वेदाः, वेदाङ्गानि, पुराणानि, गणित-तर्क-नीति-निधि-नक्षत्र-नृत्य-संगीतादिविद्याः प्रचलिता[1] ,आसन् परन्तु शिक्षायाः परमप्रयोजनं ब्रह्मज्ञानमेवासीत् । तस्मादेव मुण्डकोपनिषदि शिक्षाकल्पादीनि अन्यानि सर्वाणि अपराविद्येति ब्रह्मज्ञानं च परा विद्येत्युक्ता -"परा यया तदक्षरमधिगम्यते"[2] । याज्ञवल्क्येन च महर्षिणोच्यते मैत्रेयी यद् ब्रह्मज्ञानेनैव सर्वं विदितं भवतीति -

"आत्मा वै अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम् ।" [3]

ऋग्वेदादीनां विविधविद्यानां ज्ञाता नारदोऽपि ब्रह्मज्ञानं जिज्ञासमानः सनत्कुमारं वदति यदहं मन्त्रविदेवास्मि तस्मान्मां शोकस्य पारं तारयतु ।[4] ,न त्वात्मविदिति । तरति शोकमात्मविदिति ,

शिक्षाकेन्द्रं गुरुकुलम् -उपनिषत्काले शिक्षायाः नियतकेन्द्रं मुख्यत्वेन गुरुकुलमेवासीद्यत्र प्रायशः , [5] द्वादशवर्षाणि विद्यार्थिनः तिष्ठन्ति स्म । शिक्षाग्रहणकाले प्रथमाश्रमस्य ब्रह्मचर्यस्यापेक्षितत्वात् ब्रह्मचर्यं गुरुकुलस्य पर्यायत्वेन प्रयुज्यते स्म । यथा आरुणिना पुत्रः श्वेतकेतुरुच्यते यातुमध्ययनार्थं गुरुकुलम् - "श्वेतकेतो वस ब्रह्मचर्यम् ।" [6]

1

2 मुण्डकोपनिषद् 1.1.5 -

3 बृहदारण्यकोपनिषद् 2.4.5 -

4 छान्दोग्योपनिषद् 7.1.3 -

5 छान्दोग्योपनिषद् 6.1.2 -

6 छान्दोग्योपनिषद् 6.1.1 -

तथैव सत्यकामो जाबालो हारिद्रुमतं गौतममेत्य शिक्षार्थं गुरुकुलवासाय दृश्यते निवेदयन् -"ब्रह्मचर्यं भगवति वत्स्याम्युपेयां भगवन्तमिति ।"[7] सुकेशादयश्चापि ब्रह्मचारिणः पिप्पलादस्याश्रमं सश्रद्धं संवत्सरमुषित्वा यथेष्टज्ञानमलभन्त ।

गुरुकुलेषु नैतिकशिक्षणम्गुरुकुलानां दायित्वं यथानिश्चितं शिक्षणमात्रमेव नासीत् । शिष्याणां -जीवनेऽधीतविद्यानां समाचरणं समुद्दिश्य गुरवः शिक्षानन्तरं सत्यभाषणधर्माचरणादीनामुपदेशं कुर्वन्ति स्म - "सत्यं वद । धर्मं चर । एतदनुशासनम् । ------ मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । -----" [8] एवम्प्रकारेण शास्त्रशिक्षणेन सह नैतिकशिक्षणमुपनिषत्कालस्य गुरुकुलानां वैशिष्ट्यमासीत् ।

गुरुशिष्यसम्बन्धः -उपनिषत्काले गुरुकुले उषित्वा शिष्याणामध्ययनं सम्पद्यते स्म । स्वभावतः शिष्येषु गुरुजनानां वात्सल्यं भवति स्म । गुरुशिष्यौ अन्योऽन्यौ कल्याणकामिनौ दृश्येते । तौ युगपदेव उभयोः माङ्गल्यं प्रार्थयतः -"सह नौ यशः । सह नौ ब्रह्मवर्चसम् ।" [9]

गुरुकुलेतरं शिक्षणम् - गुरुकुलानि तात्कालिकस्य समाजस्य पारम्परिकशिक्षणं निर्वहन्ति स्मपरञ्च , लिङ्गादीनां -वृत्ति-परम्परेतरस्य मुक्तशिक्षणस्यापि द्वाराणि नैवावृतानि आसन् । एतस्मिन् च मुक्तशिक्षणे वयो बन्धनं नासीत् । तस्माद् गुरुकुलेभ्योऽन्यत्रापि सामयिकं दैशिकं वा शिक्षणं सम्पद्यते स्म । यथा कारणान्तरगतो नचिकेता यमराजेनात्मविद्यां विदितवान् नारदः सनत्कुमारेण च । ,मैत्रेयी याज्ञवल्क्येन ,

मानवेतरं शिक्षणम् -मानवेतरैः पात्रैरपि शिक्षणसम्पादनमुपनिषत्सु वर्णितमस्ति । यथा सत्यकामाय जाबालाय वृषभोऽग्निर्हंसो मद्गुश्चोपदिशन्ति [10],तथैव उपकोसलायाग्नयो ब्रुवन्ति ।[11]

शिष्याचारः -कश्चिज्जिज्ञासुः शिष्यः ज्ञानाय समित्पाणिर्ब्रह्मनिष्ठं गुरुमभिगच्छति स्म । गुरुश्चोपगतस्य तस्य शान्तचित्तस्य शिष्यस्योपनयनं विधाय तत्त्वतो ब्रह्मविद्यामुपदिशति स्म । यथा सुकेशादयः हस्ते समिद्भारं गृहीत्वा पिप्पलादमाचार्यमुपगताः । सत्यकामः जाबालः रिक्तहस्त एव हारिद्रुमतमुपागच्छत्। कदाचित् स्वकीयगोत्रापरिचयकारणाद् अस्वीकारमाशङ्क्य स एवमकरोत् । किन्तु शिक्षयितुमुद्यतः गुरुः तत्कालमेव तमुपनेतुं समिदाहरणायादिशत् । [12]

---

[7] छान्दोग्योपनिषद् 4.4.3 -

[8] तैत्तिरीयोपनिषद् 4-1.11.1 -

[9] तैत्तिरीयोपनिषद् 3.1 -

[10] छान्दोग्योपनिषद् 4.5.8 -

[11] छान्दोग्योपनिषद् 4.10 -. .14

[12] "समिधं सोम्याहरोप त्वा नेष्ये ।" छान्दोग्योपनिषद् 4.10.14 -

वस्तुतः समित्पाणेः शिष्यस्य गुरुं समया गमनं साभिप्रायं प्रतीयते । गुरुणादिष्टः शिष्यः होमादिकर्माणि सम्पाद्याचिरादेव उपनीतो भवति स्म । यथाग्निना संगता समित् तत्क्षणं प्रज्वलतितथैव , गुरुगतो जिज्ञासुरुपदेशं ग्रहीतुं सर्वथा समर्पितं पात्रमिति लक्षणं चानुमातुं शक्यते ।

शिष्यस्य पात्रतापरीक्षणम् -उपनिषत्काले ब्रह्मज्ञानं यस्मै कस्मैचिदपि नासीत् । असत्यकपटकौटिल्येभ्यो रहित एव पुरुषो ब्रह्मज्ञानस्य पात्रं मन्यते स्म -"तेषामसौ विरजो ब्रह्मलोको न येषु जिह्ममनृतं न माया चेति ।" [13] कर्मानुष्ठानरतः श्रोत्रिय एव ब्रह्मज्ञानस्य अधिकारी मतः -

क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः
स्वयं जुह्वत एकर्षिं श्रद्धयन्तः ।
तेषामेवैषां ब्रह्मविद्यां वदेत
शिरोव्रतं विधिवद्यैस्तु चीर्णम् ।। [14]

शौनकनामको महागृहस्थोऽङ्गिरसमृषिमुपगम्य विधिवत् ब्रह्मविषयकं प्रश्नमपृच्छत् । तस्य विधिपालनात् सन्तुष्टेनाङ्गिरसेन सोऽनुशिष्टः । [15]

तथैव यमराजेन दत्तवरो नचिकेता यदात्मतत्त्वमपृच्छत् तदा यमराजः आत्मज्ञानस्य विषयं देवताभ्योऽपि कठिनं संशयात्मकं चोक्त्वा सर्वविधानि दुर्लभानि सुखैश्वर्याणि याचितुमवदत् -

इमा रामाः सरथाः सतूर्या
न हीदृशा लभ्यनीया मनुष्यैः ।
आभिर्मत्प्रत्ताभिः परिचारयस्व
नचिकेतो मरणं मानुप्राक्षीः ।। [16]

परन्तु नचिकेता सर्वविधं प्रलोभनं तिरस्कुर्वन् आत्मतत्त्वमेवापृच्छत् तदा पात्रौत्कृष्ट्यं सुविज्ञाय प्रीतो यमराजः तस्मै आत्मज्ञानमुपादिशत् ।

सत्यकामस्य जाबालस्य सत्यभाषणात् प्रसन्नः संतृप्तश्चापि आचार्यो हारिद्रुमतो गौतमः तमुपनीय पात्रतां पुनश्च परीक्षितुं गोचारणायादिशत् । [17]

---

[13] प्रश्नोपनिषद् 1.1.16-

[14] मुण्डकोपनिषद् 3.2.10 -

[15] शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ । कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति । मुण्डकोपनिषद् - 1.1.3

[16] कठोपनिषद् 1.1.25 -

प्रष्टुकामाः सुकेशादयः षड् जना यदा ज्ञानेच्छया पिप्पलादमुपगताः तदा ते पात्रपरीक्षणार्थमेव संवत्सरपर्यन्तं नियमपालनायोक्ताः -

"तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान् पृच्छथ ।" [18]

वरुण उपागतं ब्रह्मजिज्ञासुं स्वपुत्रं भृगुं तपसे उपादिशत् -"तपसा ब्रह्म विजानीहि । तपो ब्रह्मेति तपसा - ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति ।" [19]

शिक्षाक्षेत्रे निरभिमानिता - पाञ्चालानां समितिं गतः श्वेतकेतुः प्रवाहणेन पृष्टः -'किं त्वं पित्रानुशिष्टः ?'। स उवाच -'ओमिति' । परन्तु स पृष्टानां पञ्चप्रश्नानामुत्तराणि वक्तुं नाशक्नोत् । तदा प्रवाहणेनोक्तं यदजानता त्वया कथमुक्तम् -'पित्राऽनुशिष्टोऽहमिति ' ।

श्वेतकेतुः पितरं गत्वा सर्वमेतद् वृत्तं न्यवेदयत् । पिताऽवदत् त्वयोक्तानां प्रश्नानामेकमप्युत्तरं न वेद इति । - तत्पश्चात् पिता स्वयं गत्वोक्तप्रश्नानामुत्तराण्यजानात् । अनेनाख्यानेन तात्कालिकसमाजे वृथाभिमानस्य स्थाने [20] यथार्थज्ञानं प्रति समादरः संसूच्यते ।

महागृहस्था महाश्रोत्रियाश्च प्राचीनशालः सत्ययज्ञ इन्द्रद्युम्नो जनो बुडिलश्च ब्रह्मात्मविषयकं विमर्शमारब्धवन्तः । ते सर्वे च उद्दालकमात्मज्ञानिनं मन्यमानाः तमुपागच्छन् । उद्दालकश्चात्मानं सम्यक् प्रतिपादनेऽशक्यं मत्वा तानवोचत् वयं तत्रैवाभिगच्छेम । ,अश्वपतिः विजानाति - तदा सर्वैः सह गत उद्दालकोऽपि अश्वपतिना विद्यामश्रृणोत् । [21] अनेनाख्यानेनाप्युपनिषत्कालीनेषु विद्वत्सु अहंकारस्याभावो परिलक्ष्यते ।

द्वादशवर्षपर्यन्तं सर्वान् वेदानधीत्य गृहं प्रत्यागतस्य श्वेतकेतोर्ज्ञानाभिमानं संदृश्य पिता आरुणिः पृष्टवान् -'किं त्वं गुरुणादिष्टः येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति ?'

श्वेतकेतुनोक्तम् –'तत्तु गुरुणा नादिष्टम् । भवान् एव वदतु ।'

तदा पिता पुत्राय सविस्तरं दृष्टान्तपूर्वकं ब्रह्मज्ञानमुपादिशत् । [22]

---

[17] छान्दोग्योपनिषद् 4.4.5 -

[18] प्रश्नोपनिषद् 1.1.2 -

[19] तैत्तिरीयोपनिषद् 3.2.1 -

[20] छान्दोग्योपनिषद् 7-5.3.1 -

[21] छान्दोग्योपनिषद् 7-5.11.1 -

[22] छान्दोग्योपनिषद् 7-1-1-6 -

CC BY

न सर्वे गुरवः सर्वज्ञा आसन् । वेदनिष्णातोऽपि श्वेतकेतोर्गुरुरनभिज्ञत्वात् तस्मै ब्रह्मज्ञानं नादिशत् श्वेतकेतुनोऽपात्रत्वाद् वा ।

स्त्रीशिक्षाउपनिषत्काले शिक्षायै कश्चिल्लिङ्गभेदो नासीत् । शिक्षणाय स्त्रियः स्वतन्त्रा आसन् । -[23] केनोपनिषदि इन्द्रमुपदिशन्ती उमा हैमवती वर्णिता । बृहदारण्यकोपनिषदि च मैत्रेयीगार्ग्यौ दृश्येते । गार्गी महर्षिणा याज्ञवल्क्येन गूढशास्त्रार्थं करोतिमैत्रेयी च भोगसाधनं परित्यज्यामृतमङ्गीकरोति । तस्मादेव मैत्रेयी ,[24] ब्रह्मवादिनी उक्ता गार्गी च स्त्रीप्रज्ञोचिता ।

****

Author's Detail

Name	:	**DR. SATYENDU SHARMA**
Designation	:	विभागाध्यक्ष/ सहायक प्राध्यापकसंस्कृत ,
Address	:	शासकीय संस्कृत स्नातकोत्तर महाविद्यालय, रायपुरछत्तीसगढ ,
Email Id	:	sadanishkam@gmail.com

---

[23] केनोपनिषद् 3.12 -

[24] बृहदारण्यकोपनिषद् 4.5.1 -

प्राची प्रज्ञा (ISSN 2348-8417) The peer reviewed Referred E-Journal in Sanskrit, Indexed in DOAJ
https://sites.google.com/site/praachiprajnaa

कालप्रवाहे वैष्णवधर्मस्य गतिर्विस्तृतिश्च

- शिवनाथ सरदारः

शोधसारः

ज्ञानं भक्तिः च मिलित्वा स्वातन्त्र्येण वा भूम्नो लाभे साधनरूपः। कालभेदेन देशभेदेन सम्प्रदायभेदेन च मनुष्या उपनिषत्प्रदर्शितं भूमानं प्राप्तुं यतितवन्तः। ज्ञानमार्गः भक्तिमार्गश्च तेषामवलम्बनरूपौ। उपनिषत्प्रदर्शितं भूमानन्दं लब्धुं मनुष्याणां प्रयत्नाः ज्ञानवृत्तिं भक्तिवृत्तिं चावलम्ब्यैव स्रोतस्विन्यौ इव प्रवहमानाः। द्वे भिन्ने नद्यौ इव प्रवाहमानयोः ज्ञानभक्तिमार्गयोः समन्वयसाधको हि भारतीयसनातन-वैष्णवधर्मः। भूमलाभोऽमृतलाभो वा वैष्णवधर्मस्य साध्यरूपः। वेद-संहिता-ब्राह्मण-उपनिषद्-धर्मसूत्र-धर्मसंहिता-इतिहास-पुराणादिषु आर्यग्रन्थेषु सनातनवैष्णवधर्मस्य एक अविच्छिन्नः प्रवाहः अविरामगत्या कदाचिद् सूक्ष्मतया कदाचिद्वा व्यक्ततया भूमानन्दरसरूपं महासमुद्रं प्रति धावति। अविच्छिन्नमिदं प्रवाहं प्रति दृष्टिनिक्षेपस्तु भारतीयसनातनवैष्णवधर्मस्यानुशीलनकारिणः अवश्यकर्तव्यः। अन्यथा वैष्णवधर्मस्य तत्त्वबुभूत्सा विडम्वनामात्रमिव प्रतिभाति नराणां सकाशे।संहितोपनिषद्युगाभ्यां पञ्चदशखीष्टाब्दपर्यन्तं श्रुतिमूलकस्यास्य विश्वजनीनस्य सनातनवैष्णवधर्मस्य बाह्याकारस्य आचाराणां व्यवहाराणां च बहु परिवर्तनमस्माकं दृक्पथमायाति।वेदमूलकोऽयं वैष्णवधर्मः। धर्मस्यास्य प्रधानावलम्बनमार्गो हि भक्तिमार्गः।वैदिकयुगादारभ्य पञ्चदशशताब्दीं यावत् प्रवहन्त्या अस्या वैष्णवधर्मपरम्पराया गतिः कदाचिन्मन्दीभूता कदाचिच्च क्षीणतां प्राप्ता, परन्तु यदैव धर्मात्मनां महात्मनां सान्निध्यमवाप तदैव वैष्णवधर्मप्रवाहः स्वकीयेन माहात्म्येनैव प्रचारितः प्रसारितश्च बभूव इत्यस्ति मम प्रबन्धस्यास्य विषयसारः।

कूटशब्दाः– भूमा, आऴ्वार्, ज्ञानम्, भक्तिः, वैष्णवः

****

मूलप्रबन्धः

छान्दोग्योपनिषदि सुखस्वरूपजिज्ञासुं नारदं प्रत्युत्तरयति सनत्कुमारः –

“यो वै भूमा तत्सुखं, नाल्पे सुखमस्ति, भूमैव सुखं, भूमा त्वेव विजिज्ञासितव्यः”[1] इति।

अनन्तरं भूमस्वरूपोऽपि तेन निर्दिष्टः –

“यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति, स भूमा। अथ यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पं, यो वै भूमा तदमृतमथो यदल्पं तन्मर्त्यम्”[2] इति।

---

[1] छान्दोग्योपनिषद् ७/२३/१

cc BY

अर्थात् यत्रान्यत्किमपि न दृश्यते किमपि न श्रूयते अन्यस्य च वस्तुनो ज्ञानमपि यत्र लुप्यते स एव भूमा। स भूमा भारतीयाध्यात्मशास्त्रेषु अमृतमित्यभिधीयते। श्रुतिनिर्दिष्टस्य भूम्नः अमृतस्य वा लाभः कथं सम्भवेदिति जिज्ञासा एव भारतीयाध्यात्मशास्त्राणां मूला प्रेरणा। अमृतस्य लाभे तत्र साधनानि भवन्ति कर्म, ज्ञानं, भक्तिः च। परन्तु ज्ञानहीनेन भक्तिहीनेन च कर्मणा भूमा न लभ्यते। सिद्धान्तोऽयमध्यात्मशास्त्रेषु पूर्वं निर्धारितः। आम्नातं च श्रुतौ – "प्लवा ह्येते- अदृढायज्ञरूपाः" इति।

अर्थात् त्रितापशङ्कुलस्य भावसमुद्रस्य तीरे गमनार्थं यज्ञरूपाः विहितकर्मरूपा वा प्लवाः न खलु दृढाः उपयुक्ताः च। ज्ञानं भक्तिः च मिलित्वा स्वातन्त्र्येण वा भूम्नो लाभे साधनरूपे। कालभेदेन देशभेदेन सम्प्रदायभेदेन च मनुष्या उपनिषत्प्रदर्शितं भूमानं प्राप्तुं यतितवन्तः। ज्ञानमार्गः भक्तिमार्गश्च तेषामवलम्बनरूपौ। उपनिषत्प्रदर्शितं भूमानन्दं लब्धुं मनुष्याणां प्रयत्नाः ज्ञानवृत्तिं भक्तिवृत्तिं चावलम्ब्यैव स्रोतस्विन्यौ इव प्रवहमानाः। द्वे भिन्ने नद्यौ इव प्रवाहमानयोः ज्ञानभक्तिमार्गयोः समन्वयसाधको हि भारतीयसनातनवैष्णवधर्मः। भूमलाभोऽमृतलाभो वा वैष्णवधर्मस्य साधनरूपः। अतृप्तिः सुखानुभूतिः आकाङ्क्षा च धर्मस्यास्य मौलिकोपादानानि। वैष्णवसाधनान्तर्गताः ज्ञानकर्मभक्तय एतेषाम् अतृप्तेः सुखानुभूतेः आकाङ्क्षायाः च अभिव्यञ्जनानि साधनावस्थाः वा। अतृप्तिमयास्वादमयाकाङ्क्षाणां विषयभूतस्य भूम्नः सपरिकरं सेवार्थं भारतीयमानवात्मनः या व्याकुलाकाङ्क्षा दरीदृष्टा सा एव ऋग्वेदसंहितायाः विष्णुसूक्ते प्रथमतया परिलक्ष्यते। यथा- "त्वं विष्णो सुमतिं विश्वजन्याम्"[3] इति।

प्राणिनां सुखसम्पादनाय श्रीभगवतः सन्निकटे एतादृशी प्रार्थना वैष्णवभावान्तर्गतायाः विश्वजनीन्यायाः प्रीतेः अभिव्यक्तिः। ज्ञानमुखिप्रेरणायाः भावमुखिप्रेरणायाः च समन्वयसाधनं तु आवश्यकम्। स्वीयसत्तायाः स्वातन्त्र्यरक्षणपुरःसरं द्विविधयोः प्रेरणयोः परस्परोन्नयनार्थं परस्परानुकूल्यं न साध्यते चेत् मनुष्यजीवनस्य पूर्णता तथा चरितार्थता न सम्भवति। एतादृशायाः चरितार्थतायाः लाभे उपायभूतः साधनरूपो वा भवति भारतीयवैष्णवधर्मः। वेद-संहिता-ब्राह्मण-उपनिषद्-धर्मसूत्र-धर्मसंहिता-इतिहास-पुराणादिषु आर्यग्रन्थेषु सनातनवैष्णवधर्मस्य एक अविच्छिन्नः प्रवाहः अविरामगत्या कदाचित् सूक्ष्मतया कदाचिद्वा व्यक्ततया भूमानन्दरसरूपं महासमुद्रं प्रति धावति। अविच्छिन्नमिदं प्रवाहं प्रति दृष्टिनिक्षेपस्तु भारतीयसनातनवैष्णवधर्मस्यानुशीलनकारिणः अवश्यकर्तव्यः। अन्यथा वैष्णवधर्मस्य तत्त्वबुभूत्सा विडम्वनामात्रमिव प्रतिभाति नराणां सकाशे। अतोऽधुना अधस्तात् विषयेऽस्मिन् यथासाध्यं किञ्चित् दिङ्मात्रनिर्देशं क्रियते।

---

[2] छान्दोग्योपनिषद् ७/२४/१

[3] ऋग्वेदसंहिता ७/१००/२

संहितोपनिषद्युगाभ्यां पञ्चदशख्रीष्टाब्दपर्यन्तं श्रुतिमूलकस्यास्य विश्वजनीनस्य सनातनवैष्णवधर्मस्य बाह्याकारस्य आचाराणां व्यवहाराणां च बहु परिवर्तनमस्माकं दृक्पथमायाति। माला-तिलक-तप्तमुद्रा-एकादशीव्रतव्यवस्था-आहार्यवस्तुविवेक-तिथ्युत्कर्षापकर्षविचार-दीक्षागुरु-शिक्षागुरु-सन्न्यास-गार्हस्थ्य-साधक-साधिका इत्यादिविषयमवलम्ब्य विचित्रमतभेदाः विवादाः विभिन्नानि प्रस्थानानि च वैष्णवधर्ममेवाश्रित्य विकासितान्यभुन्। एकस्यैव दैवतस्य नामभेदानि मूर्तिभेदानि चाश्रित्य वैष्णवानां मध्येऽपि सम्प्रदायभेदा दृश्यन्ते। भगवतो विष्णोः बहवः नामभेदा मूर्तिभेदाश्च वैष्णवसम्प्रदायेषु प्रवर्तन्ते। महाभारतस्य युगे नारायण आसीत् वैष्णवानामुपास्यदेवता। नारायणश्चतुर्भुजः, तस्य चतुर्षु हस्तेषु शङ्ख-चक्र-गदा-पद्मानामवस्थितिः। परन्तु कस्मिन् हस्ते कस्यावस्थितिः एतन्न निर्दिष्टम्। हस्तभेदेषु एतेषामवस्थानभेदानाश्रित्यैवोपासकभेदेन भगवतो नारायणस्यापि नाम-रूप-उपासनाविधिनां पार्थक्यं दृश्यते स्म। यथा केशवः जनार्दनः त्रिविक्रमः दामोदरः प्रभृतयः। एते एव भगवतः नारायणस्य मूर्तिभेदाः। एतान् विहाय विविधाः अवतारभेदा अपि सन्ति। असंख्येयेषु भगवदवतारेषु प्रसिद्धास्तावद् दशावताराः। ते यथा मत्स्यः, कूर्मः, वराहः, नृसिंहः, वामनः, परशुरामः, रामः, वलरामः, बुद्धः, कल्की च। एतेषामवताराणां मूर्तिभेदान ध्यानभेदान् चावलम्ब्य बहवः सम्प्रदायाः प्रतिष्ठिताः। सम्प्रदायभेदेन एते बहुमुखिनः विभिन्नाः च उपासनाः साधनप्रणाल्यः वा वैष्णवधर्मस्य बाह्यरूपाः। परन्तु धर्मस्यास्य आभ्यन्तरीणः सनातनो वा यद्रूपः स तु प्राचीनकालतः अद्यावधि अपरिवर्तितः। ज्ञानप्रेरणायाः भावप्रेरणायाः च परस्परानुकूल्यसम्पादनमाध्यमेन परिपूर्णमानवताप्राप्तिः तस्याभीष्टा।

वेदमूलकोऽयं वैष्णवधर्मः। धर्मस्यास्य प्रधानावलम्बनमार्गो हि भक्तिमार्गः। भगवतो विष्णोः उपासनायाः वर्णनं प्राप्यते ऋग्वेदसंहितायाः बहुषु सूक्तेषु। विष्णोः स्तुतिः यत्र यत्र वर्ण्यते तेषु आदिमं प्रमाणं तावद् इयं संहिता। स्तुतिविषयकाः केचन मन्त्राः संहिताया उद्ध्रियते -

तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्त्तन।
आस्य जानन्तो नाम चिद्विवक्तन् महस्ते विष्णो सुमतिं भजामहे।।[4]

पुमर्त्तोदयते सनिष्यन् यो विष्णव उरुगायाय दाशत्।
प्रयः सप्राचा मनसा जात एतावन्तं नर्य्यं मा विवासात्।।
त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतमेवयावो मतिं दाः।
पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः।।[5]

---

[4] ऋग्वेदसंहिता १/१५६/३

[5] ऋग्वेदसंहिता ७.१००.२

CC BY

त्रिदेवः पृथिवीमेष एतां विचक्रमे शतर्चसं महित्वा।

प्रविष्णुरस्तु तवसस्तवीयान् त्वेषं ह्यस्य स्थविरस्य नाम।।[6] इति।

एवंविधाः बहवः मन्त्राः ऋक्संहितायां भूयो दृश्यन्ते। उदाहरणत्वेनात्र तेषु केचन मन्त्रा उद्धृताः। उद्धृतेषु एतेषु मन्त्रेषु वैष्णवधर्मान्तर्निहितः अपरिवर्तनीयः स्वरूपः सुष्ठु प्रकाशितः। मन्त्रादिषु विश्वजनीनं मङ्गलं विधानशक्या सुमतिः यथा स्यात्, आर्तजनानां सुखं सम्पादयितुं धनप्राचुर्यमपि यथा स्यात् तदर्थं प्रार्थना विधीयते। भगवतो नामकीर्तनेनैव श्रीविष्णोः साक्षाद्दर्शनं यथा सम्भवति तद्वत् कृपालाभोऽपि सम्भवति। उल्लिखितेषु एतेषु मन्त्रेषु या वैष्णवसाधकोचिता मनोवृत्तिः प्रकाश्यते तामेवाश्रित्य वैष्णवसाधना अतिप्राचीनकालतः अद्यावधि अस्मिन्भारतवर्षे सम्यक् विराजते।

उपनिषदः उपासनाकाण्डे श्रीमद्भगवद्गीतायां च वैष्णवधर्मस्यावस्थानं दृश्यते। शमप्राधान्ययुक्तस्य ज्ञानस्य भावस्य च परस्परसन्निवेशेन यदद्वयतत्त्वं स्वतः स्फुरति तत्तु साधकानां दृष्टिभेदवशात् ब्रह्मरूपेण परमात्मरूपेण भगवद्रूपेण वा अभिधत्ते। भारतीयभक्तिशास्त्रस्य तथा वैष्णवधर्मस्य चरमसिद्धान्तोऽयं भगवता श्रीकृष्णेन श्रीमद्भवद्गीतायामर्जुनं प्रति उपदिष्टः-

अहङ्कारं बलं दर्पं कामं क्रोधं परिग्रहम्।

विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते।।

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।

शमः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्।।

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।

ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।।[7] इति।

अनन्तरं श्रौतवैष्णवधर्मोऽयं महाभारतस्य युगे पाञ्चरात्रिकसात्त्वतधर्मः भागवतधर्मो वेति नाम्ना प्रसिद्धिं गतः। वासुदेवः कृष्ण आसीत् तेषामुपास्यदेवता। आगमशास्त्राणां पञ्चरात्रशास्त्राणां वा प्रचारो तदाभवत्। उपासना-ध्यान-दीक्षा-संस्कारपुनश्चरणैः सह अस्मिन् पाञ्चरात्रयुगे मन्दिरनिर्माणेन प्रासादनिर्माणेन देवमूर्तिप्रतिष्ठामाध्यमेन पूजकनियोगादिना वैष्णवधर्मोऽयं प्रचारितो बभूव। परिवर्तनशीलेऽस्मिन् युगेऽपि नामकीर्तनं परार्थे स्वार्थत्यागः सार्वजनीनकरुणा चेत्यादीनि वैष्णवधर्मस्य मूलवैशिष्ट्यानि अपरिवर्तितानि आसन्।

---

[6] ऋग्वेदसंहिता ७/१००/३

[7] श्रीमद्भगवद्गीता- १८/५३-५५

अनन्तरं कर्ममार्गप्रवणस्य पूर्वमीमांसाशास्त्रस्य ज्ञानमार्गप्रवणानां न्यायवैशेषिकसांख्ययोगाद्वैत-वेदान्तप्रमुखानां दार्शनिकप्रस्थानानां नीतिप्रधानस्य बौद्धधर्मस्य जैनधर्मस्य च उद्भवेन भारतवर्षे भक्तिसाधना किञ्चित् स्थगिता। अर्थात् सनातनवैष्णवधर्मस्य प्रसारगतिः तदा क्षीणा जाता, परन्तु न पूर्णरूपेण स्तब्धाऽभूत्। वैदिककर्मानुष्ठानैः निःश्रेयसलाभे वित्तशालिमानवाः भवन्ति पारङ्गमाः, अनुरूपतया ज्ञानस्य दुर्गममार्गानुसरणं तु निम्नस्तरीयाणां मनुष्याणां कृतेऽसम्भवम्। अतः वित्तहीनानाम् अशिक्षितानां प्राकृतजनानां समीपे ज्ञानकर्ममार्गयोः द्वारं यदा रुद्धः स्यात् तदा ते अवैदिकं नीतिप्रधानं बौद्धधर्ममतं जैनधर्ममतं च आश्रितवन्तः। किन्तु एतयोः धर्ममतयोः अपि प्रारम्भिकपर्वणि भक्तिः उपासना वा नाद्रिता धर्मगुरुभिः। अतः चित्तप्रशान्तिमन्विष्यमाणाः अधिकांशाः मानवाः तदा ज्ञानकर्मनीतिमार्गेषु चित्तप्रशान्तिं न प्राप्तवन्तः। ते मानसिकेन शून्यताबोधेन चित्तदैन्येन अज्ञतया तज्जनितेन च औदासीन्येन तदाभिभूता आसन्। भक्तेः प्राणमयस्य प्रवाहस्य सञ्जीवन्याः धारायाः स्पर्शेनैव मानसिकशुष्कतावसादैः तेषामुद्धरणसम्भावना स्यात्। आध्यात्मिकसङ्कटस्य अस्मिन् युगे दाक्षिणात्यालवारसम्प्रदायस्य उद्भवः वैष्णवधर्मस्य इतिहासे एकमुल्लेखयोग्यं वृत्तम्। दाक्षिणात्त्यालवारसम्प्रदायस्यैव प्रयासेन भक्तिसाधनायाः म्रियमाणा धारा पुनरुद्धरिता बभूव। यद्यपि वैदिकयुगस्य भक्तिसाधनायाः सम्प्रदायस्यास्य भक्तिसाधना बहु भिद्यते, तथापि एतत्तु अवश्यमेव वक्तुं शक्यते यत् वैष्णवधर्मः अस्मिन् युगे पुनः प्रवलां गतिं प्राप्य खरस्रोता नदीव प्रवहमानासीत्। सम्प्रदायस्यास्य प्रभावेन द्रविडदेशे वैष्णवधर्मस्य प्रभूतः प्रसारः अभवत्। विषयेऽस्मिन् श्रीमद्भागवतमहापुराणस्य केचन श्लोकाः प्रासङ्गिकाः –

कृतादिषु प्रजा राजन् कलाविच्छन्ति सम्भवम्।
कलौ खलु भविष्यन्ति नारायणपरायणः।।
क्वचित् क्वचिन्महाराज द्रविडेषु च भूरिशः।
ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी।।
कावेरी च महापुण्या प्रतीची च महानदी।
ये पिबन्ति जलं तासां मनुजा मनुजेश्वरः।।
प्रायभक्ता भगवति वासुदेवेऽमलाशयाः।।[8] इति।

वासुदेवः श्रीकृष्णः सम्प्रदायस्यास्य उपास्यदेवता। वासुदेवस्य वामपार्श्वे लक्ष्मीमूर्तेः पूजनं तैः बहु प्रचारितम्। सम्प्रदायस्यास्य प्रसिद्धाः द्वादशाचार्यास्तावत् सारयोगी, भूतयोगी, महद्योगी, भक्तिसारः, शठारिः,

---

[8] श्रीमद्भागवतमहापुराणम् ११/५/३८-४०

CC BY

मधुरकविः, कुलशेखरः, विष्णुचित्तः, गोदा, भक्ताङ्घ्रिरेणुः, योगिवाहनाः, परकालश्चेति। आलवाराचार्याणां द्रमिरोपनिषद् द्राविडाम्नायनामको वा वैष्णवसिद्धान्तात्मकग्रन्थः तामिलभाषायां विरचितः। तन्मध्ये शठारेः आलवारस्य विरचितः अंशः द्राविडसामवेदनाम्ना प्रसिद्धः। वैष्णवधर्मस्य प्रचारे ग्रन्थोऽयं कीदृश उपयोगी के के च विषयाः अस्मिन् ग्रन्थे आलोचिता इत्येतेषां सर्वेषां वर्णना प्राप्यते अभिरामवराचार्यस्य द्रविडोपनिषत्तात्पर्यमिति ग्रन्थे। शठारिमहाभागेन स्वकृते ग्रन्थे स्वानुभूता नैकाभावप्रवाहयुक्ता उक्तयो निबद्धाः।परन्तु यतोऽयं न संस्कृतभाषायां विरचितः अतः शिष्टानां तत्र भृशम् अनादरं परिलक्ष्यते। परन्तु अभिरामाचार्यः स्वग्रन्थे तस्य समर्थनं कृतवान्। विषयेऽस्मिन् तेन युक्तिः अपि प्रदत्ता। उक्तञ्च तेन-

शब्दस्य संस्कृततया यदि गौरवं स्याद्

बौद्धादिशास्त्रादिवचसामपि तत्परसङ्गः।

वाच्येन चेत् कथितमुत्तमवाच्यमेषु

भाषानिकर्ष इह तेन न शाक्यशङ्कः।। इति।

शठारि-आलवाराचार्यकृतः द्राविडसामवेदोऽयं वैष्णवधर्मस्य विशेषतः भक्तिसाधनायाः प्रसारे अत्यन्तोपयोगी। शठारिमहोदयस्य प्रतिपाद्यान् विषयान् संक्षेपेण अववोधयितुं वेदान्तदेशिकाचार्येण तात्पर्यरत्नावलीनामकः एकः ग्रन्थ प्रणीतः। ग्रन्थेऽस्मिन् वहुषु श्लोकेषु शठारिमहोदयस्य भक्तिसाधनायाः भगवतश्च माहात्म्यं तेन कीर्तितम्। एतादृश एकः श्लोक उद्धार्यते-

स्वप्राप्यासिद्धकान्तिं सुघटितदयितं विस्फुरत्तुङ्गमूर्त्तिं

प्रीत्युन्मेषादिभोग्यं नवघनसुरसं नैकभूषादिचित्रम्।

प्रख्यातप्रीतिशीलं दुरभिलपरसं सद्गुणामोदाहृद्यम्।

विश्वव्यावृत्तिचित्रं ब्रजयुवतिगणख्यातनीत्याऽन्वभुंक्त॥[9] इति।

अनन्तरं विष्णुप्राण-पद्मपुराण-भागवतपुराणादीनां साहित्यसम्भारः उत्तरभारते पूर्वभारते च भक्तिसाधनायाः विस्तारे सहायकोऽभूत्। प्रसङ्गेऽस्मिन् पद्मपुराणस्य एकः श्लोक उदाहियते-

उत्पन्ना द्राविडे भक्तिर्वृद्धिं कर्णाटके गता। क्वचित् क्वचिन्महाराष्ट्रे गुर्जरे प्रलयं गता।। इति।

पौराणिकयुगे वैष्णवधर्मः वहु प्रचारित आसीत्। पुराणानि तत्र प्रमाणरूपाणि। श्रुतौ संक्षिप्ततयालोचितस्य वैष्णवधर्मस्य प्रधानतमसाधनरूपस्य नामकीर्तनस्य समधिका प्रशंसा परवर्तिनि काले पुराणादिषु विधीयते। नामोच्चारणे सर्वेषामेव मनुष्याणां समानाधिकारो वर्तते इत्यपि पुराणादिषु वर्णितः।

[9] तात्पर्यरत्नावली - १७

यथा स्कन्दपुराणे-

मधुर मधुरमेतन्मङ्लं मङ्लानां
सकल-निगमवल्ली-सत्फलं चित्स्वरूपम्।
सकृदपि परिगीतं श्रद्धया हेलया वा
भृगुवर नरमात्रं तारयेत् कृष्णनाम।।[10] इति।

अग्निपुराणे च-

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।
रटन्ति हेलया वापि ते कृतार्था न संशयः।। इति।

श्रीमद्भागवतेऽपि च-

एतन्निर्विद्यमानानाम् इच्छतामकुतोभयम्।
योगिनां नृप निर्णीतं हरेर्नामानुकीर्त्तनम्।।[11] इति।

ऋक्संहितायाः विष्णुसूक्तस्य विविधेषु मन्त्रेषु परोपकारार्थं कृतं स्वार्थत्यागं यद्वर्णितं तदेव वैष्णवानां विशेषलक्षणम्। एतादृशस्य वैष्णवभावस्य उत्कर्षोदाहरणानि श्रीमद्भागवतादिषु अपि प्राप्यन्ते। यथा श्रीमद्भागवतमहापुराणे श्रीप्रह्लादस्योक्तिः-

न कामयेऽहं गतिमीश्वरात् परामष्टार्द्धियुक्तामपूनर्भवं वा।
आर्तीः प्रपद्येऽखिलदेहभाजा मन्तःस्थितो येन भवन्त्यदुःखाः।।[12] इति

प्राणिनां दुःखपरिहरणाय तस्य एतादृशी प्रार्थना। एतादृशी परदुःखप्रहाणेच्छा हि वैष्णवता। सा एव परदुःखकातरता स्मार्तयुगे पौराणिकयुगे च समधिका पुष्टिं परिप्राप्ता।

अतः बौद्धधर्मस्य प्रभावेन वैष्णवलधर्मस्य विशेषतः भक्तिसाधनायाः या धारा स्थगिता सा एव धारा आलवाराचार्याणां प्रयासेन तथा पुराणादीनां साहित्यसम्भाराणां प्रभावेन यथा पुनरुद्धरिता स्यात्, तद्वत् वैदान्तिका आचार्या अपि ब्रह्मवादस्य प्रतिष्ठामाध्यमेन भारतवर्षस्य अध्यात्मभावराज्यस्य विशालक्षेत्रात् शून्यवादमूलकस्य बौद्धधर्मस्य समुत्खातं विहितवन्तः। तेषु अन्यतमाः यथा आचार्यः गौडपादः, गोविन्दभगवत्पूज्यपादः, आचार्यशंकरः, रामानुजाचार्यः, मध्वाचार्यः, निम्बार्काचार्यः, विष्णुस्वामी, वल्लभाचार्य इत्यादयः। तदा ब्रह्मवादाविर्भावप्रभावात् भारतवर्षस्य अध्यात्मशास्त्रे केवलभावमुख्यकप्रेरणायाः

---

[10] स्कन्दपुराणम्, हरिभक्तिविलासः –११/२३४

[11] श्रीमद्भागवतमहापुराणम् –२/१/११

[12] श्रीमद्भागवतमहापुराणम् –९/२१/१२

CC BY

प्रभावः न्यूनः जातः। परन्तु भक्तिसाधनायाः प्रभावेन एतेषां दार्शनिकानां चेतसि अपि भक्तेः गौरवमयं स्थानं परिलक्ष्यते। अद्वैतवादिनोऽपि शंकरस्य आनन्दलहरी इति स्तोत्रे भक्तिभावस्य स्फुरणंदृश्यते-

तव स्तन्यं मन्ये धरणिधरकन्ये हृदयतः पयःपारावारः परिवहित सारस्वत इव।

दयावत्या दत्तं द्रविडशिशुरास्वाद्य तव यत् कवीनां प्रौढानामजनि कमनीयः करयिता॥[13] इति।

आचार्यस्य मधुसूदनसरस्वत्याः कृष्णभक्तिः कं न मुग्धं करोति-

ध्यानाभ्यासवशीकृतेन मनसा यन्निर्गुणं निष्क्रियं

ज्योतिः किञ्चन योगिनो यदि परं पश्यन्ति पश्यन्तु।

अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरं

कालिन्दीपुलिनेषु तत्किमपि यन्नीलं महो धावति॥[14] इति।

न्यायवैशेषिकसम्प्रदायस्य आचार्याः अपि भक्तिसाधनायाः प्रभावाद् आत्मानं विच्छेदयितुम् असमर्थाः आसन्। उदयनाचार्य-विश्वनाथन्यायपञ्चाननप्रमुखानामाचार्याणां स्वग्रन्थेषु कृताः मङ्गलाचरणश्लोकाः अत्र प्रमाणम्।

अनन्तरं दार्शनिकानां प्रभावेन भावमुख्यकप्रेरणायाः क्षीणीभूता धारा रसप्रस्थानस्य ध्वनिप्रस्थानस्य च आचार्याणां प्रयासेन पुनरुद्धरिता। परन्तु अस्मिन् युगे भूमानन्दस्य अनुभूतये मनुष्याणां तीव्राकाङ्क्षा न परितृप्ता अभूत्। यतो हि ते भक्तेः रसरूपत्वं नाङ्गीकुर्वन्ति। किन्तु तैरपि आचार्यैः अन्ततो गत्वा भक्तेः उपयोगिता उपलब्धा। ध्वन्यालोकस्य तृतीयोद्योते आनन्दवर्धनाचार्यस्योक्तिः अत्र प्रमाणम्-

या व्यापारवती रसान् रसयितुं दृष्टिः कवीनां नवा

दृष्टिर्या परमार्थवस्तुविषयोन्मेषा च वैपश्चिती।

ते द्वे अप्यवलम्ब्य विश्वमखिलं निर्वर्णयन्तो वयम्

श्रान्ता नैव तु लब्धमब्धिशयनत्वद्भक्तितुल्यं सुखम्।।[15] इति।

एतेषामालंकारिकाणां सकाशे देवादिविषयका रतिस्तु विशेषतः श्रीकृष्णविषयका रति अत्युत्कृष्टं स्थानमधिकरोति इत्यस्मिन् विषये तु नास्ति सन्देहलेशोऽपि। यथा जगन्नाथविरचितस्य रसगङ्गाधरस्य मङ्गलाचरणश्लोकः-

स्मृताऽपि तरुणातपं करुणया हरन्ती नृणामभङ्गुरतनुत्विषां बलयिता शतैर्विद्युताम्।

---

[13] आनन्दलहरी - ७६

[14] गूढार्थदीपिका –१३/१

[15] ध्वन्यालोकः, पट्टाभिरामशास्त्रिसम्पादितः, पृ. ५०८-५०९

कलिन्दगिरिनन्दिनी-तट-सुर-द्रुमालम्बिनी मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी।।[16] इति।

वङ्गदेशेऽपि वैष्णवधर्मस्य प्रसारः तदा दृश्यते। श्रीचैतन्यदेवस्य आविर्भावात् प्राक् कृष्णः जनमानसे निरविच्छिन्नया धारया प्रवाहिता आसीत्। परन्तु चैतन्याविर्भावेन वङ्गमानसे प्रवहमाना सा कृष्णभक्तिः स्फीता प्लाविता च जाता। भक्तिसाधनाया उत्कर्षता गौडीयवैष्णवाचार्यैः सम्यक् विहिता। चैतन्यदेवप्रदर्शितां कृष्णभक्तिमवलम्ब्यैव गौडीयवैष्णवसम्प्रदायस्य विस्तृतिः। श्रीकृष्णस्य विग्रहः न मायिकः अपि तु नित्यः चिदानन्दस्वरूपविशिष्टश्च इति गौडीयवैष्णवानां सिद्धान्तः। ब्रह्मसंहितायां विषयोऽयं वर्णितः वैशद्येन। यथा-

ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः।
अनादिरादिर्गोविन्दः सर्वकारणकारणम्।।[17] इति।

नित्यसिद्धस्य श्रीकृष्णस्य स्वरूपविषये श्रीचैतन्यदेवस्य सिद्धान्तः चैतन्यचरितामृते निर्दिश्यते-

कृष्णेर यतेक खेला सर्व्वोत्तम नरलीला
नर वपु ताँहार स्वरूप।
गोपवेश वेणुकर नवकिशोर नटवर
नवलीलार हय अनुरूप।।
कृष्णेर मधुर रूप शुन सनातन।
से रूपेर एक कण डुवाय सव त्रिभुवन
सर्व्व प्राणी करे आकर्षण।।
योगमाया चिच्छक्ति विशुद्ध सत्त्वपरिणति
तार शक्ति लोके देखाइते।
एइ रूप रतन भक्तगणेर गूड धन
प्रकट कैल नित्यलीला हैते।।[18] इति।

श्रीमद्भागवतस्यापि अयं सिद्धान्तः-

एते चांशकलाः पुंसःकृष्णस्तु भगवान् स्वयम्।
इन्द्रारिव्याकुलं लोकं मृडयान्ति युगे युगे।।[19] इति।

---

[16] रसगङ्गाधरः, प्रथमम् आननम् - १

[17] ब्रह्मसंहिता –५/१

[18] चैतन्यचरितामृतम्, मध्यलीला (२१ परिच्छेदः)

[19] श्रीमद्भागवतमहापुराणम् १/३/२६

CC BY

पुनश्च-

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।

ब्रह्मेति परमात्मेति भगवानिति शब्द्यते।।[20] इति।

रसिकराजशेखरस्य श्रीकृष्णस्य प्रीतिसम्पादनाय आत्मनो जीवनमपि उत्सर्गयितुं द्विधाग्रस्ताः नासन् गौडीयवैष्णवाचार्याः। गौडीयवैष्णवधर्मस्य वैशिष्ट्यमिदं श्रीचैतन्यदेवस्य आविर्भावात् प्राक् न केवलं वङ्गदेशे अपि तु समग्रे भारतवर्षे एव दुर्लभम् आसीत्। गौडीयवैष्णवसम्प्रदायस्य मुख्यः धर्मग्रन्थः श्रीमद्भागवतमहापुराणम्। ग्रन्थेऽस्मिन् भक्तितत्त्वस्य दार्शनिकचिन्तासमूहानां परा विस्तृतिः लभ्यते। श्रीमद्भागवतस्य द्वादशस्कन्धे कीर्तितं च यत् -

सर्ववेदान्तसारं हि श्रीभागवतमिष्यते।

तद्रसामृततृप्तस्य नान्यत्र स्याद् रतिः क्वचित्।।[21] इति।

श्रीकृष्णस्य दिव्यलीलाकर्षणेन वैष्णवाः लोके तु परमपुरुषार्थरूपं प्रसिद्धं मोक्षमपि अविगणय्य श्रीकृष्णदर्शनलाभमेव परमपुरुषार्थरूपेण स्वीकृतवन्तः। उक्तञ्च रूपगोस्वामिना –

शङ्के नीताः सपदि दशम-स्कन्दपद्यावलीनां

वर्णाः कर्णाध्वनि पथिकतामानुपूर्व्याद्भवद्भिः।

हंहो भिम्भाः परमशुभदान् हन्त धर्मार्थकामान्

यद् गर्हन्तः सुखमयममी मोक्षमव्याक्षिपन्ति।।[22] इति।

श्रीकृष्णस्य ध्यानं तु मोक्षापेक्षयाऽपि अत्युच्चतरं तत्तु गौडीयवैष्णवालंकारिकैः स्पष्टमुद्घोषितम्। भक्तिरसामृतसिन्धुग्रन्थात् प्रसङ्गेऽस्मिन् कश्चनः श्लोकः उदाह्रियते।

वरं देव! मोक्षं मोक्षविधं वा न चान्यं वृणेऽहं वरेशदपीह।

इदं ते वपुर्नाथ! गोपालवालं सदा मे मनस्याविरास्तां किमन्यैः।।[23] इति।

नारदपञ्चरात्रं, नारायणव्यूहस्तोत्रं, हयशीर्षं चेत्यादिषु भक्तिमार्गस्य प्रसिद्धेषु ग्रन्थेषु अपि चतुर्वर्गात् भक्तेः प्राधान्यं प्रतिष्ठितं दृश्यते। उक्तञ्च श्रीरूपगोस्वामिपादेन यद् ब्रह्मानन्दप्राप्तिः भक्तिरससुधासमुद्रस्य परमाणुतुल्यापि न भवति इति। तद्यथा -

---

[20] श्रीमद्भागवतमहापुराणम् –१/२/११

[21] श्रीमद्भागवतमहापुराणम् –१२/१३/१५

[22] भक्तिरसामृतसिन्धुः(पूर्वविभागः)–१/२/२३८

[23] भक्तिरसामृतसिन्धुः (पूर्वविभागः) –१/२/४४

ब्रह्मानन्दो भवेदेष चेत् परार्धगुणीकृतः।

नैति भक्तिसुधाम्भोधेः परमाणुतुलामपि।।[24] इति।

अचिन्त्य-भेदाभेदतत्त्वं हि गौडीयवैष्णवानां मौलीभूतं दार्शनिकं तत्त्वम्। ईश्वरः जागतिके सर्वे एव पदार्थे विराजते परन्तु ईश्वरस्तु तदतिरिक्तः। जीवस्य जगतः ईश्वरस्य च पारस्परिकः सम्बन्धोऽयम् अचिन्त्य-भेदाभेद-सम्बन्धरूपेण प्रसिद्धः। अचिन्त्य-भेदाभेदसिद्धान्तोऽयं अन्येभ्यः वैष्णवसम्प्रदायेभ्यः गौडीयवैष्णव-सम्प्रदायं भेदयति। गौडीयवैष्णवाचार्याणां विरचितान् विविधान् अलंकारग्रन्थान् नाट्यग्रन्थान् च दृष्ट्वा अस्मिन् युगे वैष्णवधर्मस्य प्रसारः कीदृशः स्यात् तत्तु सम्यगवबोध्यते। अत इदं वक्तुं शक्यते यद् वैदिकयुगादारभ्य पञ्चदशशताब्दीं यावत् प्रवहन्त्या अस्या वैष्णवधर्मपरम्पराया गतिः कदाचिन्मन्दीभूता कदाचिच्च क्षीणतां प्राप्ता, परन्तु यदैव धर्मात्मनां महात्मनां सान्निध्यमवाप तदैव वैष्णवधर्मप्रवाहः स्वकीयेन माहात्म्येनैव प्रचारितः प्रसारितश्च बभूव इत्यत्र नास्ति सन्देहावसर इति शम्॥

****

BIBLIOGRAPHY

1. Bhattacharya.Vishnupada. *GaudīyaVaiṣṇavasampradāya: Bhaktirasa o Alaṇkaraśastra*, Kolkata, Ananda Publishers, 1422
2. Kavi Karnapura. *Alaṇkārakaustubhaḥ*. Edited by Shivaprasad Bhattacharya, Rajsahi, The Varenrda Research Society, 1926
3. Srirupa. *Bhaktirasāmṛitasindhuḥ*. Edited by Bhakti Vedanta Swami, Kolkata, Mayapur Store, 2013
4. Srirupa. *Nātakacandrikā*. Edited by Babulal Shastri, Varanasi, Chaukhamba Sanskrit Series Office, 1964
5. Srirupa. *ŚrīśrīUjjvalanīlamaṇiḥ*. Edited by Haridas Das, Kolkata, Sanskrit Book Dipo, 2017
6. Pramathanath. *BānglārVaiṣṇavadharma*, Kolkata, Calcutta University, 1939

****

Author's Detail

Name	:	SHIBNATH SARDAR
Designation	:	PhD Scholar
Address	:	Ramakrishna Mission Vidyamandira Belur Math, Howrah-711202
Email Id	:	sardarshibnath@gmail.com

[24] भक्तिरसामृतसिन्धुः(पूर्वविभागः) –१/१/३८

CC BY

काव्यशास्त्रालोकेन रीतितत्त्वविवेचनम्

- सुरेशघोषः

सारसंक्षेपः-

संस्कृतकाव्यतत्त्वपद्धत्यां रीतीनां गौरवं प्रथितमस्ति। समयक्रमेण काव्यस्वरूपविषयिण्या दृष्टेर्बहुविधं परिवर्तनं जातम्। एवं रसप्रस्थानम् अलंकारप्रस्थानं ध्वनिप्रस्थानम् औचित्यवादश्चेत्यादीनि नैकविधानि प्रस्थानानि बहूनि च तत्त्वानि लभन्ते। एतेषां प्रस्थानानां प्रवर्ततेन प्राचीनस्य वामनोपज्ञस्य रीतिप्रस्थानस्य गौरवं तात्त्विकदृष्ट्या ह्रासं प्रयाति। किन्तु वास्तवदृष्ट्या समीक्षायां क्रियमाणायां यथैव सृष्टिधर्मिसाहित्ये तथैव समीक्षात्मकसाहित्ये रीतीनां प्राध्यान्यं सुतरामेवाव्याहतमिति प्रतिभाति। वामनः काव्यस्यात्मरूपेण रीतिं स्वीकरोति। तन्मते रीतिः हि पदानां विशिष्टा रचना एव। रीतिशब्दस्य पर्यायवाचिनः शब्दाः मार्गः, पन्था, पद्धतिः, स्वैरी, विधिरित्यादयः सन्ति। आचार्यभामहेन दण्डिना च वैदर्भी गौडीति रीतिद्वयं स्वीकृतम्। परन्तु वामनेन वैदर्भी, गौडी, पाञ्चाली इति रीतित्रयं स्वीक्रियते। आचार्यरुद्रटेन वैदर्भी, गौडी, पाञ्चाली, लाटीया चेति स्वीक्रियते। तथा च भोजराजेनापि तावदवन्तिकां मागधीमित्यभिनवं रीतिद्वयं प्रकल्पयता तस्य षड्विधत्वं व्यवस्थापितम्॥

कुञ्चीशब्दाः– रीतिः, वैदर्भी, गौडी, पाञ्चाली, वामनः।

****

मूलप्रबन्धः-

भारतीयानां विश्वासानुसारं सृष्टिकर्तुः ब्रह्मणः मुखात् वेदमयी संस्कृतवाणी निस्ससार हितेन रसेन वा विगलितवेद्यान्तरज्ञानबलेन सह युक्तं सहितम्, तस्य भावः साहित्यम्। अथवा हितं विहितमावृतं वा हितं सन्निहितं कविभिः रक्षितं वा ब्रह्मणा अवहितं ध्यातं वा तेन सह सहितम्, तस्य भावः साहित्यमिति साहित्यपदविवेचनधुरन्धराः। अस्मिन् वैज्ञानिके युगे यथा वैज्ञानिकविषयानां महत्त्वं वर्तते तथा संस्कृतसाहित्यस्य महत्त्वं नास्ति, किन्तु अनेकदृष्ट्या अस्य संस्कृतसाहित्यस्य महती उपयोगिता विद्यते। साहित्यशब्देन साम्प्रतं संस्कृते वङ्गभाषायाञ्च काव्यनाटकादिदीप्तिगुणात्मकानां रचनानां परिग्रहः। साहित्यं तत्र काव्यशब्दस्यैव पर्यायवाचकत्वेन परामृष्टम्।

मानवः चेतनासम्पन्नः संवेदनशीलप्राणी चास्ति। तस्य मनः शरीरमाधृत्य दुःखेन, सुखेन, प्रेम्णा, दयया, क्रोधेन, आशया च चलायमानं भवति। तथा प्रकृत्या प्रतिक्षणं परिवर्तनेन सौम्यं, मनोरमं, विविधरूपैश्च भावं गृह्णाति। काव्येन मानवस्य भावात्मक-विकासो भवति। अस्माकं भावानां काव्यम् उत्सर्जनमस्ति। काव्यं

हि यशसेऽर्थलाभाय व्यवहार-ज्ञानाय पापविनाशाय परमानन्दप्राप्त्यै कान्तासंमित-कर्तव्योपदेशाय च प्रशस्यते। यथा कथितं काव्यप्रकाशे मम्मटेन-

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।

सद्यःपरनिर्वृतये कान्तासंमिततयोपदेशयुजे।।"[1] इति।

यस्मिन् वाक्ये शब्दे अर्थे शब्दार्थयोर्वा रसमयता विद्यते तदेव काव्यमिति। काव्यलक्षणविषये संस्कृतज्ञानां नैकमत्यम्। केचन मम्मटस्य केचन विश्वनाथस्य केचन पण्डितराजजगन्नाथस्य च समर्थकाः सन्ति। संस्कृताचार्यैः काव्यस्य परिभाषा विभिन्नरूपेण दत्ता, तस्य विवेचनं कृतं स्यात्। रमणीयतां पुरस्कृत्य भामह अलंकारमेव काव्यस्यात्मा इति अमन्यत। परवर्तिभिराचार्यैः कः काव्यस्यात्मा इति गवेषणारतः बहुधा स प्रस्तूयते। वामनः रीतिरात्मा काव्यस्य इति निगदन् रीतिमेव काव्यात्मरूपेण स्वीकरोति। रीतिशब्देन शैली भाषासौन्दर्यं सालंकृतित्वं चाभीष्यते। सरस्वतीकण्ठाभरणे श्रीभोजराजो रीतेर्व्युत्पत्त्यात्मिकां परिभाषां निर्दिशति यत् रीतिः मार्गः पन्था वा। तदुच्यते-

"वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः।

रीङ्गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते।।"[2] इति।

पदानां विशिष्टा रचना एव रीतिः। पदेषु वैशिष्ट्यं तु गुणादेव जायते। अर्थात् विशिष्टा भणितिभङ्गी पदसंघटना वा, कविप्रतिभाजन्या, व्युत्पत्तिलभ्या, अभ्याससिद्धा, वाच्य-वाचक-सौन्दर्येण लावण्य अभिवर्धकेन औचित्येन च अनुप्राणिता गुणाश्रया, रसं भावं वा रीतिः अभिव्यञ्जयन्ति। रीतिः शब्दार्थोभयनिष्ठान् गुणान् धारयति। इयं रीतिः गुणालंकारादिभिः सह ध्वनिवक्रोक्ति-औचित्य-रसादिभिः अपि संगता। अभिनवगुप्तः चमत्कृतिं वक्रोक्तिं बन्धं गुम्फादिशब्दं रीतेः पर्यायं मनुते। काव्यशास्त्रे गुणानां नित्यता अलंकाराणाञ्च अनित्यताऽस्ति रीतिमार्गस्य महनीययोगदानम्।

रीतेः स्वरूपम् -

अथ रीधातो अधिकरणवाच्ये क्तिन्प्रत्ययेन निष्पद्यते रीतिशब्दः। रीतिशब्दस्य अर्थद्वयं कामधेनुकारेण प्रदर्शितम् - 'रीणन्ति गच्छन्ति अस्यां गुणाः' इति, तथा 'रीयते क्षरति अस्यां वाङ्मधुधारा' इति च। अपि च सरस्वतीकण्ठाभरणे श्रीभोजराजो रीतेर्व्युत्पत्त्यात्मिकां परिभाषां निदर्शति यत् रीतिः मार्गः पन्था वेति। रीतिशब्दस्य मार्गः, पन्था, विधिः, पद्धतिः, शैली, स्वैरी, Method, Style, diction इत्यादयः शब्दाः पर्यायवाचिनः सन्ति। आचार्यदण्डिना रीतिशब्दस्य पर्यायत्वेन मार्ग-पद्धति-वर्त्म इत्येते शब्दाः व्यवहीयन्ते।

---

[1]काव्यप्रकाशः- 1/2

[2]सरस्वतीकण्ठाभरणम्- 2/27

अत्र मार्गशब्दस्यार्थः पथप्रदर्शकः। अर्थात् रचनाशैल्याः पथप्रदर्शकः। कुल्लूकभट्टमहोदयेन मनुसंहितायां प्रथमाध्यायस्य चतुर्थश्लोकस्य टीकायां शैली इति व्यवहीयते। अत्र आचार्यमनुना उत्तमपुरुषस्य परिवर्ते प्रथमपुरुष प्रयोगः कृतः। एतादृशे प्रयोगे कुल्लूकभट्टस्यअभिमतिस्तावत्- प्रायेणाचार्याणामियं शैली यत् स्वाभिप्रायमपि परोपदेशमिव वर्णयन्ति।

आधुनिककाले रीति इत्यर्थे Style इति शब्दस्य प्रयोगः दृश्यते। यद्यपि style इत्यनेन सह शैली इति शब्दस्य ध्वनिगतं पार्थक्यमस्ति, परन्तु काव्यरचनायाम् अर्थगतं सादृश्यमस्ति। रीतेः प्रसङ्गे Diction इति शब्दस्य प्रयोगः विद्यते। अत्रेदमवधेयं यत् रीतिः, मार्गः, Style, Diction इत्यादयः शब्दाः भाषायाः प्रयोगे व्यवहृतः। का नाम रीतिः? रीतिशब्देन सर्वे पर्यायवाचिनः शब्दाः बोधगम्याः भवन्ति। अस्मिन् विषये बहवो वादाः प्रवर्तन्ते।

प्राचीनालंकारिकभामहविरचिते काव्यालंकारे काव्यतत्त्वपद्धतेः सम्पूर्णं रूपं प्राप्यते। ततः पूर्ववर्तिनि भरतप्रणीते नाट्यशास्त्रे केवलं नाट्यतत्त्वविषयः आलोचितः। अलंकारप्रस्थानप्रवर्तकभामहमस्य मते काव्ये अलंकाराणामेव प्राणभूतम्। भामहस्य काव्ये रीतिः मार्गः वा न दृश्यते। परन्तु भामहेन काव्ये वैदर्भी गौडीयं चेति नामद्वयस्योल्लेखमात्रमेव प्राप्यते। भामहस्य मते वैदर्भी गौडीयमिति काव्यस्य भेदद्वयमिति प्रतिभाति। अलंकारप्रस्थानः प्रतिष्ठापकेन भामहेन रीतिनां स्वरूपविषये प्रकाशितोऽनाग्रहः, रीतिविषयिणी विद्यमाना आलोचनापद्धतिरपि प्रतिकूलतया समालोचिता।

काव्यस्य शब्दार्थमये शरीरे तथालंकाररूपशरीरसज्जायाञ्च यद्यपि काव्यचर्चा भामहदण्डिनोरुभयोरेव निबद्धा तथापि दण्डिनो केवलमलंकारेषु विचरणा न समीता परन्त्वलंकारान् व्यतिरिच्य गुणेषु गुणद्वारेण च मार्गयोः सम्प्रसारिता। अतश्च दण्डी रीतिविषयकं किञ्चिद् आलोचनं विहितम्। आचार्येण दण्डिना काव्यादर्शस्य प्रथमे परिच्छेदे वैदर्भगौडमार्गयोर्विशेषतः सम्यग् रूपेण उपस्थानं कृतम्। वामनादिकथितस्य रीतिशब्दस्य समार्थको मार्गशब्दो दण्डिनः ग्रन्थे व्यवह्रियमाणः अस्ति इत्यत्र नास्ति कोऽपि सन्देहः। दण्डिनः नये वाक्यप्रयोगस्य परस्परम् अनेकप्रकारं सूक्ष्मभेदो विद्यते मार्गे। तेषु नैकविधेषु काव्यमार्गेषु वैदर्भगौडयोर्वैशिष्ट्यगतं वैलक्षण्यं स्पष्टतममिति। दण्डिना काव्यादर्शे मार्गभेदद्वयविषये स्पष्टतया आलोचितम्।

संस्कृतकाव्यतत्त्वसमीक्षागगने नवतमप्रज्ञालोकदीप्त्या ज्योतिष्कायते रीतिरात्माकारः वामनाचार्यः। दण्डिनः अर्वाचीनेन वामनेन रीतेर्माहात्म्यं सम्यग्रूपेणानुभूतम्। रीतिसम्प्रदायस्य प्रतिष्ठापकतया वामनस्य कृतित्वं महत्तमया दिशा औज्ज्वल्यमानम्। वामन एव प्राचीनेष्वलंकारेषु प्राथम्येन कविकर्मणः अलंकारादीनि बाह्योपकरणानि तथा आन्तरसौन्दर्यस्यास्तित्वमनुभय तस्य स्वरूपनिर्धारणे चेष्टितवान्। यद्यपि पूर्वाचार्यैरनुसृतेन पथा वामनेन आदौ काव्यस्य शरीरं शरीरिकसौन्दर्यञ्च विचारपदवीं नीते तथापि तदीया

महत्तरा भावयित्री प्रतिभा क्रमेण काव्यात्मानुसन्धाने कृतपदा रीतिमेव काव्यात्मत्वेन समुद्घोषितवती। ननु कोऽयम् आत्मा? तत्रोच्यते शरीराभ्यन्तरचारी यः सर्वातिशायी सत्तावान् मृतशरीरात् जीवशीररस्य वैलक्षण्यं प्रकटयति स एवात्मा। तथैव कर्कशतर्कवाक्येभ्यः काव्यस्य भेदं यः सूचयति स काव्यात्मा। अतश्च वामनेन शब्दार्थशरीरस्य काव्यस्यात्मरूपेण रीतेः समुद्घोषणम् विहितम्। यद्यपि पूर्वाचार्येण दण्डिना ग्रन्थे रीतिसमानार्थकस्य मार्गस्य पर्यालोचनं कृतम्। तथापि कविनिर्मितौ दण्डिनः तथा गौरवावहं स्थानं न तेन कथमपि निर्दिष्टम्। अत्र मार्गः गुणानुपजीव्यैव प्रवर्तते। परन्तु दण्डिना गुणस्य मार्गस्य वा किमपि सामान्यलक्षणं स्पष्टतया न प्रकाशितम्। वामनेन तु गुणस्य तथा रीतेश्च सामान्यलक्षणं विधाय तयोः स्वरूपं सुनिर्दिष्टरूपेण प्राप्तम्।

का नाम रीतिरिति जिज्ञासायामुच्यते वामनेन विशिष्टा पदरचना रीतिः। अत्र विशेषः नाम गुणस्वरूपो काव्यसौन्दर्याधायका धर्मा एव गुणाः। अत्रेदमवधेयं यत् काव्यस्यात्मा रीतिः रीतेश्चात्मा गुणः। सर्वप्रथमं वामनाचार्येण गुणरीत्योरान्तरोऽविच्छेद्यश्च सम्बन्धो विद्यते इति प्रदर्शितम्। काव्यसौन्दर्यस्य शोभावर्धकहेतवोऽलंकाराः। अतो गुणा एव काव्यस्य नित्यधर्मा अलंकाराश्चानित्यधर्मा इति वामनमतम्। अत एव तस्य मते गुणसमन्वितपदानां विरचनमेव रीतिः। आचार्यरुद्रटस्य काव्यालंकारे रीतेः गुरुत्वपूर्णं स्थानमस्ति। रुद्रटेन सर्वप्रथमं रीतीनां देशविशेषसम्पर्कबन्धनात् मुक्तिरस्यैव ग्रन्थे दृश्यते। आचार्यरुद्रटेन काव्यस्य वर्णनीयविषयेण सह रीतेः सम्बन्धविशेषः प्रतिष्ठापितः। आचार्यवामनेन रीतित्रयं स्वीक्रियते। परन्तु आचार्यरुद्रटेन नवीना एका रीतिः स्वीक्रियते। सा हि लाटीया इति। आचार्यरुद्रटेन एतासां रीतीनां कविकर्मणामुपजीव्यविषयेण सार्धं सम्बन्धं प्रकाशयता रसौचित्येन तासां संयोजनमभिमततया प्रख्यापितम्। रुद्रटेन रीतीनां स्वरूपनिर्देशनविधावपि स्वक्रिये पथि विचरणमवलम्बितम्। रीतीनां रसानुसारतो प्रयोगोऽनेन प्राथमिकतयोद्घोषितः। तदुच्यते-

"वैदर्भीपाञ्चाल्यौ प्रेयसि करुणे भयानकाद्भुतयोः।
लाटीयागौडीये रौद्रे कुर्याद् यथौचित्यम्।।"[3]इति।

रीतितत्त्वस्य परिशीलने आनन्दवर्धनाचार्यस्य महदवदानमस्ति। आनन्दवर्धनाचार्येण काव्ये तेषाम् आलंकारिकाणां काव्ये रीतिः स्वीकृता। अत रीतिः गुणे पर्यवसिता स्यात्। एवं गुणः रसे पर्यवसितः स्यात्। एवं दृश्यते यत् माधुर्य्यादयः शब्दार्थयोः गुणाः। तत्कथमुक्तं रसादिकमङ्गिनं गुणा आश्रिता इत्याशङ्क्याह अभिनवगुप्तः-

---

[3]काव्यालंकारः(रुद्रटः) 15/20

CC BY

"आत्मभूतस्य रसस्यैव परमार्थतो गुणा माधुर्य्यादय, उपचारेण तु शब्दार्थयोः।[4]" इति। रसमध्ये श्रृङ्गारः कथं मधुरः? तत्कारणं हि रतौ समस्तदेवनरतदितरप्राणीषु अविच्छिन्नेव वासनास्त इति न कश्चित्तत्र तादृग् यो न हृदयसंवादमयः। यतेरपि चमत्कारोऽस्त्येव। तस्मात् मधुर इत्युक्तम्। अत एव आनन्दवर्धनेन श्रृङ्गाररस एव मधुर इति कथ्यते। तदुच्यते-

"श्रृङ्गार एव मधुरः परः प्रह्लादनो रसः।

तन्मयं काव्यमाश्रित्य माध्युर्यं प्रतितिष्टति।।"[5]इति।

अस्मिन् व्यङ्ग्यव्यञ्जकभावविवेचनमये काव्यलक्षणे ज्ञाते सति याः काश्चित् प्रसिद्धा उपनागरिकाद्या शब्दतत्त्वाश्रिता वृत्तयः, याश्चार्थतत्त्वसम्बद्धाः कैशिक्यादयस्ताः सम्यग् रीतिपदवीमवतरन्ति। रीतिर्वृत्तिर्वा न अनुभवेन सिद्धति। यद्यपि काव्ये रीतिर्वृत्तिर्वा वर्तते परन्तु सा काव्यस्योत्कर्षं न वर्धयति। अत एव आनन्दवर्धनस्य मते काव्यस्य प्राणं हि ध्वनिः। न कोऽपि तद्यरिरिक्तः।

यद्यपि आनन्दवर्धनाचार्यस्य काव्ये रीतेः माहात्म्यं न स्वीकृतं तथापि राजशेखरस्य काव्यमीमांसायां रीतेः महद् अवदानं स्वीकृतम्। राजशेखरस्य मते रीतिः हि वचनविन्यासक्रमः। राजशेखरेण तद्विरचिते काव्यमीमांसास्तृतीयेऽध्याये भारतवर्षस्य विभिन्नेषु स्थानेषु तदानीं विद्यमानानां वृत्तीनां प्रवृत्तीनां रीतीनां च विवरणं प्रदत्तम्। यद्यपि भरताचार्येण नाट्यशास्त्रे चतस्रः प्रवृत्तयः उल्लिख्यन्ते तथापि केचन मन्यन्ते यत् सा एव हि रीतिः। तदुच्यते भरतेन-

"चतुर्विधा प्रवृत्तिश्च प्रोक्ता नाट्यप्रयोगतः।

आवन्तीदाक्षिणात्या च पाञ्चाली चौड्रमागधी।।"[6]इति।

अत रीतिशब्देन प्रवृत्तिरिति अर्थोऽपि बोध्यते। तदुच्यते राजशेखरेण-

"तत्र वेशविन्यासक्रमः प्रवृत्तिः। विलासविन्यासक्रमः वृत्तिः। वचनविन्यासक्रमो रीतिः।"[7]इति।

राजशेखरेण समासेन सह अनुप्रासोऽपि रीतेः मूलतत्त्वमिति स्वीक्रियते। यद्यपि राजशेखरस्य दशमे शतके आविर्भावः स्यात् तथापि नवमे शतके आविर्भूतेन वामनेन सह तस्य मतैक्यं दृष्टम्।स हि रीतिसम्प्रदायस्य समर्थक आसीत्।

---

[4]इति अभिनवगुप्ताचार्यस्योक्तिरुद्धृता विमलाकान्तमुखोपाध्यायसम्पादिते ध्वन्यालोके, पृ- 45

[5]ध्वन्यालोकः 2/7

[6]नाट्यशास्त्रम् 13/37

[7]काव्यमीमांसा, डः-उदयचन्द्रवन्द्योपाध्यायसम्पादिता, पृ- 66

मार्गविषये कुन्तकस्यावदानं न केवलं व्यतिक्रमम्, अपि तु यथेष्टं गुरुत्वपूर्णम्। आचार्येण कुन्तकेन सम्पूर्णतया पृथग्भावेन अपि मार्गोरीतिर्वा आलोच्यते। तन्मतं यथा यौक्तिकं तथैव सारविशिष्टमिति सर्वैः स्पष्टमनुभूयते।

तेन दण्डिनः मतमवलम्ब्य मार्गतत्त्वम् आलोच्यते। तस्य प्रथमापत्तिः नामकरणविषयम्। तथा च दण्डिना वैदर्भी गौडीया चेति रीतिद्वयमुक्तम्, वामनेन पाञ्चालीमधिकतया गृहीत्वा रीतित्रैविध्यमङ्गीकृतम्, रुद्रटेन लाटीयां नवीनत्वेन संयोजनेन तस्याश्चतुर्विधत्वं प्रतिपादितम्, भोजराजेनापि तावदवन्तिकां मागधीमित्यभिनवं रीतिद्वयं प्रकल्पयता तस्य षड्विधत्वं व्यवस्थापितम्। एतासां रीतीनां नामकरणमाध्यमेन तासां देशविशेषैः सम्बन्धः सुतरामेवाभ्युपगतः। तथा च देशवासिभिः कविभिर्यामेव रीतिमवलम्ब्य काव्यरचना विहिता तद्देशनाम्ना सा रीतिः प्रसिद्धिं गता। इयम् अयौक्तिका। कुन्तकस्य मते देशविशेषतया रीतीनां नामकरणं न युक्तमिति। तथा च यस्माद् देशभेदनिबन्धनत्वे रीतिभेदानां देशनामानन्त्याद् असंख्यत्वं प्रसज्यते इत्यस्य कारणत्वेन अभिमतं वक्रोक्तिजीवतकारस्य।

देशधर्मे तत् तत् स्थाने आचार-व्यवहार-प्रभृतयः अनुकरणं भवति न तु कवेः काव्यरचनारीतिः।

कुन्तकस्य द्वितीयापत्तिः अत्यन्तं ग्रहणयोग्यम्। कदापि कवेः देशविशेषे काव्यनिर्माणं समानरूपत्वं न भवति। यदि देशविशेषवासिषु प्रतिभायाः समानरूपत्वं स्वीक्रियते तथापि व्यत्पत्त्यादिकारणभेदादेकविधा काव्यरचनारीतिर्न प्रादुर्भवितुमर्हति। काव्यप्रवृत्तेः कारणं तावत् प्रतिभा-व्युत्पत्तिरभ्यासश्चेति त्रितयमेव।

रीतीनामुत्कर्षापकर्षानुसारेण तेषामुत्तममध्यमरूपत्रैविध्यव्यवस्थापनमपि न समीचीनम्। अतो सचेतसां चेतश्चमत्कारिका शब्दार्थबन्धो रीतिरूपो एवोपदेष्टव्यो न हि अपकृष्टा कापि रीतिर्यत्र सहृदयानामानन्दो न जायते। अत गौड्याः पाञ्चाल्याश्च यस्मिन् द्वितये वैदर्भीसदृशी सौन्दर्यसम्पत्तिर्न विद्यते पर्यालोचनं निरर्थकं स्यात्। अत कुन्तकेन रीतीनां देशविशेषाश्रितत्वं तथा तासामुत्तममध्यमाधमव्यवस्थापनं निराकृते।

साहित्यदपर्णग्रन्थस्य बहुषु स्थलेषु विश्वनाथेन प्रकल्पिताया महनीयाया रीतिभावनायाः समुल्लेखः परिप्राप्यते। तथाहि साहित्यदपर्णस्य नवमे परिच्छेदे रीतेः स्वरूपं प्राप्यते। तस्य मते रीतिः हि "पदसंघटना रीतिरङ्गसंस्थाविशेषवत्। उपकर्त्री रसादीनाम्।"[8] इति।।

अतः पदानां सङ्घटना विशेषः। इयं रीतिः काव्यस्यात्मा रस-रसाभास-भावादिप्रभृतयः उपकारं साधयति। अत्र नीरसेषु गुणाभिव्यञ्जकशब्दार्थसत्त्वे तस्य रीतित्ववारणायाह उपकर्त्रीति। एतच्च रीतीनां शब्दार्थशोभाद्वारेण रसोत्कर्षकत्वं प्रापयति।

[8]साहित्यदर्पणः 9/1

रीतेः भेदाः-

भामहस्य रीतीनां तात्त्विकभेदकरणमपि अनभिप्रेतमासीत्। भामहेन वैदर्भी गौडीयमिति नामद्वयस्योल्लेखमात्रमेव विहितम्। तेन कुत्रापि तु मार्गस्य रीतेर्वा विशेषतया न तयोरभिधानं कृतम्। एतेनैवं तस्य अभिमतं प्रकाशयति वैदर्भी गौडीयमिति काव्यस्यैव विशेषणम्। तदुच्यते भामहेन-

"वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे।

तदेव च किल ज्यायः सदर्थमपि नापरम्।।"[9] इति।

वैदर्भगौडीययोरेतादृशं वैलक्षण्यसम्पादनं तत्रापि भामहस्य नानुमतं वैदर्भस्य समधिकोपादेयत्वप्रखापनमिति विषयद्वयम्। भामहस्यमते वैदर्भादिसंज्ञा वक्तुरिच्छानुसारिणी न तत्र किमपि याथार्थ्यं विद्यते। तथा च गौडीयमपि वैदर्भात् समुत्कर्षयुक्तं समुपादेयञ्च भवितुमर्हति। पक्षान्तरे प्रसन्नमृजु कोमलमपि वैदर्भमर्थौदार्यविरचितं तथा वक्रोक्तिशुन्यं चेद् भवेत्तर्हि तदपि न समादरास्पदम्। तादृशं वैदर्भी सङ्गीतवत् केवलं कर्णयोः सुखावहम्।

आचार्येण दण्डिना नैकविधेषु काव्यमार्गेषु वैदर्भगौडयोर्वैशिष्ट्यगतं वैलक्षण्यं स्पष्टमिति कृत्वा अनयोरेव द्वयोर्मार्गयोः पर्यालोचनं प्रस्तुतम्। गुणप्रयोगेण मार्गस्य स्वरूपं निर्धारितं स्यात्। वामनेन कथ्यते यत् 'विशिष्टा पदरचना रीतिः'। 'विशेषो गुणात्मा'। दण्डिना अपि इदं स्वीकृतम्। श्लेषप्रसादादिप्रभृतीनां दशानां गुणानां साकल्येन विराजमानता वैदर्भमार्गे परिदृश्यते। गौडमार्गे एषु गुणेषु केषाञ्चित् पुर्णतया स्थितिः केषाञ्चिदंशतः स्थितिः केषाञ्चिच्च नितरामविद्यमानता विलोक्यते। वैदर्भमार्गस्य प्राणभूतेषु गुणेषु केषाञ्चन गौडमार्गे समानभावेन विद्यमानता। एषु दशसु गुणेषु केषाञ्चिद् गुणानां स्वरूपं स्वत एव दुरधिगम्यम्। तथाहि श्लेषेण सह सुकुमारतायास्तथा कान्त्या सहोदरताया वैलक्षण्यं दुर्बोध्यमेव। एते गुणा वैदर्भमार्गस्य प्राणस्वरूपा इत्युक्तम्। किञ्च यदि उपचारात् सङ्गतिरित्युच्यते तर्हि एतदपि परिदृश्यते यत् ओजो वैदर्भमार्गस्य न प्राणभूतम्। यतस्तत्र सर्वात्मना नास्य स्थितिः। पक्षान्तरे गौडमार्गस्यैवेदमोजः प्राणस्वरूपं तत्रैवास्य निरर्गलप्रवृत्तिदर्शनात्। अत दण्डिनः मते श्रेष्ठः मार्गः हि गौडीयः न तु वैदर्भः। अतो रीतिचिन्तायाः सर्वातिशायि कृतित्वं यदि तावत् वामनस्य तर्हि तस्याः भूमिविरचनस्य गौरवं दण्डिन एवेत्यत्र नास्ति शङ्कापङ्कलवोऽपि।

एतत् पर्यन्तम् आलंकारिकाणां द्वयोर्रीतिः स्वीक्रियते। परन्तु अष्टमे शतके वामनाचार्येण तिस्र एव रीतयः स्वीकृताः। ताश्च वैदर्भी गौडीया पाञ्चालीति नाम्ना व्यपदिश्यन्ते। अत्र दृश्यते विदर्भगौडपाञ्चालेति देशत्रयस्य नामभिः रीतिनां नामानि विहितानि। तत्र पृच्छ्यते कामधेनुकारेण- 'यथा लवणादयः पदार्था'

---

[9]काव्यालंकारः(भामहः) 1/31

इत्यादि। सैन्धवः लवणः इत्युक्ते विशिष्टमेकं सिन्धुदेशजातं लवणं यथा जानामि तथा किं वैदर्भ इत्यादि नाम्ना देशवशाद् विशिष्टत्वं काव्यनामिति बोद्धव्यमिति? अस्य प्रश्नस्य उत्तरमुच्यते सूत्रेऽस्मिन्- विदर्भादिषु विदर्भगौडपाञ्चालेषु देशेषु दृष्टत्वात् तद्देशवासिषु कविषु तत्तद्रीतेः स्वरूपं प्रथमं स्फुरितमासीत्। तस्मात् तासां रीतीनां तादृशानि नामानि जातानि। परवर्तिकाले कुन्तकस्य मते कविभेदेनैव रीतिभेदः भवति इति स्वीकर्तव्यम्। अतः कवीनां रुचिशक्तिः प्रकृतिवशादेव रीतयः भिद्यन्ते न तु देशवशात्। काव्यदोषविरहिता समग्रगुणोपेता सहृदयहृदयानुरञ्जिका रीतिरेव वैदर्भी। वामनेन दशशब्दगुणास्तथा दश अर्थगुणाः स्वीकृताः।सर्वेषां गुणानां सुचारुसन्निवेशो दृश्यते यस्यां सा हि वैदर्भी रीतिः। तस्या महिमा कीर्तितः श्लोकेऽस्मिन्-

"अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते।।"[10] इति।

भरतप्रोक्तैः गुणैः सह एतासां गुणानां सादृश्यमस्ति। तदुच्यते भरतेन-

"श्लेषः प्रसादः समता समाधिर्माधुर्य्यमोजः पदसौकुमार्य्यम्।
अर्थस्य च व्यक्तिरुदारता च कान्तिश्च काव्यस्य गुणा दशैते।।"[11] इति।

शब्दार्थादिषु काव्योपादानेषु विद्यमानेषु अपि यां विना काव्यादलौकिकानन्दप्राप्तिर्न सम्भवति सैव वैदर्भी रीतिः। वैदर्भी रीतेरुदाहरणं कालिदासविरचितात् अभिज्ञानशकुन्तलमिति नाटकात् गृहीतो वामनेन। यथा-

"गाहन्तां महिषा निपानसलिलं श्रृङ्गैर्मुहुस्ताडितं
छायावद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विस्रब्धं क्रियतां वराहततिभिर्मुस्ताक्षतिः पल्वले
विश्रान्तिं लभतामिदं च शिथिलज्याबद्धमस्मद्धनुः।।"[12] इति।

विदुषकं प्रति उक्तिरियं उत्कण्ठितस्य दुष्यन्तस्य शकुन्तला विलोकनेन। अत्र सर्वे गुणा विद्यन्ते।

अत्र 'गाहन्तां महिषा' इत्यादौ आरोहावरोहक्रमस्फुरणात् समाधिः, 'महिषा निपानसलिलम्' इत्यत्रबन्धस्य गाढत्वादोजः, श्रृङ्गर्मुहुस्ताडितमित्यत्र पृथक्पदत्वात् माधुर्यम्, छायाबद्धकदम्बकमित्यत्र मसृणत्वात् श्लेषः, समग्रे श्लोके एकमार्गाश्रयणात् समता, रोमन्थमभ्यस्यतु इत्यत्र बन्धस्य विकटत्वाद् उदारता।

---

[10]काव्यालंकारसूत्रवृत्तिः, श्रीकृष्णसूरिसम्पादिता, पृ- 17

[11]नाट्यशास्त्रम् 16/96

[12]अभिज्ञानशकुन्तलम् 2/6

शिथिलज्याबद्धम् इत्यत्र बन्धस्य गाढत्वशिथिलत्वयोः संमिश्रणात् प्रसादगुणः। सर्वत्र पदानाम् औज्ज्वल्यात् कान्तिगुणः। अतः वैदर्भ्याः स्वरूपं भामहेन उक्तं-

“अपुष्टार्थमवक्रोक्ति प्रसन्नमृजुकोमलम्।

भिन्नं गेयमिवेदं तु केवलं श्रुतिपेशलम्।।”[13] इति।

भामहेन वैदर्भ्या रीत्याः श्रेष्टत्वं न अङ्गीकृतम्। भामहः काव्यभेदमध्ये वैदर्भगौडनामकयोः रीत्योः उल्लेखः कृत। भामहमते वैदर्भगौड इति भेदकरणं गतानुगतिकरीत्या कृतम्। अर्थगौरवहीना वक्रोक्तिहीना च प्रसादगुणसम्विता ऋजुकोमला एषा वैदर्भी केवलं श्रुतिसुखादुत्वात् गीतवत् काव्यात् भिन्नैव। तन्मते सालंकारा अर्थगौरवयुक्ता ग्राम्यत्वक्लिष्टत्वादिदोषहीना गौडीया रीतिरेव साधीयसीति। भामहेन रीतिद्वयमध्ये गौडीयाया रीतेः उपादेयत्वं विशेषतः प्रकाशितम्। भामहेन गौडीयायाः स्वरूपमुक्तम्-

“अलंकारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम।

गौडीयमपि साधीयो वेदर्भमिति नान्यथा।।”[14] इति।

दण्डिना तु उक्तं गौडीयायां रीतौ दशगुणानां विपर्ययः प्रायशो दृश्यते इति। न तु तत्र दश गुणाः नियमेन तिष्टन्ति। वामनेन कथ्यते यत् औजःकान्तिमती गौडीया। औजोनामकशब्दगुणस्य लक्षणं तावत् गाढबन्धत्वम् ओज इति। ओजसोऽर्थगुणस्य लक्षणं तावत् अर्थस्यप्रौढिरोज इति। कान्तिनामकशब्दगुणस्य लक्षणं तावत् औज्ज्वल्यं कान्तिरिति। कान्तिनामकस्यार्थगुणस्य लक्षणं तावत् दीप्तरसत्वं कान्तिरिति। अपि च प्राचामाभाणकं यथा-

“समस्त्यात्युद्भटपदामोजः कान्तिगुणान्विताम्।

गौडीयामिति गायन्ति रीतिं रीतिविचक्षणाः।।”[15] इति।

वामनेन गौडीयायाः रीतेरुदाहरणं भवभूतिविरचितात् महावीरचरितमिति नाटकात् गृहीतम्। यथा-

“दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत

ष्टङ्कारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः।

द्राक् पर्यस्तकपालसंपुटमितब्राह्माण्डभाण्डोदर

भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति।।”[16] इति।

---

[13]काव्यालंकारः (भामहः) 1/34

[14]काव्यालंकारः (भामहः) 1/35

[15]सरस्वतीकण्ठाभरणम् 2/31

[16]महावीरचरितम् 1/54

अत्र प्रतिछत्रं बन्धस्य गाढत्वम् औज्ज्वल्यं च प्रस्फुटितम् प्रतिपादं च समासप्राचुर्यम् उपलभ्यते। अत्र उद्भटपदानामपि प्राचुर्यम्। अतः रीतिरियं गौडीया। गौडीयारीत्याः केवलं माधुर्यसुकुमारतागुणयोः विरोधिगुणत्वात् नात्र तयोर्गुणयोरुपस्थितिः स्वीक्रियते।

यत्र माधुर्यसौकुमार्यगुणयोर्विशिषतो विद्यमानता ओजः कान्त्योरेकान्ततोऽविद्यमानता गुणान्तराणां सति सम्भवे सामान्येनावस्थानं सा पाञ्चाली रीतिः। माधुर्यनामकशब्दगुणस्य लक्षणं तावत् उक्तिवैचित्र्यं माधुर्यम्। सौकुमार्यनामकशब्दगुणस्य लक्षणं तावत् अजरठत्वं सौकुमार्यम् इति। सौकुमार्यनामकार्थगुणस्य लक्षणं हि अपारुष्यं सौकुमार्यमिति। एषा पाञ्चालीरीतिः न भामहेनोक्ता न वा दण्डिना अपि उक्ता। वामनेन पाञ्चाली रीतेः स्वरूपं प्राचीनमाभाणकमेवमुक्तम्-

"आश्लिष्टश्लथभावां तु पुराणच्छाययान्विताम्।
मधुरां सुकुमारां च पाञ्चालीं कवयोः विदुः।।"[17] इति।

पाञ्चालीरीतेरुदाहरणमुक्तं वामनेन यथा-

"ग्रामेऽस्मिन् पथिकाय पान्थ वसतिर्नैवाधुना दीयते
रात्रावत्र विहारमण्डपतले पान्थः प्रस्तुप्तो युवा।
तेनोत्थाय खलेन गर्जति घने स्मृत्वा प्रियां तत्कृतं
तेनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति।।"[18] इति।

श्लोकेऽस्मिन् कस्याश्चिद् ग्रामवृद्धायाः पान्थं प्रति उक्तिरियम्। अत्र पदरचनाया शैथिल्यं समासाभावः उग्रपदप्रयोगाभावश्च दृश्यन्ते। एवात्र पाञ्चाली रीतिर्बोद्धव्या।

कविभिः वैदर्भी रीतिरेव सर्वेषामेव गुणानां विद्यमानत्वात् समुपादेया। अतः प्रयोजकत्वाभावाद् गौडीयपाञ्चाल्यौ न ग्राह्यौ। अत्र विरोधः जायते। तत्र समाधानरूपेण कथ्यते दशगुणेषु वैचक्षण्यं प्रयोजनीयम् इति कृत्वा वैदर्भीरीतौ पदरचना कष्टसाध्या। केचन मन्यन्ते वैदर्भ्यां दक्षता-अर्जनाय अन्ययोः रीत्यो अभ्यासः कर्तव्यः। सूत्रे एके इति पदेन वामनस्य मतस्य अनभिप्रेतत्वं बोद्धव्यम्।

तेषां मतं गौडीयायां रीतौ तथा पाञ्चाल्यां रीत्यौ कुशलः जनः क्रमेण वैदर्भ्यामपि कुशलतां लभते। यथा प्राचीनकाले अश्वारोहणात् पूर्वं राजपुत्रैः मेषरोहणस्यानुशीलनं कृतं तथैव असररीतिद्वयस्य अभ्यासेनैव वैदर्भ्या कौशलं लभ्यते इति मतस्यास्य तात्पर्यम्। वामनस्य मतमिदं न समीचीनमिति मन्यते। वामनस्य मतेन

[17]काव्यालंकारसूत्रवृत्तिः, श्रीकृष्णसूरिसम्पादितः, पृ- 21

[18]काव्यालंकारसूत्रवृत्तिः, श्रीकृष्णसूरिसम्पादितः, पृ- 22

निकृष्टरीत्योः अभ्यासेन उत्कृष्टायां रीतौ वैचक्षण्यं न लब्धुं शक्यते। कश्चित् तन्तुवायः शणसूत्रवयनम् अभ्यासस्य त्रसरसूत्रवयनवैचित्र्यं न लभते। तस्मात् वामनेन मतमिदं नादरणीयम् इति कथ्यते।

अत्रैकः प्रश्नः समुदेति। वामनेन स्वकण्ठेन घोषितं यत् रीतिरात्मा काव्यस्य इति। गौडीया तथा पाञ्चाली च रीतिरपि काव्यात्मभूता एव। वामनेन तर्हि कथं तयोः रीत्यो अग्राह्यत्वं प्रतिपादितम्। निकृष्ट्योः रीत्योः कथं काव्यात्मात्वं युज्यते। कथं वा काव्यात्मभूतयोः तयोः परित्यागः विधीयते।

अतः वामनेनोच्यते तस्यां वैदर्भ्याम् अर्थगुणसम्पत् अर्थगुणानां वैभवम् आस्वाद्या आस्वादनीयम्। वैदर्भीरीतेः तु संस्पर्शात् अर्थगुणस्य लेशः अपि आस्वाद्यते। वैदर्भ्यां रीतौ कापि अपूर्वा पदानुपूर्वी विराजते यदवशात् काल्पनिकम् असदपि वस्तु प्रत्यक्षमाणं भवति। तत्र वितथमपि नीरसमपि वस्तु अवितथत्वं याति सरसं भवति। एषा रीतिः सहृदयानां चेतसि प्रविश्य तदानन्दयति अमृतधारावर्षणं च करोति।

अत्रायं प्रश्नः समुदेति किं सर्वेषां गुणानां काव्यात्मभूतरीतेरात्मत्वप्रयोजकत्वमुत कतिपयानाम्? प्रथमे पक्षे वैदर्भीव्यतिरिक्तयोर्गौडीपाञ्चाल्योः काव्यात्मत्वं न भवति। अत रीतेः काव्यात्मत्वमतवाद एव निरालम्बो जायते। द्वितीये पक्षे 'अद्रावत्र प्रज्वलत्यग्निरुच्चैः प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः' इत्यादौ वामनोक्तौजः प्रसादार्थव्यक्तिरूपाणां गुणानां विद्यमानत्वात् काव्यत्वापत्तिः। परन्त्वेतादृशप्रयोगस्य काव्यत्वं न कैश्चित् सहृदयैरङ्गीकर्तुं शक्यते।

वामनेन स्वकृताभिः रीतिभिस्तिसृभिः समं लाटीयानाम्ना एकस्या नवीनाया रीतेः समुल्लेखः रुद्रटेन कृतः। अत एव रुद्रटमते चतस्रो रीतयः। ताश्च- वैदर्भीगौडीयपाञ्चालीलाटीयाश्चेति। रुद्रटेन रीतीनां स्वरूपनिर्देशनाविधावपि स्वतन्त्रे पथि विचरणमवलम्बितम्। यत्र सर्वथा समासस्याभावः तत्र वैदर्भी। यत्र अतिशयितसमस्तपदप्रयोगः तत्र गौडी। यत्र द्वित्राणि समस्तपदानि तत्र पाञ्चाली। यत्र पञ्च वा सप्त वा समासनिष्पन्नानि पदानि तत्र लाटीया।

राजशेखरेण स्वकृतेः काव्यमीमांसायास्तृतीयेऽध्याये तिस्रः रीतयः उल्लिखिताः। ताश्च वैदर्भीगौडीपाञ्चाल्यः चेति। राजशेखरेण भारतवर्षस्य विभिन्नेषु प्रान्तेषु तदानीं विद्यमानानां रीतीनां प्रवृत्तीनां वृत्तीनाञ्च विवरणं प्रदत्तम्। भारतवर्षस्य पूर्वस्मिन् प्रान्ते अङ्गवङ्गरसुह्मब्रह्मापुण्डादीनि जनपदानि आसन्। तत्र प्रवृत्तिरासीदौड्रमागधी वृत्तिश्च भारती रीतिश्च गौडी। भारतवर्षस्य मध्यभागे पाञ्चालशूरसेनहस्तिनापुरप्रभृतिषु जनपदेषु प्रवृत्तिरासीत् पाञ्चालमध्यमाभिधाना सात्त्वती तथारभटी वृत्तिःपाञ्चाली च रीतिः। दक्षिणस्यां दिशि मलयमेकलकुन्तल केरलपालमञ्जरमहाराष्ट्रगङ्गकलिङ्गदीनि जनपदानि आसन्। तत्र प्रवृत्तिरासीद् दाक्षिणत्या वृत्तिश्च कौशिकी वैदर्भी च रीतिः।

एतासां तिसृणां रीतीनां स्वरूपायामेवं कथ्यते यत्, समासवदनुप्रासवद्योगवृत्तिपरम्परागर्भा च गौडी, ईषदसमासेषदनुप्रासोपचारगर्भा च पाञ्चाली, असमासा स्थानानुप्रासयुक्ता योगवृत्तिगर्भा च वैदर्भी। एवं प्रतिभाति पाञ्चालरीतितो लाटीयाया रीतेस्तादृशं किमपि समुल्लेखार्हं वैलक्षण्यं नास्य दृष्टौ समायाताम्।

स्ववक्तव्यस्य दृढतया प्रकाशं कर्तुं कुन्तकेन नूतनतया मार्गभेदप्रदर्शनं क्रियते-

"सम्प्रति तत्र ये मार्गाः कविप्रस्थानहेतवः।

सुकुमारो विचित्रश्च मध्यमश्चोभयात्मकः।।"[19]इति।

तेन त्रयो मार्गाः स्वीक्रियन्ते। ताश्च सुकुमारविचित्रमध्यमाः। मध्यम-मार्गस्यापरं नाम उभयात्मकः। उभयात्मकमार्ग इति नामकरणस्य कारणं तावत् अस्मिन् मार्गे सुकुमारविचित्रौ इति द्वयोरपि मार्गयोः वैशिष्ट्यं वर्तमानम्। एतेषां मार्गाणां मध्ये उत्कृष्टापकृष्टभेदोऽनुचितः।

कुन्तकेन कथ्यते यत् कविस्वभावोऽपि काव्यसृष्टेः कारणम्। परन्तु तत्रापि असंख्यकवीनां असंख्यप्रकाराणां स्वभावानां कृते काव्यस्य असंख्यप्रकाराः न स्वीकृताः। अत एव कुन्तकस्याभिमतो मार्गो हि कविस्वभावाश्रयिणी मार्गरिति। अधुना कुन्तकेन सुकुमारविचित्रमध्यमानां त्रयाणां मार्गाणां वैशिष्ट्यानि प्रदर्शितानि। सुकुमारमार्गे शब्दार्थौ सहृदयहृदयग्राहितया समुल्लसतः। तत्र अलंकाराणां च अतिशयितः सुलभप्रयोगः न परिदृश्यते। कतिपया अलंकारा यत् प्रादुर्भवन्ति तत्र कवेः कश्चन प्रयत्नो नापेक्षितः भवति। ते चालंकारा अत्यन्तसम्पाद्याः स्वत एव लब्धरूपा भवन्ति। अस्मिन् मार्गे वर्णनीयस्य वस्तुनः स्वभावसौन्दर्यस्यैव प्राधान्यम् अतितरामापतति। अपि च अस्य मार्गस्य अपरमेकं वैशिष्ट्यं रचनाया रसप्राचुर्यम्। मार्गेऽस्मिन् सौन्दर्यस्य सर्वाणि उपकरणानि कवेः प्रतिभात एव स्यन्दन्ते। सुकुमारमार्गे माधुर्यप्रसादलावण्याभिजात्यादीनां गुणानां समावेशः दृश्यते। तदुदाहरणं यथा-

"बालेन्दुवक्राण्यविकाशभावाद्बभुः पलाशान्यतिलोहितानि।

सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्।।"[20]इति।

श्लोकोऽयं कुमारसम्भवकाव्ये वसन्तवर्णनावसरे परिदृश्यते। अत्र बालेन्दुवक्राणि अतिलोहितानि सद्यो वसन्तेन समागतानाम् इत्येतानि पदानि शब्दार्थसम्पदा सुतरामेव चमत्कारकारीणि। अत्र नखक्षतानीव इति वाच्योत्प्रेक्षा। अपि च प्रस्तुते वसन्ते नायकव्यवहारस्य तथा प्रस्तुतासु वनस्थलीषु नायिकाव्यवहारस्य समारोपात् समासोक्तिः। परिशेषे कुन्तकेनोक्तम् अस्मिन् मार्गविषये-

"सुकुमाराभिधः सोऽयं येन सत्कवयो गताः।

---

[19]वक्रोक्तिजीवितम् 1/24

[20]कुमारसम्भवम् 3/29

CC BY

मार्गेणोत्फुल्लकुसुमकाननेनेव षट्पदाः।।"[21] इति।

सुकुमारमार्गस्य आलोचनात्परं विचित्रमार्गस्य स्वरूपं वर्णनं कृतम्। मार्गोऽयं व्युत्पत्त्यभ्यासाभ्यां परिपक्वधियां कवीनामेवात्र काव्यमार्गे विहरणार्थं सहायकः। मार्गोऽयम् अतिदुर्गम्। यथा युद्धविद्यायामतीव निपुणाः शक्तिमन्तो वीराः खड्गधारां समाश्रित्यात्मनो विजयसङ्कल्पं साधयन्ति तथा विदग्धा एव कवयो विचित्रमार्गेण काव्यं विरचयन्तः साफल्यमधिगच्छन्ति। मार्गेऽस्मिन् वक्रोक्तिवैचित्र्यमेव जीवनस्वरूपम्। अत्रापि माधुर्यप्रसादलावण्याभिजात्यदीनां गुणानां ग्रहणं कृतम्। अत्र विशेषेण द्रष्टव्यं यत् सुकुमारमार्गस्य माधुर्यादीनां गुणानां लक्षणं तथा विचित्रमार्गस्थितानां गुणानां लक्षणं भिन्नमिति।

सुकुमारमार्गस्य तथा विचित्रमार्गस्य वैशिष्ट्यानि यत् सम्यक्तया आलोच्यन्ते तत्रैव मध्यममार्गः। सुकुमाररुचिसमन्वितानां तथा विचित्ररुचिभाजाञ्च काव्यरसिकानामयं मार्गो मनोज्ञतया प्रतिभाति। अत्रापि माधुर्यप्रसादलावण्याभिजात्याभिधेयाः गुणाः विराजन्ते। मध्यममार्गस्य कविः हि मातृगुप्तमायुराजमञ्जीरादिप्रभृतय उल्लिख्यते कुन्तकेन। यद्यपि भारविमाघकालिदासप्रभृतयः कवीनां न उल्लिख्यते तथापि एताषां कवीनां काव्यमध्ये मध्यममार्गः दृश्यते। मार्गत्रये साधारणः द्वयो अपरिहार्य गुणस्य उल्लिख्यते कुन्तकेन। तयोश्च औचित्यः सोभाग्यश्च।

भोजराजस्य ग्रन्थे पाञ्चालीगौडीवैदर्भीलाटी आवन्तिका मागधी चेति षण्णां रीतीनां विवेचनं विहितम्। तत्र पाञ्चालीप्रभृतीनां चतसृणां रीतीनामालोचनं तेन पूर्वचार्यमार्गानुसार्यैव। आवन्तिकां रीतिं लक्षयता भोजराजेनोक्तम्-

"अन्तराले तु पाञ्चालीवैदर्भ्योर्यावतिष्टते। सावन्तिका समस्तैः स्याद्वित्रैस्त्रिचतुरैः पदैः।।"[22] इति।

आवन्तिकारीतौ द्वित्राणि त्रिचतुराणि वा समस्तपदानि विद्यन्ते। मागधी रीतिः नाम यत्रैकां रीतिमुपक्रम्यान्यया रीत्या सन्दर्भनिर्वहणं क्रियते। तथा चोक्तं भोजराजेन-

"पूर्वरीतिरनिर्वाहे खण्डरीतिस्तु मागधी।।"[23]इति।

भोजराजस्य अयं रीतिविचारः न कस्यापि नवीनस्यालोकस्य सम्पादकः। परन्तु तदानीमपि देशविशेषमाश्रित्य रचनारीतेर्विभागकरणस्य समीहामभिव्यञ्जयति। तदुच्यते-

"The classification and description of these in Bhoja's SKĀ are very mechanical, arbitrary unreal……. All that can be said is that the complacent creation of geographical names was in fashion amongst these writers."[24]

---

[21]वक्रोक्तिजीवितम्1/29

[22]सरस्वतीकण्ठाभरणम् 2/32

[23]सरस्वतीकण्ठाभरणम् 2/33

विश्वनाथेन विरचिते साहित्यदर्पणे चत्वारः रीतयः कथ्यन्ते। ताश्च वैदर्भीगौडीपाञ्चालीलाटी चेति। माधुर्यगुणस्य प्रकाशकवर्णेन मनोहरः समासाभावः समासाल्पविशिष्टः वा वैदर्भीरीतिः इति कथ्यते। रुद्रटेन समासविहीनः समासाल्पपदविशिष्टः वा श्लेषादिगुणयुक्ताः वर्गस्य द्वितीयवर्णस्याधिक्य यत्र लभ्यते सा वैदर्भीरीतिः।

ओजोगुणान्विता समासबहुला उद्भटसमन्विता रीतिर्हि गौडीया। पाञ्चालीरीतेः प्रसङ्गे विश्वनाथेन कथ्यते यत्र पूर्वोक्तरीतिद्वयस्यावशिष्टवर्णेन तथा पञ्चसमस्तपदानि षड्समस्तपदानि वा विद्यते यत्र सा पाञ्चाली रीतिः। प्रसङ्गेऽस्मिन् भोजराजेन उच्यते-

"समस्तपञ्चषपदामोजः कान्तिसमन्विताम्। मधुरां सुकुमाराञ्च पाञ्चाली कवयो विदुः।।"[25]इति।

विश्वनाथमते वैदर्भी रीतेः तथा पाञ्चाली रीतेः वैशिष्ट्यानि यत्र आलोच्यते तत्रैव लाटी रीतिः।परिशेषे विश्वनाथेन कथ्यते यत्-"क्वचित्तु वक्त्राद्योचित्याद् अन्यथा रचनादयः"[26] इति।

उपसंहारः-

चमत्कृतिवैशिष्ट्यं रम्यत्वं च आसादयितुं रीतिः अनिवार्या। रीतिरहितं काव्यं काणत्वादिदोषयुक्तं शरीरमेव प्रतिभाति। भणितिभङ्गी एव कवेः वैशिष्ट्यं साधयति। रीतिः कलात्मिक्या प्रवृत्तेः मूलम्। जगन्नाथेन उच्यते- 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्'[27]। काव्ये रमणीयत्वं चमत्कृतिम्आदधाति। परन्तु रमणीयत्वस्य मूलं हि रीतिः। रीतेः उद्देश्यमस्ति सौन्दर्यस्य सृष्टिः। अपि च रसानुगुणं पदसंयोजनम्। अत वामनमते काव्यस्यात्माऽस्ति रीतिरेव। पदानां विशिष्टा रचना एव रीतिः। सर्वप्रथमं वामन एव काव्यस्यात्मा रीतिरिति प्रस्तौति। परवर्तिनेः काले कुन्तकेन रीतेः परवर्ते वक्रोक्तिरेव काव्यस्य प्राण इति कथ्यते। पूर्ववर्तिभिराचार्यैः स्वीकृतः रीतेर्भेदः कुन्तकेन न स्वीकृतम्। तेन रीतेः परिवर्ते मार्गरिति उच्यते। कुन्तकस्य मते मार्गः त्रिविधः। कुन्तकेन मार्गस्योदाहरणेन स्पष्टं क्रियते यत् कवेः मनसि अभिव्यक्तं प्रकाशयति। तेन मते मार्गः न केवलं वहिरङ्गं तु अन्तरङ्गेऽपि विद्यते। कुन्तकस्य इयं सिद्धान्त अनैरालंकारिकेभ्यः पृथक्त्वम्।

रीतेः सह 'Style' इत्यस्य सादृश्यमस्ति। पाश्चात्यपण्डितः मिडलटन-मारे तत्विरचितः 'The problem of style' इति ग्रन्थे स्टाइल इति अस्य त्रिविधतया प्रयोगः कर्त्तुं शक्यते इति कथयति। तदुच्यते-

---

[24]V. Rghavan, Studies on Some Concepts of the AlamkāraŚāstra, The Adyar Library Series vol. 33 Revised eidition 1973, Page- 170

[25]सरस्वतीकण्ठाभरणम् 2/30

[26]साहित्यदर्पणः 9/5

[27]रसगङ्गाधरः। श्रीवदरीनाथझा तथा श्रीमदनमोहनझासम्पदितः, पृ.- 10

"Style, as personal idiosyncrasy; style, as technique of expression; style, as the highest achievement of literature."[28] इति। लुकासस्य स्टाइल-सम्पर्कितः यत्तथ्यं प्राप्यते तेन सह मार-महोदयस्य 'personal idiosyncrasy' इति कथनेन सह सादृश्यमस्ति। अत एव आधुनिके काले रीतिवादस्य प्रयोजनं न उपेक्षणीयमिति शिवम्॥

****

सहायकग्रन्थसूची

- आनन्दवर्धन. ध्वन्यालोकः. सम्पा. विमलाकान्त-मुखोपाध्याय, कोलकाता, संस्कृत-पुस्तक-भाण्डार, २००८
- कुन्तक. वक्रोक्तिजीवितम्.सम्पा. अञ्जलिका-मुखोपाध्याय,कोलकाता, सदेश, २०१६
- दण्डी. काव्यादर्शः. सम्पा. चिन्मयीचट्टोपाध्याय, कोलकाता, पश्चिमवङ्ग-राज्य-पुस्तक-पर्षत्,२०१८
- भोज. सरस्वतीकण्ठाभरणम्. सम्पा. पण्डितकेदारनाथशर्मा तथा वासुदेवलक्ष्मणशास्त्रीपणशीकर, वोम्बे, निर्णय-सागरप्रेस, १९३४
- भामह. काव्यालंकारः. सम्पा. रामानन्द-शर्मा, वाराणसी, चौखम्बा-संस्कृत-सीरीज-आफिस, २०१०
- भरतमुनि. नाट्यशास्त्रम्.सम्पा.पारसनाथद्विवेदी, वाराणसीसम्पूर्णानन्दसंस्कृतविश्वविद्यालय, १९९२
- राजशेखर. काव्यमीमांसा.सम्पा. उदयचन्द्रवन्द्योपाध्याय, कोलकाता, संस्कृत-वुक्-डिपो, २०१०
- रुद्रट. काव्यालंकारः. सम्पा. श्रीरामदेवशुक्ल, वाराणसी, चौखम्बा-विद्याभवन, १९६६
- वामन. काव्यलंकारसूत्रवृत्तिः. सम्पा.श्रीकृष्णसूरि, श्रीरङ्गनगर, श्रीवाणीविलासमुद्रायन्त्रालय, १९०२
- विश्वनाथ. साहित्यदर्पणः, सम्पा. कृष्णमोहन-शास्त्री, वाराणसी, चोखाम्बा-संस्कृत-संस्थान,२०१८
- MURRY MIDDLETON. THE PROBLEM OF STYLE, LONDON, OXFORD UNIVERSITY PRESS, 1992

****

Author's Detail

Name : SURESH GHOSH
Designation : M.Phil. Scholar, Department of Sanskrit
Address : Ramakrishna Mission Vidyamandira
Belur Math, Howrah-711202
Email Id : ghoshsuresh80@gmail.com

---

[28]Murry Middleton,The problem of style, page- 8

काव्यालंकारसूत्रवृत्तिदृष्ट्या कतिपयसन्दिग्धशब्दानां साधुत्वासाधुत्वविवेचनम्

- मृत्युञ्जय गराँइ

प्रबन्धसारः

भाषायां तावत् साधुशब्दज्ञानं सदापेक्षितम्। व्याकरणशास्त्रात्तु तत् ज्ञानं सम्यकतया परिप्राप्तम्। सुनिश्चितशब्दचयनैरेव काव्यशरीरस्य विनिर्मानं भवति। यथोक्तं भामहेन- 'शब्दार्थौ सहितौ काव्यम्' (काव्यालंकारः१/१६) इति। अतएव काव्यनिर्माणाय साधुशब्दज्ञानं तु अपरिहार्यम्। काव्ये कस्तावत् शब्दः प्रयोक्तव्यः कः वा परिहरणीय इत्येवं संशयः सदा वर्तते। कारणादस्मात् वामनाचार्येण काव्यालंकारसूत्रवृत्तौ पञ्चमेऽधिकरणे शब्दशुद्धिरपि आलोचना कृता। तत्र सन्दिग्धशब्दानां साधुत्वासाधुत्वं संक्षेपेन प्रतिपादितम्। नवीनं कविगणं प्रति एवमालोचना तावत् कामधेनुतुल्या। तथापि व्याकरणदृष्ट्येयमालोचना शुद्धाऽस्ति न वेति संशयः सततमुपजायते। विश्लेषणशैलीमाश्रित्य एवं संशयनिवारणेऽत्र प्रयत्नः कृतः।

सङ्केतशब्दाः

सूत्रम्, वृत्तिः, अलंकारशास्त्रम्, व्याकरणम्, प्रत्ययः, धातुः, समासः, वार्तिकम्, गणसूत्रम्, प्रथनम्, वृद्धसंज्ञा, वृद्धिः, गुणः, अनुबन्धः, सुबन्त, प्रातिपदिकम्।

****

उपोद्घातः

अलंकारशास्त्रीयरचनारीतिः सुप्राचीनकालादारभ्य साम्प्रतिककालं यावत् प्रवहनशीला विराजते संस्कृतभाषायाम्। काव्यसिद्धान्तानां मर्मार्थं सुखेन बोधयितुं काले काले विद्वद्भिर्बहवोऽलंकारग्रन्थाः प्रणीताः। तत्र बहुषु समुपलभ्यमानेष्वपि 'काव्यालंकारसूत्रवृत्तिः' नाम ग्रन्थस्य स्थानमनवद्यमिति मन्यते विपश्चिद्भिः। काव्यात्मतत्त्वसन्धाने तथा रीतितत्त्वस्थापने ग्रन्थस्यास्य महती भूमिकाऽतीव प्रशंसनीया। 'काव्यालंकारसूत्रवृत्तिः' इत्येका कृतिः समुपलभ्यते वामनाचार्यस्य। अनया एव तु तस्य कीर्तिः सर्वत्र परिव्याप्ता। 'काव्यालंकारसूत्रवृत्तिः' इति ग्रन्थे पञ्च अधिकरणानि द्वादशभिरध्यायैः विभक्तानि सन्ति। तत्र 'प्रायोगिकम्' नाम पञ्चमेऽधिकरणे शब्दशुद्धिरूपविषयो वर्णितोऽस्ति। वस्तुतोऽयं ग्रन्थस्तु अलंकारग्रन्थः। तथापि ग्रन्थस्यास्य अन्तिमेऽधिकरणे नवीनकविगणं प्रति शब्दानां साधुत्वासाधुत्वज्ञानं प्रतिपादितम्। काव्ये शब्दचयनं खलु अतीव महत्त्वपूर्णम्। यथोक्तं वामनाचार्येण-

''शुद्धानि हि पदानि निष्कम्पैः कविभिः प्रयुज्यन्ते।'' [1]

CC BY

अपरं तु व्याकरणशास्त्रेऽपि कथितम्-

''एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति।'' [2]

शब्दानां साधुत्वासाधुत्वं ज्ञानं तावत् व्याकरणग्रन्थे परिप्राप्तम्। ''**शब्दस्मृतेः शब्दशुद्धिः**''(का.सू.वृ.१/३/४) इति वामनाचार्यस्याप्यभिप्रायम्। तथापि केषाञ्चन सन्दिग्धशब्दानां साधुत्वासाधुत्वं ज्ञानमत्रापि निर्णीतम्। वस्तुतः केचित् शब्दाः सामान्यदृष्ट्या शुद्धाः प्रतीयन्ते परन्तु व्याकरणनिकाये तेषामसाधुत्वं विद्यते। अपि च कतिपयशब्दाः शुद्धाः वर्तन्ते तथापि अज्ञानवशात् तेषां प्रयोगः नाङ्गीक्रियते। एवं केषाञ्चन शब्दानां साधुत्वासाधुत्वं तत्रभवता वामनाचार्येण संक्षेपेन निरूपितम्। प्रस्तुते लेखेऽस्मिन् विश्लेषणशैलीमाश्रित्य तेषां कतिपयेषामालोचनं सम्यकतया विधीयते।

१. तृणकाष्ठम् / काष्ठतृणम्

संस्कृतभाषायां 'तृणकाष्ठम्' 'काष्ठतृणम्' वेति पदद्वयस्य प्रयोगविषये तावत् सन्देह उपजायते। 'तृणानि च काष्ठानि च'- इत्यस्मिन् विग्रहे ''**विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्**'' (२/४/१२)[3] इति सूत्रेण तथा ''**फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानां बहुप्रकृतिरेव द्वन्द्व एकवदिति वाच्यम्**'' (वा.१५४०) इति वार्तिकेन 'तृणानि' 'काष्ठानि' च इति समर्थसुबन्तपदद्वयस्य मध्ये विकल्पे समाहारद्वन्द्वसमासः एकवद्भावश्च भवति। अनन्तरं प्रातिपदिकत्वात् ''**सुपो धातुप्रातिपदिकयोः**''(२/४/७१) सूत्रेण समर्थपदद्वयस्य सुपः लोपो भवति। ''**अल्पाच्तरम्**''(२/२/३४) इत्यनेन अल्पाच्तरं पदं द्वन्द्वे पूर्वं प्रयोज्यम्। परन्तु अत्र विग्रहस्थपदद्वये समाक्षरानि परिदृश्यन्ते। अतएव ''**लघ्वक्षरं पूर्वम्**''(**वा.१४१३**) अनेन वार्तिकेन लघ्वक्षरविशिष्टपदस्य पूर्वनिपातो भवति। नियमस्यास्य पालनं तु सदा करणीयम्। अन्यथा व्यभिचारोऽपभ्रंशः वा परिलक्ष्यते। यथोक्तं वामनेन - ''**पूर्वनिपातेऽपभ्रंशो रक्ष्यः**''**(का.सू.वृ.५/२/२१)**

सूत्रस्यास्य वृत्तौ च तेनोक्तं स्पष्टतया - ''काष्ठतृणं, तृणकाष्ठमिति यदृच्छया पूर्वनिपातं कुर्वन्ति। तत्रापभ्रंशो रक्ष्यः परिहरणीयः। अनित्यत्वज्ञापनं तु न सर्वविषयमिति।''

अर्थात् समासेऽस्मिन् समर्थपदद्वयस्य मध्ये 'तृणम्' इति लघ्वक्षरपदस्य पूर्वनिपातः करणीयः। तदनन्तरं क्लीवलिङ्गत्वे एकवचने 'तृणकाष्ठम्' इति पदं प्राप्तम्। भाषायां पदमिदं तु प्रयोक्तव्यम्। कदापि 'काष्ठतृणम्' इति पदं न कर्तव्यम्।

२. हस्ताग्रम् / अग्रहस्तः

'हस्ताग्रम्' 'अग्रहस्तः' चेति पदयुगलस्य बहुविधप्रयोगो दृश्यतेऽस्माकं देवभाषायाम्। सामान्यदृष्ट्या उभयस्य प्रयोगविषये कश्चित् संशयो जायते। परन्तु व्याकरणशृङ्खलायां उभयप्रयोगः एव शुद्धोऽस्ति। समासगता विविधता केवलमत्र परिलक्ष्यते। वस्तुतोऽत्र समासद्वयस्य पूर्वनिपातविषये महान् संशयोऽस्ति।

एकस्मिन् पदे 'हस्त' शब्दस्य पूर्वनिपातः, अपरे तु 'अग्र' शब्दस्य पूर्वनिपातः। एवं पूर्वनिपातस्य पृथकता कथं सम्भवति ? केषाञ्चन मते, 'हस्ताग्रम्' 'अग्रहस्तः' इति पदद्वयमाहिताग्निगणपठितम्। अतः **"वाहिताग्न्यादिषु"** (२/२/३७) इति सूत्रेण विकल्पेऽत्र पूर्वनिपातः मन्यते। परन्तु एतत् न युक्तम्। अनेन सूत्रेण केवलम् आहिताग्निगणपठितानां निष्ठान्तशब्दानामेव पूर्वनिपातो भवति। यथोक्तं सूत्रस्यास्य काशिकावृत्तौ - "निष्ठा इति पूर्वनिपाते प्राप्ते विकल्प उच्यते।" इति। परन्तु 'हस्त' शब्दोऽत्र निष्ठान्तः नास्ति। हस्-धातोः तन्-प्रत्ययेन निष्पन्नोऽयं 'हस्त' शब्दः। एवम् 'अग्र' शब्दोऽपि निष्ठान्तो नास्ति। अतएवात्र 'हस्ताग्रम्' 'अग्रहस्तः' इति पदद्वयं कथं सम्भवति ? प्रसङ्गेऽस्मिन् वामनाचार्येणोक्तम्-

'हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात्।'(का.सू.वृ.५/२/२०)

सूत्रस्यास्य स्पष्टीकरणाय वृत्तौ च तेनोक्तम्-

'हस्ताग्रम्, अग्रहस्तः, पुष्पाग्रम्, अग्रपुष्पमित्यादयः प्रयोगाः कथम्। आहिताग्न्यादिष्वपाठात्। पाठे वा तदनियमः स्यात्। आह, गुणगुणिनोर्भेदाभेदात्। तत्र भेदाद् हस्ताग्रादयः। अभेदादग्रहस्तादयः।"

अर्थात् वामनाचार्यस्य मते, 'हस्ताग्रम्' 'अग्रहस्तः' इत्यादीनि पदानि तु गुणगुणीनः भेदाभेदात् प्रयुक्तानि। परार्थत्वसादृश्यादत्र गुणगुणिनौ अवयवावयविनौ भवतः। तयोर्भेदविवक्षायां हस्ताग्रादयः। तदा 'हस्तस्य अग्रम्'- इत्यस्मिन् विग्रहे षष्ठीसमासो भवति। पुनश्चाभेदविवक्षायां तु हस्ताग्रादयो भवन्ति। तदा समानाधिकरणतत्पुरुषसमासो भवति। सर्वङ्कषाटीकायां मल्लिनाथेनापि एवं व्याख्या समर्थिता। **'तरुकिसलयजालमग्रहस्तैः"(शिशु.७/२९)** पद्यस्य 'अग्रहस्तैः' इति पदव्याख्यायां मल्लिनाथेनोक्तम्- **'अग्राणि च ते हस्ताश्चेति समानाधिकरणसमासः। अत एव 'हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात्'** इति वामनः" इति। अत एव 'हस्ताग्रम्' 'अग्रहस्तः' इति पदयुगलस्य प्रयोगस्तु व्याकरणदृष्ट्या शुद्धोऽस्ति।

३. गुणविस्तारः / गुणविस्तरः

'काव्यालंकारसूत्रवृत्तिः' इति ग्रन्थे 'गुणविस्तारः' 'गुणविस्तरः' इति पदद्वयस्य साधुत्वासाधुत्वं प्रतिपादितम्। सामान्यदृष्ट्याऽत्र "ऋदोरप्"(३/३/५७) इति सूत्रेण ऋकारान्तात् स्तृ-धातोः[4] अप्-प्रत्ययेन 'गुणविस्तरः' इति पदं साधुत्वं प्रतिभाति। परन्तु अत्र अप्-प्रत्ययस्य प्रयोगः न भविष्यति। प्रथनस्य विस्तारस्य वा गम्यमानोऽत्रास्ति। तथाच प्रथनं शब्दविषयं न भवति। अतएव स्तृ-धातोर्विशब्दे उपपदे **"प्रथने वावशब्दे"(३/३/३३)**[5] इत्यनेन सूत्रेणात्र घञ् प्रत्ययो भवति। अनन्तरमनुबन्धलोपे 'गुण वि स्तृ अ' इति जाते, **"अचो ञ्णिति"(७/२/११५)**[6] इति सूत्रेण स्तृ-धातोर्वृद्धिना विभक्तियोगे च 'गुणविस्तारः' इति पदं निष्पद्यते। पदमिदं तु सदा शुद्धं भाषायां प्रयोक्तव्यं चेति। 'गुणविस्तरः' इति पदस्य प्रयोगस्तावत् चिन्त्यः। तथोक्तं वामनेन - **"गुणविस्तरादयश्चिन्त्याः।"(का.सू.वृ.५/३/३९)**

CC BY

सूत्रस्य व्याख्यायामपि तेनोक्तम् - ''गुणविस्तरः, व्याक्षेपविस्तर इत्यादयः प्रयोगाश्चिन्त्याः। 'प्रथने वावशब्दे' इति घञ् प्रसङ्गात्।''

४. शबला / शबली

शबलशब्दस्तावत् वर्णवाचकः। 'शप आक्रोशे' इति धातोः कल्-प्रत्यये निष्पन्नोऽयं शब्दः। प्रत्ययेन तु मध्योदात्तोऽनुदात्तान्तश्च शबलशब्दः। यथोक्तं न्यासटीकायाम्-

''शबलीति। 'शप आक्रोशे', 'कलस्तृपश्च' इति 'शपेर्बश्च' इति कलप्रत्ययः, पकारस्य बकारः, प्रत्ययाद्युदात्तत्वेन मध्योदात्तः शबलशब्दः।'' [7]

अत एव **''अन्यतो ङीष्''**(४/१/४०)[8] इत्यनेन सूत्रेणात्र शबलशब्दे खलु ङीष्-प्रत्ययस्य प्राप्तिरस्ति। ङीष्-प्रत्ययादत्र **''अजाद्यतष्टाप्''**(४/१/१४) सूत्रेण विहितस्य टाप्-प्रत्ययस्य प्रयोगः न भविष्यति। अर्थात् 'शबल + टाप् = शबला' इत्येवं रूपमशुद्धमस्ति। अपरं तु शबलशब्दात् ङीष्-प्रत्यये, अनुबन्धलोपे, **''यस्येति च''**(६/४/१४८)[9] सूत्रेण शब्दस्यान्तिमस्य अ-कारस्य लोपे, विभक्तिकार्ये च 'शबली' इत्येवं निष्पन्नं पदं शुद्धमस्ति। भाषायां तु पदमिदं प्रयोक्तव्यम्। वामनाचार्यस्यैवानुरूपं मतं दृश्यते - **''शबलादिभ्यः स्त्रियां टापोऽप्राप्तिः।''**(का.सू.वृ. ५/२/४५) वृत्तौ तु दृश्यते-

'उपस्रोतः स्वस्थस्थितमहिषश्रृङ्गाग्रशबलाः।

स्रवन्तीनां जाताः प्रमुदितविहङ्गास्तटभुवः'।।

'भ्रमरोत्करकल्माषाः कुसुमानां समृद्धयः'।

इत्यादिषु स्त्रियां टापोऽप्राप्तिः। 'अन्यतो ङीष्' इति ङीष् विधानात्। तेन शबली कल्माषीति भवति।''

५. कार्तिकीयः / कार्तिकिकः

'कार्तिकीयो नभस्वान्' इत्येवं प्रयोगस्तावत् संस्कृतभाषायां समीचीनोऽस्ति न वेति विषये महान् संशयो दृश्यते। अस्मिन् स्थले 'कार्तिक' इति शब्दः **''वृद्धिर्यस्याचामादिस्तद्वृद्धम्''**(१/१/७३)[10] इति सूत्रेण वृद्धसंज्ञाप्राप्तो भवति। कारणादस्मात् **''वृद्धाच्छः''**(४/२/११४)[11] इत्यनेनात्र 'कार्तिक' इति शब्दे शैषिकः छः प्रत्ययो भवति। तदनन्तरमनुबन्धलोपे, **''आयनेयीनीयियः फढखच्छघां प्रत्ययादीनाम्''**(७/१/२) इति सूत्रेण छ-प्रत्ययस्थाने इयादेशे च 'कार्तिकीय'-शब्दः निष्पद्यते। परन्तु इत्यत्र छ-प्रत्ययस्याभावः सदा वर्तते। 'कार्तिक' इति शब्दस्तावत् कालवाचकः। अतएव **''कालाट्ठञ्''**(४/३/११)[12] इति सूत्रेण कालविशेषवाचिनः कार्तिकप्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः। वृद्धसंज्ञकोऽपि अत्र बाध्यते। यथोक्तं काशिकायाम्-

''कालविशेषवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः। अणोऽपवादः। वृद्धात् तु छं परत्वाद् बाधते।''

अत एवात्र ठञ्-प्रत्यये, अनुबन्धलोपे, ''ठस्येकः''(७/३/५०) सूत्रेण ठञ्-प्रत्ययस्थाने इगादेशे, विभक्तिकार्ये च 'कार्तिकिकः'-पदस्य प्रयोगो भवति। पदमिदं तु समीचीनं व्याकरणसम्मतं च। भाषायां पदस्यास्य प्रयोगः खलु कर्तव्यः। कार्तिकीयस्य प्रयोगः न तु प्रमादविरहितः। एवमुक्तं वामनेन - ''कार्तिकीय इति ठञ् दुर्धरः।''(का.सू.वृ.५/२/४९) वृत्तौ अपि चोक्तम्- 'कार्तिकीय नभस्वान्' इत्यत्र 'कालाट्ठञ्' इति ठञ् दुर्धरः। ठञ भवन् दुःखेन ध्रियत इति। ''

६. दारवम् / दारुमयम्

'दारवं पात्रम्' इत्यस्मिन् वाक्ये प्रयुक्तं दारवं पदं तु अनुसन्धेयम्। 'दारुण इदम्' इत्येवमर्थे **''तस्येदम्''(४/३/१२०)**[13] इति सूत्रेण 'दारु' इति षष्ठ्यन्तप्रातिपदिकात् अण् प्रत्ययो विहितः। तदनन्तरमनुबन्धलोपे, यणसन्धौ, विभक्तियोगे च दारवं पदं गठितम्। व्याकरणशृङ्खलायां पदमिदं तु अशुद्धमस्ति। अस्मिन् स्थले **''तस्येदम्''**(४/३/१२०) इति सूत्रस्य प्रयोगः नैवोचितः। 'दारु' इति शब्दस्तावत् वृद्धसंज्ञकः। अतोऽत्र **''वृद्धाच्छः''**(४/२/११४) इत्यनेन छप्रत्ययस्य विधानमस्ति। अनेन छप्रत्ययेन पदमिदं तु दार्वीयं भविष्यति।

वस्तुतस्तु 'दारु' शब्दस्य वृद्धसंज्ञकत्वात् **''नित्यं वृद्धशरादिभ्यः''**(४/३/१४४)[14] इति सूत्रेणावयवार्थे नित्यं मयट् प्रत्ययो भविष्यति। अतएव मयट्-प्रत्ययकृतेऽनुबन्धलोपे विभक्तिकार्ये च 'दारुमयम्' इति पदं निष्पद्यते। पदमिदं तु शुद्धं भाषायां प्रयोक्तव्यं च। अपरं तु 'दारवम्' इति पदं वैयाकरणैः गर्हितम्। वामनाचार्येण एवं व्याख्या समर्थिता। 'काव्यालंकारसूत्रवृत्तिः' इति ग्रन्थे तेनोक्तम् - **''दारवशब्दो दुष्प्रयुक्तः।''**(का.सू.वृ.५/२/५३) सूत्रस्यास्य वृत्तौ अपि तेनोक्तम् - ''दारवं पात्रमिति दारवशब्दो दुष्प्रयुक्तः। 'नित्यं वृद्धशरादिभ्यः' इति मयटा भवितव्यम्। ननु विकारावयवोरर्थयोर्मयड् विधीयते। अत्र तु दारुण इदमिति विवक्षायां दारवमिति भविष्यति। नैतदेवम्। 'वृद्धाच्छः' इति च्छविधानात्।'' अतएव संस्कृतभाषायां 'दारुमयम्' इति पदं खलु शुद्धम्, अपितु 'दारवम्' इति पदमशुद्धमिति वक्तुं शक्यते।

७. अपाङ्गेनेत्रा / अपाङ्गनेत्रा

'अपाङ्गेनेत्रा' 'अपाङ्गनेत्रा' चेति संस्कृतपदद्वयस्य मध्ये शुद्धताविषये कश्चित् सन्देहः जायते। वामनाचार्येण पदद्वयस्य साधुत्वासाधुत्वं प्रदर्शितम्। 'अपाङ्गे नेत्रं यस्याः, सा' इत्यस्मिन् विग्रहे **''अनेकमन्यपदार्थे''(२/२/२४)** इति सूत्रेण 'अपाङ्गे' 'नेत्रम्' चेति समर्थसुबन्तपदद्वयस्य मध्ये बहुव्रीहिसमासो भवति। अनन्तरं **''सुपो धातुप्रातिपदिकयोः''(२/४/७१)** इत्यनेन समस्यमानपदद्वयस्य सुपः लोपप्राप्तिरासीत्। परन्तु **''अमूर्धमस्तकात्स्वाङ्गादकामे''(६/३/१२)**[15] इति सूत्रेण मूर्धमस्तकवर्जितात् स्वाङ्गादुत्तरस्याः सप्तम्या अकामे उत्तरपदेऽलुग् भविष्यति। अर्थात् 'अपाङ्गे' इत्यस्य सप्तम्या अलुगत्रो भवति। अतएव सप्तम्या अलुकि,

स्त्रियां टाप्-कृते 'अपाङ्गेनेत्रा' इति पदं गठितम्। पदमिदं तु व्याकरणदृष्ट्या शुद्धम्। अत्र सप्तम्याः लुक् कदापि न स्यात्। यस्मात् 'अपाङ्गनेत्रा' पदं तु नैव समीचीनम्। एवमेव वामनाचार्यस्याभिमतम् - ''अपाङ्गनेत्रेति लुगलभ्यः।''(का.सू.वृ.५/२/७०) वृत्तौ अपि तेनोक्तम् -''अपाङ्गे नेत्रं यस्याः सेयमपाङ्गनेत्रेत्यत्र लुगलभ्यः। 'अमूर्धमस्तकात्स्वाङ्गादकामे' इति सप्तम्या अलुग्विधानात्।'' अतएव भाषायां तु 'अपाङ्गेनेत्रा' इत्येवं शुद्धं पदमेव तावत् प्रयोक्तव्यम्।

८. निशम्य / निशमय्य

'निशम्य' 'निशमय्य' चेति शब्दद्वयं संस्कृतभाषायां बहुत्र परिदृश्यते। सामान्यदृष्ट्या तु शब्दद्वयस्य प्रयोगक्षेत्रे सन्देहो जायते। नि-उपसर्गपूर्वकात् दिवादेः शम्-धातोः **''समासेऽनञ्पूर्वे क्त्वो ल्यप्''(७/१/३७)**[16] इत्यनेन सूत्रेण ल्यप्-प्रत्यययोगे 'निशम्य' शब्दो निष्पन्नो भवति। तर्हि 'निशमय्य' इत्येवं पदं कथं सिद्ध्यते? विवक्षायामस्यामुच्यते, नि-उपसर्गपूर्वकात् शमेर्ण्यन्तात् क्त्वो ल्यपि कृते **''ल्यपि लघुपूर्वात्''(६/४/५६)**[17] इत्यनेन णेरयादेशः। एवं प्रकारेण 'निशमय्य' शब्दः निष्पद्यते। शब्दद्वयं तु श्रवणार्थकम्। तथापि उभयस्य मध्ये किञ्चिदन्तरं दृश्यते। पदद्वयेऽस्मिन् गणभेदः प्रकृतिभेदः वास्ति। प्रथमे पदे दिवादिगणीयः शम्-धातुरस्ति, द्वितीये तु अस्ति चुरादिगणीयः शम्-धातुः। प्रकृतिभेदादेव ईदृशी भिन्नता। एवं वैसादृश्यं प्रतिपादयितुं वामनाचार्येणोक्तम्-

''निशम्यनिशमय्यशब्दौ प्रकृतिभेदात् ।''(का.सू.वृ.५/२/७५)

किं बहुना, सूत्रस्यास्य वृतौ अपि स्पष्टीक्रियते तेन-

''निशम्य निशमय्येत्यतौ शब्दौ श्रुत्वेत्येतस्मिन्नर्थे। शमेः ल्यपि 'ल्यपि लघुपूर्वात्' इत्ययादेशे सति निशमय्येति भवितव्यम्, न निशम्येति। आह- प्रकृतिभेदात्। शमैर्दैवादिकस्य निशम्येति रूपम्। 'शमो दर्शने' इति चुरादौ णिचि मित्संज्ञकस्य निशमय्येति रूपम्।''

अपरं तु भट्टमल्लेनापि शब्दद्वयस्य मध्ये प्रकृतिगतभेदः एव विवक्षितः। तथोक्तं 'आख्यातचन्द्रिका' इत्यस्य ग्रन्थस्य प्रथमकाण्डस्य बुद्धिवर्गे भट्टमल्लेन-

''चष्टे छन्दसि सम्पश्यत्यात्मने स्यादकर्मकः ।
शृणोत्याकर्णयति च तद्वन्निशमयत्यपि ।।
निशाम्यतीति श्रवणे घ्राणे जिघ्रति शिङ्घति ।
स्पृशत्यामृशति स्पर्शे छुपत्यालभते च षट् ।।''[18]

अत एव व्याकरणदृष्ट्या पदद्वयमेव शुद्धम्। तथापि प्रकृतिगतभेदोऽत्र स्पष्टतया प्रकटितः। प्रकृतिभेदनिर्णयेऽस्मिन् वामनमतं तु न युक्तम्। 'कविप्रिया' इति वृत्तौ तु ''..'शमो दर्शने' इति चुरादौ णिचि

मित्संज्ञकस्य निशमय्येति रूपम्'' इत्येवं वामनेन कथितम्। परन्तु चुरादौ धातुरयं हि 'शम लक्ष आलोचने' इत्येवमर्थे पठितः, न तु दर्शने। तथाच धातोरस्य ''नान्ये मितोऽहेतौ''(गणसू.१९८) इत्यनेन मित्संज्ञा निषिद्धा भवति। तथोक्तं सिद्धान्तकौमुद्याम्-

''शम लक्ष आलोचने। 'नान्ये मितः-' इति मित्वनिषेधः।''[19]

वस्तुतः 'निशमय्य' इत्यत्र 'शम दर्शने' इत्येवं भ्वादिगणीयधातुस्तु युक्तः। भट्टोजिदीक्षितस्यापि एवमभिप्रायम्। यथोक्तं तेन सिद्धान्तकौमुद्याम्-

''शमो दर्शने। शाम्यतिर्दर्शने मिन्न स्यात्। निशामयति रूपम्। अन्यत्र तु 'प्रणयिनो निशमय्य वधूः कथाः'। कथं तर्हि 'निशामय तदुत्पत्तिं विस्तराद्गदतो मम' इति। शम आलोचने इति चौरादिकस्य। धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः, शाम्यतिवत्।'' [20]

अतएव वामनाचार्यस्येयं व्याख्या न तु प्रमादविरहिता।

९. गच्छती / गच्छन्ती

'हरति हि वनराजिर्गच्छती श्यामभावम्' इत्येवं संस्कृतवाक्ये गच्छतीति पदं तावदनुसन्धेयम्। 'गच्छत्' इति शतृप्रत्ययान्तात् क्लीवलिङ्गात् शब्दात् **''स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसो-साम्ङ्योस्सुप्''** (४/१/२) इति सूत्रेणात्र औ विभक्तियुक्तोऽस्ति। अनन्तरं 'गच्छत् औ' इत्यवस्थायां **''नपुंसकाच्च''**(७/१/१९) इति सूत्रेण औ-स्थाने शी आदेशो भवति। ततश्चानुबन्धलोपे **''शप्श्यनोर्नित्यम्''**(७/१/८१)[21] इत्यनेन नित्यं नुमागमे, नकारस्यानुस्वारे, परसवर्णे च गच्छन्ती पदं भवितव्यम्, न तु गच्छतीति। नुमागमस्यात्र निषेधः न भविष्यति। यथोक्तं वामनेन-

'गच्छतीप्रभृतिष्वनिषेध्यो नुम्' (का.सू.वृ.५/२/७९)

वृत्तौ अपि तेन चोक्तम्-

'हरति हि वनराजिर्गच्छती श्यामभावम्' इत्यादिषु गच्छतीप्रभृतिषु शब्देषु 'शप्श्यनोर्नित्यम्' इति नुमनिषेध्यो निषेद्धुमशक्यः।''

अतएव 'गच्छन्ती' इति पदं तावत् वाक्ये सुप्रयोक्तव्यम्, न तु गच्छतीति पदम्।

निष्कर्षः

''शब्दार्थौ सहितौ काव्यम्'' इति काव्यलक्षणमलंकारशास्त्रे प्रथितम्। रमणीयार्थप्रतिपादिक-शब्दैरेव सुचारुकाव्यं विनिर्मानं सम्भवति। शब्दचयने कवीनां सदा सतर्कता अवलम्बनीया। अन्यथा काव्यं हास्यास्पदं भविष्यति। व्याकरणशास्त्रे साधुशब्दज्ञानस्योपदेशः परिदृश्यते। अतएव सर्वेषां कवीनां कृते व्याकरणज्ञानम् अत्यावश्यकम्। वामनाचार्येणापि एवं मतं समुद्घोषितम् - ''शब्दस्मृतेः शब्दशुद्धिः।''(का.सू.वृ.१/३/४)

किं बहुना, काव्यालंकारसूत्रवृत्तौ तेनापि शब्दशुद्धिरालोचना कृता। अत्रापि सन्दिग्धशब्दानां व्याकरणदृष्ट्या साधुत्वासाधुत्वं प्रतिपादितम्। एवमालोचना तु विशुद्धा पाणिनीयव्याकरणानुसारी। अष्टाध्यायीस्थितानां सूत्राणामुल्लेखः तेन पदे पदे कृतः। वार्तिकस्य भाष्यस्य चोल्लेखोऽप्यत्र न दुर्लभः। तथापि इयमालोचना न तु सम्पूर्णा दोषरहिता। कदाचित् कुत्रचित् ईषदनवधानताऽपि दृश्यतेऽस्मिन् ग्रन्थे। 'निशमय्य' इत्येवं पदालोचने किञ्चित् प्रामादिकत्वं वयं पश्यामः। यद्यपि एवमनवधानता तावदतीव स्वल्पा। वस्तुतः व्याकरणशास्त्रेऽगाधं पाण्डित्यं विना एवं व्याकरणालोचना तु असम्भवा। अतएव संस्कृतभाषायाम् आलंकारिकः वामनाचार्यः खलु महावैयाकरणोऽप्यासीत्- इत्यत्र नास्ति संशयः।

****

अन्त्यटिप्पण्यः

1. ''शब्दस्मृतेः शब्दशुद्धिः''(का.सू.वृ.१/३/४) सूत्रस्य कविप्रियावृत्तिः।
2. पातञ्जलमहाभाष्यस्य पस्पशाह्निकम्।
3. ''वृक्षादीनां सप्तानां द्वन्द्वः, अश्ववडवेत्यादि द्वन्द्वत्रयं च प्राग्वद्वा।''(सि.कौ./समासप्रकरणम्)।
4. 'स्तृञ् आच्छादने', धा.पा.१२४३।
5. ''विपूर्वात् स्तृणातेर्घञ् स्यादशब्दविषये प्रथने।''(सि.कौ./उत्तरकृदन्तप्रकरणम्)।
6. ''अजन्ताङ्गस्य वृद्धिर्ञिति णिति च परे।''(ल.सि.कौ./अजन्तपुँल्लिङ्गाः)।
7. ''अन्यतो ङीष्''(४/१/४०) सूत्रस्य काशिकायाः न्यासटीका।
8. ''तोपधभिन्नाद्वर्णवाचिनोऽनुदात्तान्तात् प्रातिपदिकात् स्त्रियां ङीप् स्यात्।''(सि.कौ./स्त्रीप्रत्यय-प्रकरणम्)।
9. ''इवर्णान्तस्य अवर्णान्तस्य च भस्य इकारे परे तद्धिते च लोपो भवति।''(काशिकावृत्तिः)।
10. ''यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञं स्यात्।''(ल.सि.कौ./शैषिकाः)।
11. ''गोत्रे इति न अनुवर्तते। सामान्येन विधानम्। वृद्धात् प्रातिपदिकात् छः प्रत्ययो भवति शैषिकः।''(का.वृ.)।
12. ''कालविशेषवाचिनः प्रातिपदिकात् ठञ् प्रत्ययो भवति शैषिकः।''(का.वृ.)।
13. ''तस्येति षष्ठीसमर्थात् 'इदम्' इत्येतस्मिन्विषये यथाविहितं प्रत्ययो भवति।''(का.वृ.)।
14. 'भाषायामभक्ष्याच्छादनयोः' इत्येव। वृद्धेभ्यः प्रातिपदिकेभ्यः शरादिभ्यश्चाभक्ष्याच्छादनयोर्विकारा-वयवयोर्भाषायां विषये नित्यं मयट् प्रत्ययो भवति।''(का.वृ.)।
15. ''मूर्धमस्तकवर्जितात् स्वाङ्गादुत्तरस्याः सप्तम्या अकाम उत्तरपदेऽलुग्भवति।''(का.वृ.)।
16. ''समासेऽनञ्पूर्वे क्त्वा इत्येतस्य ल्यपित्ययमादेशो भवति।''(काशिकावृत्तिः)।
17. ''लघुपूर्वात्परस्य णेरयादेशः स्यात् ल्यपि।''(सि.कौ./उत्तरकृदन्तप्रकरणम्)।
18. आख्यातचन्द्रिका, १/२/५४-५५।

19. सिद्धान्तकौमुदी/चुरादिप्रकरणम्, मोतिलालबनारसीदाससंस्करणे पृ.३९८ द्रष्टव्या।

20. सिद्धान्तकौमुदी/भ्वादिप्रकरणम्, मोतिलालबनारसीदाससंस्करणे१९३ पृ. द्रष्टव्या।

21. "शप्श्यनोरात् परो यः शतुरवयवस्तदन्तस्य नित्यं नुम् शीनद्योः।"(ल.सि.कौ./हलन्तनपुंसक-लिङ्गाः)।

****

सहायकग्रन्थसूची

- त्रिपाठी, जयशङ्करलाल सुधाकरमालवीय च सम्पादकौ। काशिका (न्यास-पदमञ्जरी-भावबोधिनी-सहिता)। वाराणसी : तारा प्रिण्टिङ्ग वकर्स, प्रथमभागः १९८६, द्वितीयभागः १९८६, चतुर्थभागः१९८४।
- दूर्गाप्रसाद सम्पादकः। शिवदत्तेन वासुदेवेन च संशोधितम्। शिशुपालवधम्(सर्वङ्कषाटीका-समेतम्)। बोम्बे : निर्णयसागरप्रेस, १९०५।
- नगेन्द्र सम्पादकः। काव्यालंकारसूत्रवृत्तिः। दिल्ली : आत्माराम एण्ड संस, १९५४।
- भट्टाचार्य्य, तपनशङ्कर, सम्पादकः। लघुसिद्धान्तकौमुदी। कोलकाता : संस्कृत बुक डिपो, २००४।
- मिश्र, रमाशंकर, सम्पादकः। अष्टाध्यायीसूत्रपाठः। दिल्ली : मोतीलाल बनारसीदास, २००५।
- रङ्गनाथस्वामी, हरगोविन्द च सम्पादकौ। आख्यातचन्द्रिका। वाराणसी : चौखम्बा संस्कृत सीरीज आफीस, १९३६।
- शर्मा, गिरीधर, परमेश्वरानन्दशर्मा च सम्पादकौ। वैयाकरणसिद्धान्तकौमुदी(बालमनोरमा-तत्त्वबोधिनी-समेता)। दिल्ली : मोतीलाल बनारसीदासः, प्रथमभागः १९७७, द्वितीयभागः १९८२, तृतीयभागः १९७७, चतुर्थभागः १९७९।

****

Author's Detail

Name	:	DR. MRITYUNJAY GORAIN
Designation	:	Former Ph.D Research Scholar, Department of Sanskrit, pali & prakrit, Visva-Bharati, Santiniketan
Address	:	VILL.+POST- LIPANIA, P.S.- PARA, DIST.- PURULIA, STATE- WEST BENGAL, PIN- 723126
Email Id	:	mrityunjaygorain@gmail.com

जन्मना जातिः उत गुणैः

- डा. मल्लिकार्जुनः बि एस्

लेखसारः– इदानीन्तनकाले जगति धर्मवैषम्यं सर्वत्र दरीदृश्यते। सर्वे धर्माः स्वश्रेष्ठत्वे संख्यावृद्धौ च सर्वदा यतमानाः लक्ष्यन्ते। एते विचाराः एव कदाचित् जगतः विनाशाय हेतुभूताः भवन्ति वेति संशय उद्भवति। एतमेव विचारं सनातनधर्ममाधृत्य विचारयितुं पत्रेऽस्मिन् प्रयत्नः विहितोऽति। अत्र सनातनधर्मग्रन्थेषु उल्लिखिताः धर्मसम्बद्धविषयाः यथामति प्रस्तूयन्ते। धर्मलक्षणम्, वेदोक्तधर्मविचाराः, पुराणोक्तधर्मजातिविचाराः, वर्णानां विचाराः, रामायणमहाभारतादिग्रन्थोक्तवर्णविषयकोल्लेखः इति एतेषां पत्रेऽस्मिन् विमर्शःकृतः। एवं जातिः जन्मना दृढीक्रियते उत गुणैः इति विषयोऽपि अत्र यथाग्रन्थं विशदीक्रियते।

प्रमुखपदानि- जातिः, धर्मः, ग्रन्थः, वर्णः

****

प्रस्तावना-

विश्वेऽस्मिन् विविधधर्माः, जातयः, मतानि दृश्यन्ते ये मनुष्यसम्बन्धेषु वैरुध्योत्पादने यथाशक्ति स्वयोगदानं यच्छन्तः सन्ति। केचन धर्माः मानवकल्याणाय उपकुर्वन्तः तस्य उन्नत्यै एवं लोकसंग्रहाय च नितरां कार्यरताः सन्ति। किन्तु केचन स्वसंख्यावृद्ध्यै, स्वप्रसारणाय वा यतन्ते। अत्र भारतीयाः धर्माः विशिष्यन्ते यतः तेषां लक्ष्यमेव अतिश्रेष्ठं विशिष्टञ्चास्ति। अत्र धर्मस्य व्याख्यानमेव भिन्नमस्ति यथा-

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।

धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥१॥

अर्थात् धैर्य्यम्, क्षमागुणः, बाह्येन्द्रियाणां स्वविषयेभ्यः निवर्तनम्, स्वच्छता, इन्द्रियाणां नियन्त्रणम्, मतिः, विद्या, सत्यम्, अक्रोध इति एते दश गुणाः एवधर्म इत्याहुः। अत्र मानवीय गुणाः एव धर्मलक्षणमिति मन्यते न तु केचन देवाः अथवा धर्मप्रसारः संख्यावृद्धिः वा। एतदेव विचारं प्रमुखं मन्यमानाः भारतीयधर्मा विश्वशान्त्यर्थं यथाशक्ति प्रयतन्ते। किन्तु तत्र जातिव्यवस्था बाधकरूपेण वर्तते। किञ्च अन्ये धर्मा अपि एतमेव विषयं प्रमुखरूपेण प्रचारयन्तः भारतीयेषु भ्रमामुत्पादयन्ति। किमेषा जातिप्रथा सत्यं, भारते आबहोः कालादस्त्येषा प्रथेति विचारविमर्शः पत्रेऽस्मिन् क्रियते।

उद्देश्यम्– अद्यत्वे भारतं विविधमतधर्मजात्यादिभ्यः आक्रान्तं स्वप्रगत्यै एतेषाम् अवरोधम् अनुभवदस्ति। अतः प्राचीनकाले एतेषां स्थितिः कथमासीत्, एते कथं राष्ट्रस्य उन्नत्यै अवनत्यै वा कारणानि आसन् इति दर्शनम्।

पत्ररचना – पत्रमिदं विविधग्रन्थानामवलोकनं कृत्वा यथामति सनातनधर्मस्य सत्यत्वं विशदयितुं प्रस्तुतमस्ति।

यदा वयं धर्मादिविषयेषु जिज्ञासवः भूत्वा तदितिहासं ज्ञातुं प्रयतामहे तदा अनन्यगतिकाः वेदकालमेव प्रविशामः। तर्हि किं वेदे जातेः अथवा वर्णस्य उल्लेखः अस्ति इति संशयेन मन्त्राणाम् अवलोकनं कुर्मः तदा 'ब्राह्मणोऽस्य मुखमासीत्, बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यां शुद्रो अजायत' इति प्रसिद्धं पुरुषसूक्तमन्त्रं प्राप्नुमः। अत्र संशय उदेति यन्मन्त्रेऽस्मिञ्जातेः उल्लेखः अस्ति अथवा वर्णस्य। मन्त्रार्थः - ब्राह्मणः ब्रह्मणः मुखात्, क्षत्रियः बाहुभ्यां, वैश्यः ऊरुभ्याम्, एवं शूद्रः पादद्वयाच्च जाताः इति। अत्र ब्राह्मणस्य ब्रह्ममुखोद्भवात् श्रेष्ठत्वं शूद्रस्य तत्पादोद्भवात् कनिष्ठत्वं च सम्भाव्यते। तर्हि किमेतत्सत्यम्? इति। केचन विद्वांसः एतमेवार्थं समीचीनमिति बोधयन्तः जनेषु भ्रमम् उत्पादयन्ति। एतदर्थं भगवद्गीतायाः 'चातुर्वर्ण्यं मयासृष्टम्' इति श्लोकार्थमपि उपोद्बलकरूपेण यच्छन्ति। एवं जातिविषये महाभरतेऽपि –

ब्राह्मण्यमतिदुष्प्रापं वर्णैः क्षत्रादिभिस्त्रिभिः।
परं हि सर्वभूतानां स्थानमेतद्युधिष्ठिर ॥2

बह्वीस्तु संस्मरन्योनीः जायमानः पुनःपुनः।
पर्यायेनामकस्मिंश्चिद्ब्राह्मणो नाम जायते ॥3

श्लोकयोः ब्राह्मणजन्मनः श्रेष्ठत्वं सुस्पष्टं निरूपितमस्ति। ब्राह्मणजन्म अन्यजातिभ्य अपि कष्टेन प्राप्यते अतिश्रेष्टञ्चास्ति। किञ्च बहुयोनिषु विविधजन्म प्राप्य अन्ते ब्रह्मणजन्म प्राप्यते इति। एवमन्यत्रापि उक्तमस्ति यत् -

दुःशीलोऽपिद्विजः पूज्यो न शूद्रो विजितेन्द्रियः।
कः परित्यज्य दुष्टां गां दुहेच्छीलवतीं खरीम्॥

अर्थात् द्विजः दुर्गुणी अपि गौरवान्वितः भवति। किन्तु शूद्रः इन्द्रियजय्यपि नादरणीयः इति। मनुरपि अवोचत्-

अविद्वांश्च विद्वांश्च ब्राह्मणो दैवतं महत्।
प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥5॥

CC BY

एवं वेदस्मृत्यादिषु ब्राह्मणस्य श्रेष्ठत्वं दर्शयन्ति जातिप्रथा प्राचीनकालदासीदिति सम्भावयितुम् आग्रहं कुर्वन्ति एतानि प्रमाणानि।एवं ब्राह्मण्यं जन्मना एव सिध्यति न तु गुणैरिति। किन्तु कुत्रचिते वेदे एतेषां प्रमाणानां वैरुध्यमपि दृश्यते। यथा उपनिषदि सत्यकामाजाबालसंवादे यदा बालकः जाबालः अध्येतुम् इच्छन् स्वमातरं स्वगोत्रविषये पृच्छति तदा सा 'अहं यौवने बहूनां सेवामकरवम् अतः नाहं जाने किं गोत्रम्' इति। गुरुणा गोत्रविषये पृष्टः जाबालः यदा तदेवोत्तरमयच्छत्, तदा गुरुः 'अब्राह्मणः नैतद्वदति' इत्युक्त्वा तमुपनीय अध्यापनं करिष्यति। एतेन जातिः गुणाधारेण निश्चीयते इत्यपि वक्तुं शक्यते। एवमेव पुराणस्मृत्यादिष्वपि वर्णविचारः भिद्यते। यथा विष्णुभागवतपुराणे

यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम्।

यदन्यत्रापि दृश्यते तत्तेनैव विनिर्दिशेत्॥6

अर्थात् मनुष्यगुणैः वर्णः निर्धार्यते न जन्मना। यदि पितरौ एकवर्णस्य पुत्राणां च लक्षणं वर्णान्तरस्य दृश्यते तर्हि पुत्राः वर्णान्तरभुवः इत्येव निर्धारयितव्यः। एवं महाभारतस्य श्लोकान्तरे उच्यते यत्-

न योनिर्न संस्कारो न श्रुतं न च सन्ततिः।

कारणानि द्विजत्वस्य वृत्तमेवतु कारणम्॥ इति। अरण्य-३१३-१०८

अर्थात् स्वभावः एव ब्राह्मणत्वस्य कारणं न जन्म विद्या वेति। किञ्च-

सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा।

दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः।।८॥

शूद्रे तु यद्भवेल्लक्ष्यं द्विजे तच्च न विद्यते।

नैव शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥९॥

यत्रैतल्लक्ष्यते सर्ववृत्तं स ब्राह्मण स्मृतः।

यत्रनैतद्भवेत्सर्वतं शुद्रमिति निर्दिशेत् ॥ (अरण्य-१८०-२१-२५-२६)

अर्थात् उपर्युक्तसत्यदानादिगुणवन्तः ब्राह्मणाः नो चेत्ते शुद्राः इति गुणाधारेण वर्णाः निर्धारिताः।

इदानीन्तनकाले केचन अवेदविदः अननुष्ठानिकाः जन्मना ब्राह्मणाः सन्ति ते कीदृशाः इत्युच्यते श्लोकान्तरेण यत् –

यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः।

यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः ॥११॥

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।

स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥ (मनु-२/१५७/१६८)

अर्थात् ये जन्मना ब्राह्मणाः ते तन्नामधारकाः वस्तुतः ते अवेदविदः केवलशूद्राः एव यथाकाष्टेन निर्मितः गजः दर्शने गज इव दृश्यते न तु तस्य गज इव सामर्थ्यं भवति यथा वा चर्मनिर्मितः मृगः भयं नोत्पादयति तथा इति। वेदपुराणेतिहासस्मृत्यादिषु ऋषिराजशूद्रादयः अपि स्वगुणकारणात् ब्राह्मणाः बभूवुः इति जानीमः। यथा विश्वामित्रः, जनकः, विदुरः, रैक्वः इत्यादयः। विश्वामित्रः कथं स्वगुणकारणात् ब्रह्मर्षिः बभूवेति सम्यग्वर्णयति श्लोकोऽयम्। यथा-

गाधेरभून्महातेजाः समृद्ध इव पावकः।

तपसा क्षात्रमुत्सृज्य यो लेभे ब्रह्मवर्चसम् ॥१३॥

अर्थात् गाधेः नाम विश्वामित्रस्य अग्निरिव महातेजः तपसा अभवत् यः क्षत्रियजातिम् उत्सृज्य ब्रह्मवर्चसं प्राप्तवान्। पञ्चमवेदेति ख्याते महाभारते वर्णानां विचारः सुस्पष्टतयोल्लिखितः वर्तते। यथा –

न विशेषोऽस्ति वर्णानां सर्वं ब्रह्ममिदं जगत्।

ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम् ॥१४॥

श्लोकोऽयं एकः एव वर्णः स्वकर्मभिः भिन्नवर्णमापन्नः इति विशदयति। एष एव अर्थः 'चातुर्वर्ण्यं मया सृष्टं गुणकर्म विभागशः' इति गीताचार्येण अपि उक्तः। तर्हि कथमेते वर्णाः किं कारणेन भिन्नभिन्ननाम प्राप्नुवन्निति तत्रैवश्लोकसरण्याकथ्यते। यथा-

कर्मभोगप्रियाः तीक्ष्णाः क्रोधनाः प्रियसाहसाः।

शूरा वीराश्च रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः ॥१५॥

गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः।

वाणिज्यायानुतिष्ठन्ति ते द्विजाः वैश्यतां गताः ॥१६॥

हिंसानृतप्रियालुब्धाः सर्वकर्मोपजीविनः।

कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥१७॥

अर्थात् ये द्विजाः कर्मकुशलाः साहसिनः शूराः ते क्षत्रियत्वं, ये कृषिकर्मप्रियाः वाणिज्ये उत्साहिनः च ते वैश्यत्वं, ये हिंसाकार्यप्रियाः लोभिनः सर्वेभ्यः उपचिकीर्षवः च ते शूद्रत्वं गताः। एवं ब्रह्मणा एक एव वर्णः सृष्टः किन्तु स स्वगुणकर्मकारणाद् भिन्नरूपं प्राप्तवानिति एते श्लोकाः सम्यङ्निरूपयन्ति।

उपसंहारः

एवं ब्राह्मणक्षत्रियवैश्यशूद्राः इति जातिवाचकपदानि कर्मभिः एव निर्धारयितव्याः न तु जन्मना इति विश्वासेन विवक्षामः। एवम् अस्माभिः पूज्यमानाः रामकृष्णवाल्मीकिव्यासविदुरादयः न तु जन्मना ब्राह्मणाः किन्तु स्वगुणैः कर्मभिः च पूज्याः अभवन्निति निस्सन्देहं वदामः। विश्वस्य सर्वेष्वपि धर्मेषु भिन्नभिन्नजातयः

सन्ति। एवं ते स्वसंख्यासामर्थ्यवृद्धौ एव सदा कार्यरताः सन्ति। किन्तु भारतस्य सनातनधर्मः धर्मार्थकाममोक्षेति पुरुषचतुष्टयं मनुष्यलक्ष्यमिति विधाय तस्य जीवनस्य सार्थक्याय सर्वदा तं प्रेरयति। अतः जातिवर्णनाम्ना परस्परं कलहः श्रेष्ठस्य सनातनधर्मस्य नाशाय कल्पते इति वक्तुं शक्नुमः। पत्रेणानेन 'स्वधर्मे निधनं श्रेय" इति गीताचार्यवचनं स्वसनातनधर्मस्य उन्नत्यै एवोक्तमिति मत्वा तत्सम्पादनाय प्रयत्नंकुर्मः इति निवेद्यते॥

<u>सन्दर्भसूची –</u>

१. मनुस्मृतिः

२. महाभारतम्

३. महाभारतम्

४. चातुर्वर्ण्यभारतसमीक्षा

५. मनुस्मृतिः

६. विष्णुभागवतम्

७-१०. महाभारतम्

११-१२. मनुस्मृतिः

१३.भागवतम्

१४. महाभारतम्

१५-१७. महाभारतम्

****

<u>Author's Detail</u>

Name	:	DR. MALLIKARJUN B S
Designation	:	Department of Sanskrit, Jnanaharati campus
Address	:	Bangalore University
Email Id	:	Malli.2006@gmail.com

तामिलसाहित्ये संस्कृतस्य प्रभावः – पर्यवेक्षणमेकम्

- मौसुमीरायः

निर्यासः - भारतवर्षस्य सुविशाले परिसरे एकतो यथा भारतीयार्यभाषासम्भूतानि संस्कृत-पालिप्राकृतादिसाहित्यानि संदृश्यन्ते, तथैव द्राविडभाषावंशात् समुद्भूतानि तामिल-तेलेगु-मळयाळ-कन्नडादिभाषासाहित्यानि। संस्कृतमिव तामिलभाषापि सुप्राचीना। तामिलभाषया रचितेषु कोष-व्याकरण-सङ्गम-अनुवादसाहित्येषु संस्कृतसाहित्यस्य व्यापकतया प्रभावः अस्माभिर्लक्ष्यते खीष्टपूर्वयुगात्। विशेषेण, तामिलभाषासाहित्यस्य ध्रुपदीरूपे सङ्गमसाहित्ये बहुत्रैव कालिदासादीनां महाकवीनां काव्यशैल्याः सुमहान् प्रभावो लक्ष्यते। किञ्च, प्राचीने तामिलसाहित्ये तु वैदिकसंस्कृतशब्दानां प्रभावः प्रयोगश्च लक्ष्येते। चोलराजवंशस्य शासनकाले अनुवादेन उत्तरभारतीयसाहित्यधारायाः प्रभावः स्वीकृतः कम्बर्-ओट्टकूत्तर्-पुगळेन्तिनामभिः तामिलकविभिः। एतैः कविभिस्तामिलभाषायां काव्यानि संस्कृतप्रभावभावितानि ग्रथितानि। एतदपि सत्यं केचित् संस्कृतशब्दाः तामिलभाषागर्भाः अपि अधिकाधिकाः तामिलशब्दाः संस्कृतभाषातो समुद्भूता इत्यत्र नास्ति संशयः।

कूटशब्दाः – संस्कृतम्, तामिलसाहित्यम्, व्याकरणम्, सङ्गमसाहित्यञ्चेति।

****

।। सम्पूर्णप्रबन्धः।।

सुविशालोऽस्माकं देशो भारतवर्षम्। इह देशे यथा बह्व्यो भाषास्तथैव बहूनि साहित्यानि दृश्यन्ते। भारतवर्षे साधारणदृष्ट्या भाषावंशद्वितयं विलसति – उत्तरस्यां भारतीयार्यभाषावंशः दक्षिणांशे च द्राविडीयभाषावंशश्चेति। उत्तर-दक्षिणयोर्मध्यभागे दण्डायमाना विन्ध्यगिरिः यद्यपि स्थानगतां भेदरेखां निरूपयति, तथापि साहित्य-संस्कृतगतो मिलनमार्गः कदापि एव नावरुद्धः। भारतवर्षस्य सुविशाले परिसरे एकतो यथा भारतीयार्यभाषासम्भूतानि संस्कृत-पालिप्राकृतादिसाहित्यानि विद्यमानानि संदृश्यन्ते, तथैव द्राविडभाषावंशात् समुद्भूतानि तामिल-तेलेगु-मळयाळ-कन्नडादिभाषासाहित्यानि। किन्तु सर्वभारतीयभाषासु संस्कृतं तावत् पृथिव्याः सर्वापेक्षया प्राचीनतमा भाषा इति निश्चप्रचम्। एकदा आसमुद्रहिमाचले सर्वे मनुजाः संस्कृतभाषया कथयन्ति स्म। वेद-रामायण-महाभारत-ध्रुपदीसंस्कृतसाहित्यानि तथा च न्यायादिशास्त्राणीति सर्वाणि भाषाया अस्या अमूल्यसम्पदः। परम् परितापस्य विषयोऽयं यद् एकविंशशताब्द्याः द्वारि समागतेऽपि संस्कृतं मृतप्राया भाषेति अन्याय्यतया संश्रूयन्ते। संस्कृतविद्वेषिणां वक्तव्यस्यास्य नास्ति कापि सारवत्ता। परमेतत् स्मर्तव्यं यत् संस्कृतं न मृता न वा म्रियते न च स्मरिष्यतीति। अनया सुप्राचीनभाषया प्रादेशिक-

साहित्यानि नाम हिन्दी-असमीया-ओडिया-मळयाळ-तामिलादिसाहित्यानि बहुलांशेन प्रभावितानि। '*A History of Indian Literature*' इति ग्रन्थे शिशिरकुमारदासः तामिलसाहित्ये संस्कृतस्य प्रभावकारणं स्पष्टतया कथयन्नाह - "Dravidian languages ....Were confined to a particular region and not understood much beyond their geographical boundaries. Sanskrit, *Prakrit* and *Apabhramsa* languages on the other hand, had a greater area of operations, and Sanskrit in particular was the most widely spread language, though it was confined to the educated class, especially the Brahmins. Its harmony was conceded by all the religions groups and it was taught and cultivated all over India, including Tamilnadu which had several centres of Sanskritic education".

तामिलभाषया रचितेषु कोष-व्याकरण-सङ्गम-अनुवादसाहित्येषु संस्कृतसाहित्यस्य व्यापकतया प्रभावः अस्माभिर्लक्ष्यते खीष्टपूर्वयुगात्। दिङ्मात्रम् उदाह्रियते –

क) तामिलकोषग्रन्थः –

तामिलभाषायां रचितौ द्वौ कोषग्रन्थौ तावत् '*चिन्तर तिवाकरम्*' '*पिङ्गलनिकण्टु*' चेति। अत्रेदम् उल्लेख्यं यत् निकण्टुशब्दः वैदिककोषग्रन्थेन यास्ककृतेन निरुक्तेन प्रभावितः। '*पिङ्गल निकण्टु*' इति कोषग्रन्थः यास्कस्य निरुक्तस्य तामिलरूप इति मन्यते।

ख) तामिलव्याकरणग्रन्थः –

संस्कृते पाणिनेरष्टाध्यायीं विहाय भारतीयभाषासु केवलं तामिलभाषायां सर्वप्रथममेव व्याकरणग्रन्थो रचितोऽभूत्। ग्रन्थनाम तावत् तोलकाप्पियर्-कृतं (Tolkappiyar) '*तोलकाप्पियम्*' (Tolkappiyam) इति। ग्रन्थोऽयं खीष्टपूर्वे द्वितीये शतके रचितः। इतःपूर्वं केवलम् अष्टाध्यायीति ग्रन्थो विरचितो भारतवर्षे । तस्मात् तामिलव्याकरणं मूलतः पाणिनेः अष्टाध्याय्या अनुकरणेन शैल्या च ग्रथितम्। ग्रन्थकृत् तामिलभाषया समं स्वतन्त्रभावेन संस्कृतशब्दानां मिश्रणेन ग्रन्थमिमं विलक्षणतया च निर्मांति स्म। तन्मते, शब्दश्चतुर्विध – इयरकोल(Iyarcol)-तिरिकोल(Tiricol)-तिचइक्कोल(Ticaiccol)-वटकोल(Vatacol)भेदात्। शब्दचतुष्टयमध्ये वटकोलशब्दः संस्कृतस्य विटकशब्दस्य परिवर्तितं रूपम्, परम् इयरकोलनाम शब्दो मन्ये कश्चन देशीयशब्दः।

तोलकाप्पियर् इति व्याकरणं विना तामिल-संस्कृतव्याकरणयोः समन्वयो लक्ष्यते – (क) '*वीरचोलीयम्*' (Viracoliyam) (ख) '*पिरयोगविवेकम्*' (Pirayokavivekam) (ग) '*इलक्कनक्कोट्टु*' (Ilakkanakkottu) चेति व्याकरणग्रन्थत्रितये। प्रसङ्गत उल्लेख्यं यत् विवेकम् इति शब्दबन्धः संस्कृतगर्भः।

ग) सङ्गमसाहित्यम् –

संस्कृतसाहित्यस्य विपुलः प्रभावः संलक्ष्यते तामिलसाहित्यान्तर्गते सङ्गमसाहित्ये। तामिलसाहित्यस्य ध्रुपदीरूपं (Classical Form) तावत् सङ्गमसाहित्यम्। सङ्गमसाहित्ये प्रायः सप्तत्युत्तरत्रिशताधिकसंख्यकाः कवयः समासन्। खीष्टपूर्वात् तृतीयात् खीष्टाब्दस्य प्रथमशतकस्यान्तर्वर्तिनि समये साहित्यस्यास्योद्भवः क्रमविकासश्चेति अभवत्। प्रसङ्गतः उल्लेख्यं यत् सङ्गमसाहित्यात् पूर्वमेव भास-कालिदासौ स्वकारयितृप्रतिभया काव्यनाटकादीनि रचितवन्तौ। स्वाभाविकगत्या सङ्गमसाहित्ये कालिदासीयशैल्याः प्रभावो वरीवर्ति। किञ्चोल्लेखार्हं यत् सङ्गमसाहित्यस्य अङ्गद्वयम् – आगम्, पुरम् चेति। 'आगम्' इति शब्दार्थस्तामिलभाषायां श्रृङ्गारात्मकं पद्यम्। वीररसात्मकं पद्यं खलु 'पुरम्' इति शब्दार्थः। प्राचीनसंस्कृतसाहित्ये यथा श्रृङ्गार-वीररसयोः प्राधान्यं तथैव सङ्गमसाहित्ये। सङ्गमसाहित्यस्यास्य बहूनि काव्यनाटकादीनि कालिदासस्य रघुवंश-मेघदूत-कुमारसम्भवानाम् अनुकरणात्मकानि।

तामिलसाहित्यस्योल्लेख्यं साहित्यकर्म त्रयम् – (क) '*देवारम्*'[1] (देवमालिका) (ख) '*नालायिरदिव्यप्रबन्धः*'[2] (ग) '*श्रीमद्भागवतं*'[3] चेति। सङ्गमसाहित्यस्य संकलितं तामिलग्रन्थरत्नम् – '*आचारक्कोवै*' (Acarakkovai), रचयिता च खलु मुल्लियर् वेङ्कयट्टूर् महाभागः। ग्रन्थस्यास्य वस्तु हिन्दूनां विविधरीति-नीति-आचाराचरणादिकम्। इह ग्रन्थे अस्माकं संस्कृतस्य धर्मसूत्र-गृह्यसूत्रयोः प्रभावो वर्तत इति मामकी मतिः। पुनश्च, '*सिरप्पुपायिरम्*' (Cirappuppariyam) इति साहित्यग्रन्थादौ शपथपूर्वकं समुल्लिखितं यत् इह ग्रन्थे बौधायन-हारित-पराशरादिधर्मशास्त्राणि, आपस्तम्बगृह्यसूत्रम्, धर्मसूत्रञ्च, मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, ऊशन्-संहिता, विष्णुपुराणञ्चेति ग्रन्थेभ्यः तथ्यानि समाकलितानि। महदाश्चर्यावहं यत् पूर्वोक्तेभ्यः संस्कृतधर्मशास्त्रीयग्रन्थेभ्यः उद्धृतीः आमूलचूडं तामिलभाषया अनूदिताः।

तामिलसाहित्यस्यापरमेकं गुरुत्ववहं साहित्यिकमुपादानं खलु तिरुवल्लुवर्-कृतं '*तिरुक्कुरल*' (Tirukkurala) इति गीतिकाव्यम्। तिरुशब्दार्थः तामिलभाषायां सुन्दरमिति, क्कुरलशब्दस्य पद्यमित्यर्थश्चेति। ग्रन्थोऽयं पञ्चमशताब्द्याः कृतिरिति तामिलसाहित्यसमालोचकानां नयः। अस्मिन् पद्यकाव्ये काव्यरचनाच्छलेन कविः तिरुवल्लुवर्-महोदयः दर्शन-धर्म-अर्थ-कामशास्त्रीयतत्त्वानि परिवेशितवान्। विशेषधर्मि काव्यमिदं संस्कृतसाहित्ये रूपकधर्मिसाहित्यस्यान्तर्गतम्। स्मरणीयं यत् तिरुक्कुरल् इति ग्रन्थरत्नस्य रचनायाः पूर्वमेव तु संस्कृतस्य विंशतिः धर्मशास्त्राणि, वात्स्यायनस्य कामशास्त्रं

---

[1] शैवनायनमारसाधुना रचितं कवितासंकलनम् काव्यमिदं *तिवारम्*।

[2] आलवारसाधुना ग्रथितं वैष्णवगीतिसञ्चयनम् *नलयिरदिव्यप्रबन्धः*।

[3] अद्वैतवादेन समं कृष्णभक्त्याः संमिश्रणेन लिखितं *श्रीमद्भागवतम् इति* आलवार-नायनसम्प्रदाययोः श्रेष्ठो भक्तिग्रन्थः इति प्रसिद्धिः।

CC BY

कौटिल्यीयार्थशास्त्रश्चेति रचितानि । कविताग्रन्थस्यांशत्रयम् – ‘अरम् (धर्मः), ‘पोरुळ् (अर्थः), ‘इन्बम् (कामः)’ चेति। अत्रेदम् उल्लेख्यं यत् अरम्-शब्दस्य तामिलभाषायाम् अर्थस्तावत् धर्मः, पोरुळ्-शब्दार्थः खलु अर्थः, इन्बम् इति शब्दः कामार्थवाचकश्च। अर्थात् काव्येऽस्मिन् धर्मार्थकामसम्बन्धीया साधारणगृहस्थमानवानां तत्त्वावली रूपकाश्रयेण परिवेशिता। ननु परमपुरुषार्थं मोक्षं कथं रचयिता न स्थानं ददौ इति चेदुच्यते मोक्षतत्त्वं सुतरां दुरवगाहं रहस्यावृतं बोधातीतञ्चेति। तथाहि मन्ये गृहस्थमानवानां कृते बोधगम्यानां धर्मार्थकामसम्बन्धितत्त्वानां समुल्लेखो विहितः कविना।

तामिलभाषया रचितं प्राचीनं महाकाव्यद्वयम् – ‘*सिलप्पधिकारम्*’ (Cilappatikaram) ‘*मणिमेखलै*’ (Manimekalai) चेति। उभे काव्ये त्रिंशत्सर्गविशिष्टे। प्रतिसर्गं *कथै* इति (Katai) नामधेयम्, संस्कृतायितं रूपं गाथा अस्य। आश्चर्यजनकं तथ्यमिदं यत् ‘*सिलप्पधिकारम्*’ शीर्षकस्य महाकाव्यस्य तृतीयसर्गः सम्पूर्णतया भरतस्य नाट्यशास्त्रानुकरणात्मकः, परं पञ्चदशतमः सर्गः पञ्चतन्त्रकथासाहित्यस्यानुरूपः। त्रयोविंशति-षड्विंशतितमौ सर्गौ यथाक्रमं ज्योतिर्विज्ञान-ज्योतिःशास्त्रयोर्ज्ञानसमृद्धौ। अतः अनुमेयमेतत् यत् प्रथमं महाकाव्यं संस्कृतसाहित्येन बहुधा ऋद्धम्। किञ्च, ‘*मणिमेखलै*’ नामधेयस्य काव्यस्य सप्तविंशतितमः सर्गः सम्पूर्णतया दार्शनिकतत्त्वाधारेण निर्मितः। वेदान्त-सांख्य-वैशेषिक-वैष्णव-भूतवाद-शैवादिवादानां दार्शनिकतत्त्वानाम् एकत्र सम्मेलनं तावत् *मणिमेखलै* काव्यस्यायं सर्गः। अनुमान-हेत्वाभास-स्वधर्मदृष्टान्त-वैधर्मस्वरूपाणां दर्शनशास्त्रीयपारिभाषिकशब्दानां प्रयोगो दृश्यते ऊनविंशतितमे सर्गे।

शैवभक्तिवादस्य नव्यधारायाः श्रेष्ठो व्याख्याकृत् मेय्-कण्डदेवर्, यः ‘*शिव-ज्ञान-बोधम्*’’ इति शास्त्रीयं ग्रन्थं व्यरचयत्। *शिव-ज्ञान-बोधम्* इति ग्रन्थस्य संस्कृतभाषान्तरं तावत् शिवज्ञानबोधः। कविः अरुणन्दिमहोदयेन ‘*शिव-ज्ञान-सिद्धियार्*’ इति शैवदर्शनशास्त्रीयो ग्रन्थो रचितः प्राचीनशैवसिद्धान्तान् न्यायशास्त्रसम्मततया परिवर्त्य। अष्टादशशताब्दीं यावत् शिवभक्तिवादधारा तामिलसाहित्यं बहुधा प्रभावयतितराम्। अस्मिन् युगे विल्लिप्पुत्तुवरः नामकः वैष्णवकविः महाभारतस्यांशिकम् अनुवादञ्चकार। तामिलकवेः पराणज्योतिमहाभागस्य अन्यतमं विरचनं ‘*वेदारण्यपुराणम्*’ इति।

प्राचीने तामिलसाहित्ये तु वैदिकसंस्कृतशब्दानां प्रभावः प्रयोगश्च लक्ष्येते। तद्यथा अभि (तामिलशब्दः) > हविस् (वैदिकम्), अभुति (तामिलशब्दः) > आहुतिः (वै.श.), तुन (ता.) > ष्ठुन् (वै.), तभम् (ता.) > तपः (वै.) चेति। अर्थात् सङ्गमसाहित्यकाले भारतवर्षे वैदिकशब्दानां प्रयोगोऽभूदिति तामिलभाषातात्त्विका आमनन्ति।

अपि च, साधारणसामाजिकजीवने व्यवहृतैः बहुसंस्कृतशब्दैः (तद्यथा लोकम् (सं) > उलकम् (तामिल.), मण्डलम् (सं) > मण्डलम् (ता.), बन्धः (सं) > बन्धम्(ता.)) तामिलभाषया रचितं सङ्गमसाहित्यं बहुधा पुष्टम् अभूत्।

किन्तु एतदपि सत्यं यत् केचित् ऋग्वैदिकाः शब्दाः संस्कृतस्य स्वीयरूपं वेति तामिलव्याकरणमुपरि निर्भरीकृत्य निर्मितमिति मतं भाषातत्त्वविदाम्। T. Jacob इति प्राबन्धिकस्तस्य *'Tamil and its influence over Sanskrit*[4] इति प्रबन्धे विषयमादाय स्वकम् अभिमतं प्रस्तौति । वितर्कितोऽयं विषयोऽपि उदाहरणैः परिष्क्रियते – काव्यम् (संस्कृतम्) > काप्पियम् (Kaappiyam) > काप्पु (Kaappu, अर्थः – संरक्षणम्) > इयम् (iyam) साहित्यम् चेति। वेदस्य बहवः शब्दाः तामिलभाषातः समुद्भूताः तथा च नैके शब्दा एव तामिलभाषया समं सुपरिचिताः। यतः तामिलभाषागर्भेषु शब्देषु विभक्तेषु सत्सु ते शब्दाः क्रियामेव व्याख्यान्ति। किन्तु नैकेषु स्थलेषु संस्कृतशब्दानां व्यवच्छेदं विधाय व्याख्यायामपि नार्थः परिष्कृतो भवति। कारणमस्य यत् एते शब्दाः तामिलशब्दभाण्डारान्तर्गता अपि संस्कृतस्पर्शात् सज्जिता अभवन्[5]।

घ) अलंकारशास्त्रम् –

संस्कृतालंकारशास्त्रस्यान्यतमो गुरुत्ववहो ग्रन्थस्तावत् आनन्दवर्धनकृतो ध्वन्यालोकः। ध्वनिप्रस्थानस्योपजीव्यस्य ग्रन्थस्य ध्वन्यालोकस्यानुसरणेन तामिलभाषायां रचितं *ध्वनिविलोकम्* इति। ध्वनेः प्रभेदान् व्याकर्तुं वस्तुध्वनितः प्रतीयमानार्थस्य भिन्नत्वञ्च प्रतिपादयितुं ग्रन्थकृत् क्षुद्रादिक्षुद्राः तामिलभाषया कविताः ग्रथितवान्। सुब्रह्मण्यशास्त्री तिरुच्चिरापल्लीतः 1944 ईशवीयाब्दे ग्रन्थस्यास्य संस्करणमेकं प्रकाशितवान्। अतः ध्वन्यालोकग्रन्थस्य प्रभावः प्रादेशिकसाहित्ये तथा च प्राचीनद्राविडीयभाषागोष्ठ्यन्तर्गते तामिलसाहित्ये अनस्वीकार्यः।

ङ) अनुवादसाहित्यम् –

भारतवर्षस्य प्रादेशिकसाहित्ये रामायण-महाभारतयोः प्रभावः प्रायेण अनस्वीकार्यः। तामिलभाषा अत्यन्तं प्राचीनापि अस्मिन् भाषासाहित्ये अपि महाभारत-पुराणसाहित्ययोस्तरङ्गाघातः परिलक्षितः।

---

[4] कृपया द्रष्टव्यम्, 'www.academia.edu › Tamil_and_its_influence_over_sanskrit'

[5] The basic structure of Sanskrit itself is based on tamil. I have interpreted some of the words in rig Veda for this explanation. 1. poosha - poosei = poo (flower) + sei (offer) the Tamil word posei became poosha in sanskrit. 2. kavya - kaapiyam = kaappu (preserve) + iyam (literature) 3. pusthaka - pothagam = pothi (stuff) + agam (mind) 4. manthra - manthiram = mana(mind) + thiram (skill) like this many words of Rig Veda has been derived from tamil. Actually if you read Sanskrit you will find almost all words are familiar to Tamil. As Tamil has always created words that explains the action when those words are split. If you split the Sanskrit words and try to explain them in Sanskrit it gives no meaning. Because they are actually Tamil words which are decorated with Sanskrit touch.

उदाहरणत्वेन वक्तुम् अलं यत् '*रामचरितम्*' इति ग्रन्थो न केवलं मळयाळ-भाषायां, अपि च तामिलभाषायां रचितः। वाल्मीकेः रामायणस्य भावानुवादस्तावत् साहित्यकीर्तिरयम्।

चोलराजवंशस्य शासनकाले अनुवादेन उत्तरभारतीयसाहित्यधारायाः प्रभावः स्वीकृतः कम्बर्-ओट्टकूत्तर्-पुगळेन्तिनामभिः कविभिः। कम्बर्कविः तामिलभाषायां रामायणम् अनूदितवान्। परं सर्वक्षेत्रेषु वाल्मीकिस्तेनानुसृतः। कवेः कम्बराचार्यस्य मौलिकत्वं प्रशंसार्हम्। अपरतः कविः ओट्टकूत्तर्-वर्यः रामायणस्य उत्तरकाण्डस्यानुवादञ्चकार तामिलभाषायाम्। अपि च कविः पुगळेन्तिः महाभारतस्य आंशिकम् अनुवादं कृत्वा सृजनीशक्त्या परिचयं प्रादात्। पुगळेन्तिकविना रचिता '*नलवेन्पा*' इति नलदमयन्तीकथा प्रसिद्धिं गता।

परिशेषे वक्तव्यं यत् संस्कृतं भारतवर्षस्य सर्वासां भाषाणाम् उत्सरूपम्। परं याश्च सर्वा भाषाः संस्कृतान्न हि सृष्टाः, ता अपि संस्कृतस्य रससिञ्चनेन उपादानग्रहणेन च निरवच्छिन्नरूपेण पुष्टाः ऋद्धाश्च सत्यविकासं साधितवत्यः। मया प्रबन्धादौ प्रतिज्ञावाक्यरूपेण कथितं यत् 'संस्कृतं न मृता न म्रियते न च मरिष्यति' इति। अन्ततो सिद्धान्तयितुमलं यत् यया भाषया प्रादेशिकभाषाः पुष्टाः विकसिताः, सा कथमपि मृता मृतप्राया वा भवितुं नार्हतीति शिवम्॥

****

परिशीलिता ग्रन्थावली

- Das, Sisir Kumar - *A History of Indian Literature*, New Delhi, Sahitya Academi, 2005.
- Dikshitar, Ramachandra - *Studies In Tamil Literature And History*, Klempner Press, 2007.
- https://qz.com/india/965283/a-biography-of-the-tamil-language-reveals-its-influence-on-sanskrit-and-hebrew/
- www.britannica.com › art › shangam-literature
- www.myindiamyglory.com › 2019/03/22 › influence-of-sanskrit-on-tamil-language-and-literature/

****

Author's Detail

Name	:	Mousumi Roy
Designation	:	Researcher, Dept. of Sanskrit
Address	:	Ravindra Bharati University, Kolkata
Email Id	:	mousumiroy123malda@gmail.com

पण्डित-ओगेटि-परीक्षित् -शर्मरचित- श्रीमत्प्रतापराणायणस्यानुशीलनम्

- श्रिष्टि लक्ष्मीधरशर्मा

शोधपत्रसारः

नवत्युत्तरएकोनविंशतितमे (1990)वत्सरे संस्कृतविभागे केन्द्रीय साहित्य अकाडमी पुरस्कारग्रहीतुः मान्यश्री पण्डित-ओगेटि-परीक्षितशर्मणः जीवितविशेषाणाम्, तत्पुरस्काराय चिनुतस्य ग्रन्थराजस्य श्रीमत्प्रतापराणायणमहाकाव्यस्य कतिपयविशेषाणां च समाचारसम्पादकतया इदं पत्रं प्रकाश्यते।

****

- **श्रीपरीक्षितशर्मणां जीवितविशेषाः**

पण्डित. ओगेटि. परीक्षितशर्माणः(1930) त्रिंशदुत्तरएकोनविंशतितमे वर्षे, अगष्ट् मासस्य विंशति तिथौ जाताः। महाराष्ट्रे,पूनानगरे, सकल् नगर्, बेनार् रोड् - तेषां निवासभूमिः। एतेषां मातृभाषा तेलुगु, साम्प्रदायिकभाषा संस्कृतम्। एते आंग्ल-हिन्दी-मराठी भाषासु समग्रं प्रावीणयम् सम्पादितवन्तः। एते, आन्ध्रविश्वविद्यालयतः भाषाप्रवीणेति उपाधिम्, बेनारस् हिन्दूविश्वविद्यालयतः संस्कृत-आंग्ल-हिन्दीभाषासु B.A., इति उपाधिम्, मुम्बई विश्वविद्यालयतः संस्कृत-प्राकृत-आंग्लभाषासु M.A., इति उपाधिं च प्राप्तवन्तः। एते जर्नलिजम् अपि अधीतवन्तः।

स्वीयग्रन्थस्य यशोधरा महाकाव्यस्य (1976) षट् सप्तत्युत्तरएकोनविंशतितमे वर्षे, मध्यप्रदेश् प्रभुत्वम् अखिल भारतीय कालिदास पुरस्कारं प्राकटयत्।ततः (1990)नवत्युत्तरएकोनविंशतितमे वत्सरे,श्रीमत् प्रताप--राणायणमहाकाव्यस्य, केन्द्रप्रभुत्वम् , साहित्य-अकाडमी पुरस्कारं उदघोषयत्। एते विद्वद्भिः साहित्यविमर्शकैः, पण्डितः, महाकविः, गीर्वाण गेयकविमण्डलचक्रवर्ती इति एवम् आदिभिः प्रमुखैः बिरुदैः सम्मानिताः।विंशति वर्षाणि यावत्, मुम्बई - मद्रास् इत्येवं विभिन्नप्रदेशेषु, भिन्न भिन्न संस्थासु, भिन्न भिन्नभाषासु,विद्याबोधनं कृतवन्तः। महाराष्ट्रप्रभुत्वे डिविजनल् असिस्टॆन्ट् डैरॆक्टर् रूपेणाऽपि कृत्वा,पदवीविरमणं प्राप्ताः। आंग्ल-वार्तापत्रिकायां कतिपय मासानि रिपोर्टर् रूपेणापि कर्म अनुष्ठितवन्तः। मुम्बाईतः प्रकाश्यमानायां फ्री प्रेस् जर्नल् पत्रिकायां एते, संस्कृतनाटकप्रयोगाणां वार्ताः-विश्लेषणानि च लिखितवन्तः।बहुवर्षाणि यावत्, पाठ्यभागान् निर्णेतुं महाराष्ट्र S.S.C बोर्ड संस्थापिते दक्षिणभारतीय-भाषाध्ययन सदसि सभ्यत्वेन पदवीम् अलङ्कृत्य, संस्कृतभाषां सामान्यजनान् प्रापयितुं प्रयत्नान् विहितवन्तः।

स्वदेशे विदेशेषु च प्रचलितासु संस्कृतसंगोष्ठीषु, एते साहित्यविमर्शकाणाम् अपूर्व विषय बोधकानि परिशोधनापत्राणि समर्पितवन्तः। तत्र, स्वदेशे प्रचलितासु संस्कृतसंगोष्ठीषु —

संस्कृतवाङ्मये सङ्गीतमधुरिमा(Musical Melodies in Sanskrit Literature.),

CC BY

संस्कृतं भारतस्य अनुस्यूतभाषा (Sanskrit is the Lingua Franca of India),

संस्कृतम् – आधुनिकभारतीयभाषाश्च (Sanskrit and Modern Indian Languages),

नाट्यशास्त्रम्–आधुनिकसंस्कृतनाटकानि (Natyasaastram ModernDramatic Compositions)-

इति इमानि समर्पितानि परिशोधनापत्राणि आधुनिक-संस्कृतपरिशोधकानाम् अपि बहु उपकुर्वन्ति।अध्यापनम्, कवित्वलेखनम्,श्रोतुम्, स्वयं गातुं च सङ्गीतकचेरीणां गमनम्, स्वनृत्य प्रदर्शनाय, नृत्यदर्शनाय च गमनम् , पनोरमिक् लाण्ड् स्केप् सन्दर्शनम् प्रभृतयः श्री परीक्षित् शर्मणाम् अभिरुचयः।

1. ललित-गीता-लहरी 2.यशोधरा महाकाव्यम् 3.अक्षय-गीता-रामायमम् 4.परीक्षित् नाटकचक्रम् (सप्तविंशति नाटकानि) 5.जानपद-नृत्य-गीतामञ्जरी6.सौन्दर्यमीमांसा 7.श्रीमत् प्रतापराणायणम् - इति एताः अस्य रचनाः, प्रकाशिताः। 1.विजयनगर-साम्राज्यमहाकाव्यम्2.रुद्राणी महाकाव्यम् 3.ते हि नो दिवसा गताः4.कालाय तस्मै नमः-इति एताः अस्य अप्रकाशिताः।

- **कुटुम्बनेपथ्यम्**

मान्य परीक्षित् शर्माणः ओगेटिवंशे सञ्जाताः। वैदिक- वेल्नाडुशाखीयः ओगेटिवंशः, कौण्डिण्य सगोत्रिकः कृष्ण-यजुश्शाखाध्यायी वंशः। ओगेटिवंशजाः सर्वे अद्वैतामृतपायिनः।ते,उदारशीलाः, तेषां शाखान्तरद्वेषः नास्ति। एवं सर्वासु दिक्षु ओगेटिवंशः ख्यातः।

तत्र श्रीपरीक्षित् शर्मणः पितामहः कृष्णय्याख्यः, स प्रशान्तात्मा, कृषिकोद्योगतत्परः। तस्य कनिष्ठः पुत्रः साम्बमूर्तिः — अयं यदृच्छालाभसन्तुष्टः, मनो-वाक्-कर्मणा, आर्षत्वम् अभिकाङ्क्षते। प्राच्यधर्मप्रबोधनोत्सुकः अयं स्वयं आर्षधर्मसनातनीं बालिका-पाठशालां स्थापितवान्। हिन्दूमताभिधानं पुस्तकं रचितवान्। तस्य भार्या कौसल्या। तयोः सद्गुणान्विताः त्रयःपुत्राः जाताः। तेषु प्रथमः हनुमत् शास्त्री, हिन्दीभाषाभिभूषितः अयम्, बाल्ये मुदा सोत्साहं स्मार्तं संस्कृतं च पठितवान्। द्वितीयः प्रतापराणायणस्य काव्यकर्ता असौ श्री परीक्षित् शर्माणः,एते कलामाधुर्यलोलुपाः। आन्ध्रदेशे गर्तपुरी नाम(गुण्टूर्)नाम सुसम्पन्नं किञ्चित् मण्डलं(जिल्ला) वर्तते। तत्र प्रसिद्धायां स्वर्णपुर्यां (पोन्नूर्)भावनारायणक्षेत्रे, एते — पूर्वे वयसि, गीर्वाणशास्त्रिणः गुरोः श्रीसत्यनारायणस्य अन्ते, सप्त वर्षाणि, संस्कृतम् अभ्यसितवन्तः। पश्चात् गोदावरीतीरे गोपादक्षेत्रसम्पन्ने सान्ध्रगीर्वाणमन्दिरे, केशिराजु अप्पराव् महोदयस्य सन्निधौ आन्ध्र-गीर्वाणभाषयोः दृढं भाषातत्त्वम् अधिगतवन्तः[1]। ततः तृतीयः अच्युताख्यः – अनुजः, सोऽपि पण्डितः, व्यवहारेषु कुशलः, वक्ता,

---

[1] श्रीमत्प्रतापराणायणम् , कविवंशपरिचयः, श्लोकाः15-18

धारणशीलः कर्मशीलश्च मेधावी, देशभक्तः, सदाश्रयः, आदर्शजीवनासक्तः संस्कृतान्ध्राभि-भूषितः,देवभाषाप्रचाराय आत्मानं सर्वदा धन्यं मनुते[2]। पिता, त्रीन् अपि पुत्रान् बाल्ये, संस्कृतं स्मार्तभागं च स्वयम् अपाठयत्। गच्छति काले, पतिम् पुत्रान् च सर्वान् विहाय, माता दिवंगता।ततः कर्मशीली, श्रीपरीक्षित् शर्मणः ज्येष्ठभ्राता अपि, दुरदृष्टवशात् यौवने एव पञ्चत्वं गतः।

- **परीक्षित् शर्मणां गुरुपरम्परा**

प्रतिभासम्पन्नानां परीक्षित् शर्मणां गुरु परम्पराऽपि महती वर्तते — वेद-वेदाङ्गभासुराः, साहित्य-शास्त्रज्ञाश्च , श्रीसत्यनारायणमहाशयाः, श्रीपरीक्षित् शर्मणः प्रथमे वयसि गुरवः। एते, मान्यशर्माणं संस्कृतम् बोधितवन्तः। शिल्प-नाट्य-कलातज्ञाः पराशरं कृष्णमाचार् महोदयाः कलाः पाठितवन्तः,एते कलागुरवः। एते श्रीपरीक्षित् शर्माणं शिल्प-सङ्गीत-नाटक कलासु कुशलिनं कृतवन्तः। कविसम्राट् इति प्रथितयशसः, संस्कृत-आन्ध्रमहाकवयः विश्वनाथ सत्यनारायणमहोदयाः कवन गुरवः। एतेषां कवित्वं परीक्षित् शर्मभ्यः अत्यन्तम् प्रीतिदायकम्। कवित्वाभ्यासाय तेषां कवित्वं सुनिशितं परिशीलितवन्तः। संस्कृत-आन्ध्रयोः व्युत्पत्ति-प्रतिभासम्पन्नाः वेदुल रामशास्त्रिणः, शब्दशास्त्र-निष्णाताः चिल्कूरि राममूर्तिमहोदयाश्च व्याकरणगुरवः। भव्य-संस्कारराजिनः, आदर्शजीवितासक्ताः केशिराज अप्पराव् महोदयाः जीवनगुरवः। एतान् सर्वान् नाम्ना संकीर्त्य, तेषु गौरवं प्रकट्यैव राणायनकाव्य-प्रणयनाय उद्युक्ताः।

- **जीवितभागस्वामिनी**

श्री परीक्षित् शर्मणः जीवितभागस्वामिनी शीलावती। स्वजीविते भागस्वामिन्याः सहकारं वर्णयन् श्री शर्माणः — सहकाराभिभूषिता, सदा अग्रेसरा, महासती, विद्यालङ्कार-भासिनी,कर्तव्यनिष्ठापरायणा, अहं (श्री परीक्षित् शर्मा) तस्याः स्नेहेन भाववृत्त्या समाहितश्च सन्, बहुकाव्यानि व्यरचयम्, मदुक्तं राणायनमहाकाव्यं, संस्कृतज्ञा क्षिप्रलेखिका, असौ = (अस्य पत्नी) सुन्दराक्षरपङ्क्तिषु लिलेख[3] इति च स्वयमेव, मेवाड काण्डे कवेः वंशपरिचयप्रसङ्गे उक्तवन्तः।

- **श्रीपरीक्षित् शर्मणां व्यक्तित्वम्**

प्रतापराणायण महाकाव्ये कवेः मनसः अभिव्यक्तौ गवेष्यमाणायां श्री शर्मणः द्वे प्रवृत्ती प्राधानतया उपलभ्येते। तत्र आद्या, संस्कृत- भाषां प्रति अलोकसाधारणा प्रीतिः, द्वितीया भारतमातरं प्रति सहजा सुदृढा च भक्तिः।

अपौरुषेयाध्ययनेन पाविताम्, महर्षिगीर्वाणपदाभिशोभिताम्।

---

[2] श्रीमत्प्रतापराणायणम् , कविवंशपरिचयः, श्लोकाः24-27

[3] श्रीमत्प्रतापराणायणम् , कविवंशपरिचयः, श्लोकाः19-24

सदाश्रितानां बहुरक्षणे रताम् नमामि मे भारतमातरं सदा[4]॥

नमोऽस्तु ते भारतदेशदेवते! भवामि सङ्कीर्तयितुं गुणान्विताम्।

सदा भवन्तीं सुतवत्सलां भुवि, प्रसीद मां त्वं तव चिन्तने रतम्॥

सदा त्वदीयां मधुचित्रणां हृदि विधाय संस्मार्य पवित्रसंस्कृतिम्।

प्रदर्शयेयम् भवदीयवैभवं निरन्तरं कीर्तितविश्वमण्डले।

विना त्वदीयं मधुरं सुजीवितं

न मे ऽस्ति चान्यत् बहुरोचकं भुवि[5]।

सदा भवत्यै कविताक्षमालया

जपन् मदीयं वितरामि जीवितम्।

इत्यादिपद्येषु श्रीमत् प्रताप-राणायणमहाकाव्ये प्रतापचरितवर्णनव्याजेन श्रीपरीक्षित् शर्माणः मातृदेशवैभवं स्वीयदेशभक्तिप्रवृत्तिं च प्रकटितवन्तः, इति कवेः आत्मीयता आविष्कृता इत्याभाति।

काव्ये बहुत्र संस्कृतं प्रत्यपि कवेः आदरः दरीदृश्यते—

पूर्वजन्मकृतं पुण्यं सत्यम् अस्मिन् युगे मम,

संस्कृतज्ञानरूपेण फलितं काव्य भूरुहे॥

यस्यां मे संस्कृतिस्सर्वा विललास सुधामयी,

तस्यां गीर्वाणभाषायां कुर्यां मे काव्यनिर्मितिम्॥

प्राग्जन्मसञ्चितं ज्ञानं देवभाषाभिभूषितम्,

राणाप्रतापकाव्यत्वं भ्राजते प्राप्य भूतले॥

जन्मजन्मनि गीर्वाणी भारती मेऽस्तु भारती,

यद्यहं मानवो भूत्वा जीवेयं भारतावनौ॥ एवं बहुभिः पद्यपादैः कविरयं स्वीयं संस्कृतादरं च प्रकटितवान्।

- **काव्यरचनानेपथ्यम्**

लोके निद्राणजन्तूनां कर्तव्यं शासयन्, यावत् वाणी चिरं तिष्ठति तावत् राणायणं भुवि,विलसति। संस्कृते, राणाजीवितम् उद्दिश्य काव्यं नास्तीति, अपवादात्मकं वाक्यं निरस्तुं इदम् ऐतिह्यं रचितवान्।सर्वे कवयः,श्रीपरीक्षित् शर्मणे इदं प्रियं कथावस्तु तत्यजुः, इति मनसि कृत्वा, अतिसुन्दरं प्रतापराणायणं रचितवान्। हितैषी राष्ठ्रपूरुषः, राणाप्रतापः जीवने विफलः, एतादृशस्य काव्यस्य कर्ताऽपि वैफल्यम् आप्नोति - इति भीत्या पूर्ववर्तिनः केचन कवयः काव्यकथायाः नायकत्वेन राणाप्रतापं न जग्रहुः। सर्वमहीतले यद्यपि

---

4 श्रीमत्प्रतापराणायणम् , उदयकाण्डः-सर्गः14,, श्लोकः16

5 श्रीमत्प्रतापराणायणम् , उदयकाण्डः-सर्गः14,, श्लोकः55-58

राणाप्रतापः वैफल्यजीवनः स्यात् नाम, परम् अर्वाचीनमहीभुजां नित्यम् आदर्शपुरुरुषः। तस्मत् राणाप्रतापः सर्वेषां प्रियः वन्द्यश्च। यदि तं विस्मरेत् कोऽपि, स देशद्रोही एव भवेत् इति काव्यरचनानेपथ्यं निवेदयति।

तस्मात् धन्यमहं मन्ये गीर्वाणकविमण्डले।

राणाप्रतापकाव्येन शाश्वतस्थानभाजनम्॥

इति इदं श्लोकम्, उपरि निवेदनं च, श्रीमत् प्रतापराणयणमहाकाव्य प्रणयणे श्री श्रीपरीक्षित् शर्मणः प्रवृत्तौ निमित्तभूतान् अंशान्, काव्यकथानायकत्वेन राणाप्रतापस्य वरणे काव्यकर्तुः निबद्धतां प्रकाशयतः।

- **श्रीमत् प्रतापराणायणस्य महाकाव्यस्वरूपम्**

अत्र मेवा-उदय-अरण्य-दिल्ली-हाल्दाघाट् –विजयाख्याः षट् काण्डाः सन्ति।प्रति काण्डं अष्ठप्रभृति सप्तदश सर्गाः सन्ति। एवम् अशीति सर्गाःवर्तन्ते। प्रतिसर्गं पञ्चत्रिंशत्तः प्रभृति शतं यावत् श्लोकाः भवन्ति। इत्थं चतुस्सहस्राधिकाः श्लोकाश्च विद्यन्ते। विंशतितमे शताब्दे इदं महत्तमम् ऐतिहासिकं काव्यम्। अत्र कविना त्रयस्त्रिंशत् छन्दांसि उपयुज्य श्लोकाः उपनिबद्धाः।एवं विस्तृतरूपेण छन्दोवैविध्यं प्रदर्शिताः कवयः अतिन्यूनाः वा, दुर्लभाः अपि वा स्युः।आटवॆलदि –तेटगीति इति आन्ध्रप्रसिद्धे द्वे छन्दसी, तयोःअपि संस्कतपद्ये विनिर्मिते अत्र काव्ये।ओवीत्याख्यः मराठी प्राकृतिकःछन्दोपिआदृतः अत्र काव्ये अस्ति।

- **रणाप्रतापस्य नेपथ्यम्**

भारतस्य मध्ययुगे, किञ्चित् इतस्ततः क्रीस्तोः परं चतुर्दशात् प्रभृति पञ्चदशशताब्दं यावत् राजस्थाने, राजपुत्राणांषड्विंशत् राजवंशाः सन्ति।ते सर्वे अक्बरस्य दासतां गताः। शिशोडियाख्यः राजवंशःएक एव भारदे देशे परपालकस्य अक्बरस्य विरुध्य अवशः अस्ति। विदेशीयअक्बरस्य दासताम् आप्तुं दृढं नाङ्गीकरोति। शिशोडिया राजवंशः परपालनतः भारतं विमोचयितुं अधिकं प्रयासम् अनुतिष्टति।तत्समये देशीयाः परिस्थितयःअपि नानुकूलाः। बहुमुखतःराजस्थान् – रापुत्राश्च कलुषिताः।बाप्पा रावल् समये राजस्थाने बहुशः युद्धानि अभूवन्। राजस्थान् परितः ईतिबाधाः आवृताः।तत्र महत् संक्षोभम् एव जातम्।तदा कतिपय राजवंशीयाः इतरराष्ट्राणि जग्मुः।चौहान् भोस्ले राजवंशीयाःमहाराष्ट्रं, केचन सिंग् वंशीयाः आन्ध्रराष्ट्रं च गत्वा तत्र स्थिराः सम्पन्नाः। राणाप्रतापः तत्र योग्यां भागस्वामिनीम् आप्तुम् अशक्नुवन्। आन्ध्रदेशीयां कृष्णमण्डलवासिनीं विजयवाटिकायां परिणीतवान्[6]इति ग्रन्थकर्ता वर्णयति। तदानीन्तन-राजस्थान् राज्यस्य दुर्भरपरिस्थतीनां इदमेव निदर्शनम्।

---

[6] समेत्य चान्ध्रीयवरप्रदेशं कृष्णातटे सौकनकाद्रिपार्श्वे।

चक्रे विवाहं बेजवडपुर्यां पतीश्वरी नाककन्यया सह॥ श्रीमत् प्रतापराणायणम् , उदयकाण्डःसर्गः9, , श्लोकः 34

CC BY

- **काव्यकथावस्तु**

राजस्थाने राजपुत्रवंशीनां वर्णनम्, राजदुर्गाणां प्राभवस्य वर्णनम्। शिशोडिया राजवंशीयानां वैभवस्य वर्णनम्। तेषु अपि तेषां परस्परअसहकारिता, भोगलालसता, प्रजापालनपरित्यगः, राजपुत्राणां दुष्परिपालनम्,मोगल् राज्ञां दुराक्रमणम्, आत्मगौरवहीनानां देशभक्तिशून्यानां केषाञ्चन स्वदेशीयराजानां दासतां गमनम्, तद्व्यतिरेकिणः राणाप्रतापस्य हिंसनम्,प्रतापस्य चेतकाख्यः अश्वः, तस्य प्राभवः, आत्माभिमानसम्पन्ना देशभक्तिपूर्णा सुदृढा प्रतापस्य दीक्षा,परपालकैः सह चेतकसहायेन संयुध्य दुराक्रमितस्य राज्यस्य पुनः स्वायत्तीकरणम्, राणाप्रतापस्य शौर्यधैर्यसाहसानां कृते भीतः अक्बरः, युद्धभूमेः पलायनम्, भारतदेशस्य स्वातन्त्र्यसम्पादनाय, सैनिकान् उद्दिश्य प्रतापसिंहस्य उद्बोधनम्। इति इमे अंशाः प्रधानतया काव्यशैल्या उपवर्णिताः।

- **प्रतापयोः (रवि-राणयोः) श्लेषमहिम्ना स्तवनम्**

महाकविः काव्यमिदम् — श्रीमत् प्रतापराजं तं नौमि दिव्यमहौजसम्।

सर्वलोकसमाराध्यं सूर्यं प्रत्यक्षदैवतम्॥

यस्तं प्रशास्ति नावीन्यं चेतनाऽचेतनं ध्रुवम्।

महिम्ना स्वप्रतापस्य स्तौमि विश्वं महेश्वरम्॥ इति प्रार्थनया आरभते।

श्रीमन्तः शर्माणः महाकाव्यम् इदं प्रार्थनाव्याजेन तपनं सूर्यम्, प्रतापं काव्यनायकं च श्लेषमहिम्ना प्रस्तौति। तथा हि—अत्र प्रतापराजशब्दः सूर्य- राणाप्रतापयोः वाचकः। सूर्यः लोकतपनः, राणा प्रतापः तु शत्रुतपनः,अतः उभौ अपि **प्रतापेन भूषितौ राजानौ**। सूर्यः दुर्निरीक्ष्यः, राणा प्रतापः तु दुर्जयः,अतः उभौ अपि दिव्यशक्तिसम्पन्नौ, **महौजसौ**। लोके सर्वैः समाराध्यः सूर्यः, दुराक्रमणपरान् निरुध्य,आत्मगौरव पालनद्वारा देशरक्षणाय उद्यमनेन, तदानीन्तनजनैः समाराध्यः राणाप्रतापः, एवम् उभावपि **सर्वलोकसमाराध्यौ**। दास्यविमोचनाय साक्षात् अक्ष्णाम् पथम् आगतः अप्रतिहत रणशीलः राणा प्रतापः। साक्षात् नेत्राभ्यां दर्शनीयः देवः सूर्यः। एवम् उभावपि **प्रत्यक्षदेवौ**। तादृशौ सूर्य- राणाप्रतापौ वन्दे इति अंशं श्लेषमहिम्ना कथयन् काव्यं आरभते।

द्वितीये पद्ये च —यः स्वप्रतापस्य प्रभावेण,स्थावर-जङ्गमात्मकं जगत्, नूतनताम् = चैतन्यम्, प्रापयन् विश्वं प्रशास्ति तं महेश्वरं सूर्यं स्तौमि, इति सूर्यपक्षे अर्थः।यः, शत्रुभिःजेतुम् अशक्येन शौर्य-धैर्य-साहसवता,आत्मगौरवविषये अवगाहनापरं अवगाहनारहितं च जगत् = जनावलिं देशम्, आत्मगौरवपुरस्सरं जीवनयापनाय आत्मनिर्भरतां,देशीयाभिमानचैतन्यं च पूरयन् , विश्वं=देशं, प्रशास्ति तं महेश्वरं राणाप्रतापं

काव्यनायकं स्तौमि,इति राणाप्रतापपक्षे अर्थः। एवं इष्टदैवम्,इष्टं काव्यनायकं राणाप्रतापं च श्लेषमहिम्ना स्तुवन् स्वीयप्रतिभां प्राकटयत् - इति आभाति।

- **राणायण-रामायणयोः साम्यम्**

राणायणकथा वस्तु रामायणकथेव तत्" [7] इति श्लोकार्थेन,राणा प्रतापचरितं ग्रथितुम् इच्छोः मान्य परीक्षित् शर्मणः श्रीमद्रामायणं मनसि आरूढम् इति " आभाति।तथाहि—राणायणमिदं रामायणादिवत् काण्डेषु विभक्तं सत् सर्गबद्धम् ऐतिह्यम् अस्ति। अत्र काण्डानां नामनिर्देशे किञ्चित् साम्यम् अवगन्तुं शक्यते। श्रीमद्रामायणे द्वितीयकाण्डः अयोध्या इति नगरनाम्ना निर्दिष्टः। प्रतापराणायणे द्वितीयकाण्डः उदय(पुर)इति नगरनाम्ना निर्दिष्टः। तृतीयकाण्डः उभयत्र अरण्यकाण्डः एव। चतुर्थकाण्डः उभयत्र शत्रुराजधान्योः नाम्ना निर्दिष्टः। रामायणे शत्रोः वालिनःराजधान्याः किष्किन्धानाम्ना, राणायणे शत्रोः अक्बरस्य राजधान्याः दिल्लीनाम्ना च कृतः।

राणायण-रामायणयोः अवशिष्ट काण्डेष्वपि किञ्चित् साम्यम् अस्ति।प्रथमयोःविषये मेवाकाण्ड - बालकाण्ड इति यद्यपि नाम भेदः अस्ति,तथापि उभयत्र सूर्यवंशीयानां चरितम् एव उपवर्णितम्। श्रीरामः राणाप्रतापश्च उभौ सूर्यवंशीयौ।तत्-पूर्वीकयोः चरितं वर्णितम्- इति एवं प्रथमकाण्डस्य विषये साम्यम् अस्ति।

श्रीमद्रामायणे द्वितीयकाण्डे— पालने पितुः सहायं कर्तुं समर्थत्वेन प्रजानां मनस्सु स्थानं सम्पादितः, योग्यः श्रीरामः,यथा वा वनं विवासितः, तथा प्रतापराणायणद्वितीयेकाण्डे पालनाय समर्थत्वेन प्रजाभिः काङ्क्षमाणः राणाप्रतापः, भ्रातुः दुरालोचनकारणतः उदयपुरात् निष्कासितः अरण्यं विवासितश्च-इति एतत् वृत्तान्तं श्रीमद्रामायणे अभिषेकाय सिद्धस्य श्रीरामस्य वनवृत्तान्तगमनं स्मारयति।

श्रीमत् रामायण- अरण्य काण्डे श्रीरामः विराध-खर-दूषणादीन् चतुस्सहस्रात् अधिकान् रक्षसान् हतवान् ,अनन्तरं पर्यवसानतया सीतापहरणेन च महत् दुःखं च प्राप्तवान्, तथा प्रतापराणायणस्य तृतीये अरण्यकाण्डे राणा प्रतापः,असफ़् खान्,फरीद् खान्, अब्दुल्लाखान्,कासिम् खान्, फिरोज् खान्, षाबाज् खान् प्रभृतीन् हतवान्, पर्यवसानतया क्षतगात्रः शरीरशैथिल्येन राणा प्रतापः अष्टकष्टान्वितः जातः, इत्ययम् उदन्तः अरण्यकाण्डकथाम् अनुसरति इव आभाति।

श्रीमद्रामायणे चतुर्थे किष्किन्धकाण्डे—हनुमता राम-सुग्रीवयोः सन्धिप्रयत्नाः प्रचालिताः,सफलाः जाताः, तथा प्रतापराणायणस्य चतुर्थे दिल्लीकाण्डे मानसिंहेन अक्बर्-प्रतापयोः सन्धिप्रयत्नाः प्रचालिताः, परं तत्र,ते विफलाः जाताःइति तु अन्यत्। तथापि एषोऽपि श्रीमद्रामायणे राम-सुग्रीवयोः सन्धिप्रयत्नउदन्तं

---

[7] श्रीमत् प्रतापराणायणम् , कविविज्ञापना , श्लोकः 15

स्मारययतीव आभाति। प्रतापराणायणस्य हल्दीघाट् काण्डः, श्रीमद्रामायणान्तर्गतं युद्धकाण्डम्, प्रतापराणायणस्य विजय काण्डः, रामायणे उत्तरकाण्डकथां च स्थूलतः अवगमयतीवा आभाति।

- **श्रीमत् प्रतापराणायस्य वैशिष्ट्यम्**

महाकवि परीक्षित् शर्मणः इदं रणाप्रतापराणायणकाव्यं भारतीयसंस्कृतेः आदर्शभूतम्। अयं प्रति पृष्ठे, प्रतिपद्ये च विशिष्टां भारतीयसंस्कृतिं पूरितवान्। अस्मिन् काव्ये राणाप्रतापचरितस्य वर्णनक्रमः कुशलतया निरूढः। यद्यपि इदं एतिहासिकं काव्यम्, राजस्थान् चरित्रकारस्य कर्नल् टाड् रचितात् ग्रन्थात् राणाप्रतापस्य चारित्रकांशाः गृहीताः,तथापि काव्यसौन्दर्यसाधनविषये जागरूकतया अप्रमत्तः सन् काव्यं रचयति। चारित्रकांशैःकाव्यसौन्दर्यसाधनं न कुत्रापि अभिभूतम्। भाषा,भावाश्च समुन्नताः,सरलाः। गुण-अलङ्काकारादि काव्यसौन्दर्य-साधनानि च अनायासतया सहजतया उद्धृत प्रवाह पतितान्येव। ग्रन्थकर्ता, मेवाड,चितौड-विविधप्रदेशान् वर्णयन् पाठकानां प्रत्यक्ष-दर्शनानुभूतिं जनयति।

यावत् वाणी चिरं तिष्ठेत् तावत् राणायणं भुवि।
लोके निद्राणजन्तूनां कर्तव्यं शासयन् ध्रुवम्[8]॥

अनेन पद्येन आत्माभिमानहीनानां कर्तव्य शासनाय इदं रचितवान् प्रकटितवान्।

सुकुमारमार्गे निबन्धनम् काव्यस्यास्य अन्यतमः विशेषः। अत्र रस-भावनिर्झरिणी यावदन्तं प्रवहत्येव।

कारुण्यवीररासिक्यं देशभक्त्या प्रपूरितम्।
वीररासिक्यपद्यात्तं रौद्रवीररसावृतम्।
चैतन्यकारकं तथ्यं भाति राणायणं भुवि॥

इत्येवमादिभिः इदं काव्यं करुण-वीररसयोः मेलनतया उपनिबद्धम् इति अवगम्यते।

तुरकानां पलनस्य निर्मूलने, दास्यविमोचने, श्रीमत् प्रतापराणायण-महाकाव्य कथानायकस्य यादृशः स्वभावः, एतत् काव्यकर्तुः अपि तादृशः एव स्वभावः, इति तत्काव्यबद्धरचनायाः शैल्या अवगन्तुं शक्यते। काव्यकथानायकः राणाप्रतापः आत्माभिमानी, परदास्यं न सहते। देशरक्षणाय आत्मार्पणं कर्तुम् इच्छुः महान् देशभक्तः, परपालन-असहिष्णुः। राणाप्रतापः उद्वेगी,उद्रेकी, उत्साही, उदात्तः समरशीलः। एवं काव्यकर्ता अपि अत्माभिमानी, संस्कृतभाषायां,भारतीयसंस्कृतौ च अचञ्चलविश्वासपूर्णः। परदास्यस्य पर्यवसानान्, पाठकानां पुरतः स्थापयितुं यावत् शक्ति प्रयतितः देशभक्तः महाकविः। परदास्यविमोचनाय काव्यनायकराणाप्रतापद्वारा स्वीयं उद्वेगं वर्णयति। सैनिकान् उत्साहयति। योद्धुम् उद्रेकयति।

---

[8] श्रीमत् प्रतापराणायणम् , काव्यं प्रति कविसंभावना , श्लोकः 2

- यौवनदशायां राणा प्रतापसिंहेन कृतया —

स्वप्स्येयं नैव शय्यायां तावत् पर्यन्तमेव हि।
यावत् मेवाडदेशेन स्वातन्त्र्यं नैव भुज्यते॥
चितौडे राजपुत्राणां यावन्नोडयते ध्वजः।
तावच्च धातुपात्रेषु नैव कुर्यां च भोजनम्॥
सुखवस्तूनि न सेवेऽहम्,नैव निद्रां भजामि च।
स्वातन्त्र्यसिद्धै यत्नं तु कुर्यां शक्त्या अहर्निशम् [9]॥

इत्येतया प्रतिज्ञया, स्वातन्त्र्यसम्पादने च प्रतापसिंहस्य सुदृढां दीक्षां निबद्धतां च ज्ञातुं प्रभवामः।

मुगल्साम्राज्याधिपतेः अक्बर् महोदयस्य शक्ति –प्रभावादीन् वर्णयित्वा,तस्य वशगो भव इति मनसिंहः राणा प्रतापं प्रोत्साहयति। तत्सन्दर्भे राणा प्रतापस्य प्रत्युत्तरपराः श्लोकाः —

यः कोऽपि नाम मम भारतवंशजानाम्
आपादयेत् यदि कलङ्कम् अहं विलूय।
खड्गेन नैकशकलांश्च तदीयजिह्वां
कृत्वा तु दिक्षु विकिरामि विना दयां किम् ? ॥
आनन्त्यसस्यफलसज्जितपुण्यभूमिम्
देशं त्वमत्र परहस्तगतं विलोक्य।
नैवासि तप्तहृदयेन विभासमानः
कालुष्यभावभरितं खलु तेद्य चित्तम्॥
श्वासानिलः वहति यावदिहैव देहे
तावत् प्रियो भवति दैशिकभक्तिभावः।
आकाशपातनम् अपीह चिरं सहेयम्
काङ्क्षे न चापि परशासनदास्यवृत्तिम्॥
नैवास्ति मेऽत्र धरणीपरिपालनाशा
बाभाति दिव्यभरतावनिभक्तिभावः।
यः कोपि वा भवतु भरतदेशजातः

[9] श्रीमत्प्रतापराणायणम् , उदय काण्डः, द्वितीयस्सर्गः, श्लोकाः58-60

CC BY

राष्ट्रस्य पालनपरो मम योग्य एव[10]॥

प्रतापसिंहस्य परशासनदास्य-वृत्तौ तिरस्कारभावम्, देशभक्तिम्, आत्मनिर्भरतां च प्रकटयन्ति।

हल्दीघाट् प्रसिद्धयुद्धसन्दर्भे राणाप्रतापेन स्वसैनिकान् सम्बोध्य कृतं —

जयो भवेत् यदि प्रियाः! मुदैव भारतं वयम्

प्रपालयेम शाश्वतं प्रजाभिरेव सौख्यदम्।

भवेत् तथा हि नैव तर्पणं क्षताङ्गसंस्रुतैः

विधेम भारताय रक्तवाहिनी चयैःमुदा॥

शिलासमानचेतनाः दयाविहीनभावुकाः

निरन्तरं च मातृभूमिरक्षणे भवन्त्विह॥

द्रुतं धियाऽत्र यान्तु मातृभूमिरक्षणात्मकाः! परालिभूमिजातभञ्जने प्रभञ्जनाशुगाः।

मदात्तशत्रुभूधरान् विदारणे पविप्रभाः, विधातुमेव देशमेनम् आत्मवश्यभासितम्॥

पिनाकपाणिहस्तदीप्ततीक्ष्णशूलसन्निभाः। चलन्तु शत्रुशीर्षकन्दुकैः प्रखेलितुं प्रियाः॥

इत्येवमात्मकं प्रसङ्गं सहृदयान् देशभक्तिरसे मग्नान् करोति।

" बाबरुं सप्तसिन्धूनां पाययित्वा जलं रुषा" [11]

"प्रासूत वृषभो वत्सं तूर्णं तत्र बधान रे! " [12]

"पाणिप्राणी बभूवासौ कान्तारे शत्रुनाशकः" [13]

- "पुष्पस्य गन्धमाहात्म्यं कुङ्कले ज्ञायते सदा " [14] इत्येषां परिशीलनेन अयं देशीयाः लोकोक्तीः संस्कृतीकृत्य सन्दर्भोचितम् उपयुक्तवान् इत्यपि वक्तुं शक्यते।
- विज्ञापना

अस्मिन् महाकाव्ये व्याकरणविरुद्धप्रयोगाः सन्तीति विमर्शः अस्ति। भावावेशेन पतितानां व्याकरणविरुद्ध प्रयोगाणां-विषये श्री परीक्षित् शर्माणः एव साक्षात् —

---

[10] .श्रीमत्प्रतापराणायणम् ,दिल्ली काण्डः, दशमःसर्गः, श्लोकाः8-9.12,32

[11] श्रीमत् प्रतापराणायणम् , मेवाडकाण्डः, सर्गः 11, श्लोकः 20

[12] श्रीमत् प्रतापराणायणम् , मेवाडकाण्डः, सर्गः 16, श्लोकः 2

[13] श्रीमत् प्रतापराणायणम् , उदयकाण्डः, सर्गः 02 , श्लोकः 27,

[14] श्रीमत् प्रतापराणायणम् , दिल्लीकाण्डः, सर्गः 05 , श्लोकः 1

सन्ति केचन लोकेऽस्मिन् धूम्ररेखाविलोकिनः।

न तु प्रकाशं दीपस्य जनकल्याणकारकम्॥

इति उद्वेगतया वदन्, पाषाणखण्डान् पृथक् कृत्वा तण्डुलानि यथा वा आहाराय पचन्ति, तथा विरुद्धान् प्रयोगान् अपसार्य रसास्वदनाय काव्यं पठन्तु इति विज्ञापयति। अस्मिन् महाकाव्ये तत्र तत्र भावावेश-प्रवाहस्य उद्धृत्या व्याकरणविरुद्धतया पतितान् अपि प्रयोगान् मनसि अनिधाय,सहृदयाः पाठकाः करुण-वीररसयोः आस्वादनं कुर्वन्ति इत्यंशः, यस्य कस्यापि वा काव्यस्य चारुता, सहृद-यानाम् आस्वादनक्षमतायां विद्यते इति विषयं द्रढयति॥

****

उपयुक्तग्रन्थसूची

1). **श्रीमत्प्रतापराणायनम् – महाकाव्यम् : ओगेटि. परीक्षित् शर्मा**

Published by smt . S. P. Shaama, C/o S.K.Kunehua,102 Gandhaur,1204/18, S.Nagar, Pune-411004. Published with the financial assistance from the Ministry of Human Resource Development, Government of India. Printed at Vaidika samsodhana Mandala Mudranalaya,T.M.V.Nagar,Pune-411037.

2).श्रीमद्वाल्मीकिरामायणम् – मूलमात्रम् : वाल्मीकिः

प्रकाशकः— गोविन्दभवन-कार्यालय,गीताप्रेस्, गोरखपुर.

तृतीयं संस्करणम्, मुद्रक— गीताप्रेस्, गोरखपुर, 273005,दूरभाषा-334721.

****

Author's Detail

Name	:	**S. LAKSHMIDHARA SARMA**
Designation	:	Sanskrit lecturer
Address	:	A.P.R.Degree College, V.P.South, Nagarjunasaagar, Guntoor Dt. Andhrapradesh, 522 439
Email Id	:	sristi62@gmail.com

CC BY

मनोनिर्वहणविषये उपरतेः आवश्यकता

- डा. श्री.नरसिंहः

कर्ममयं जगत्

सृष्टि-स्थिति-लय-उदयास्तमन -पुण्यपाप-लाभ-नष्ट-जननमरणाद्यनेकविध -कर्मभरितोऽयं प्रपञ्चः । आसृष्टेः कर्मणः एतादृशी गतिः बलिष्ठा निरन्तरं चलन्ती एव अस्ति प्रपञ्चेऽस्मिन्। न केवलं लौकिककर्मनिरताः सामान्याः मानवाः, परं ज्ञानमार्गरताः तत्वविदः योगिनः सिद्धा अपि कथञ्चित्लोकक्षेमार्थं क्रियान्विता एव भवन्ति। अत एव

"नैव किञ्चित्करोमीति युक्तो मन्ये तत्तत्त्ववित्"[1] इति योगाचार्येण श्रीकृष्णेनैव सुष्ठु निर्धारितं गीतायां यत्तत्त्वविदः अपि कर्माचरणं विहाय मौनं स्थातुं नार्हन्तीति। तर्हि सामान्यः जनस्तावत् प्रपञ्चेऽस्मिन् कर्माचरणं विहाय निष्क्रियः कदापि भवितुं वा नार्हति।

"नियतं कुरु कर्मत्वं कर्म ज्यायोऽस्य कर्मणः ।

शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।।[2]"

इति हि गीताचार्यः उपदिशति न तु मानवं कर्मणः पराङ्मुखं भवितुम्। एवंस्थिते लौकिककर्मसु वा ध्यान-योगाभ्यास-आत्मविचारादिषु आध्यात्मिकविषयेषु वा प्रसक्तस्य मानवस्य कार्यनिर्वहणेन साकम् आत्मनिर्वहणमपि अत्यावश्यकं भवति । यतो हि मानवेन मनसा सङ्कल्पितस्य विषयस्यैव कार्यरूपेण व्यवहारः भवति लोके। अनेकविधकार्याणाम् आचरणसमये व्यक्तिगतगुणदोषाः तथा बलाबलाश्च निश्चयेन प्रभावमुत्पादयन्ति तत्प्रविष्टकर्मसु, तस्य वैयक्तिकजीवने, कर्मफले तथा इतरैस्सह व्यवहारेषु च। कर्माचरणेन साकं विवेकवैराग्ययोः सम्पादनमत्यावश्यकं लौकिकजीवने, तथा आध्यात्मिकजीवने च। तादृशगुणैस्सम्पादिता जागरूकता नितराम् आवश्यकीभवति कर्माचरणसमये तथा तत्प्रभावेषु च। नोचेत् लौकिककार्याणाम् आचरणे तथा साधनामार्गे इति उभयत्रापि कामक्रोधादिभिः च्युतिः अनिवार्या भवति। मानवैः आचरितानि नानविधानिकर्माणि तथा कर्मफलानि च प्रायशः सुख-दुःख, लाभालाभादि द्वन्द्वमयान्येव। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति हि लोकगतिः। सत्वगुणान्वितः योगी तत्त्ववित् आत्मनिष्ठो वा कोऽपि विवेकवैराग्याभ्यां सम्पादितेन आत्मबलेन ईश्वरचिन्तनेन ईश्वरार्पणबुद्ध्या च तत्तत्कार्यफलेषु अनाश्रितस्सन्मुक्तसङ्गः व्यवहरेत्।

"अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।

स सन्यासी च योगी च न निरग्निर्नचाक्रियः ॥[3] "

इति पूर्वोक्तगुणसम्पन्नः स एव सन्यासीति, योगीति व्यपदिश्यते भगवता कृष्णेन। परं सामान्याः एवंभवितुं नार्हन्तीति वयं निश्चयेन अङ्गीकुर्म एव। कारणं गतानुगतिकोलोकः इति कार्येषु कार्यफलेषु च मग्नः "**फले सक्तो निबध्यते**"[4] इति अज्ञानात्कर्मफलैः स्वयं बद्धः एव भवति सामान्यतया।

कर्तरि कर्मानुभवानां प्रभावः

विपरीतफलेन दुःखमनुभूय निराशा-वैमनस्यादिभिः एकरीत्या बाधितः भवति मानवसमुदायः। तथैव कार्यसाफल्येनापि अत्युत्साहात् अहङ्कार-ममाकारान्विताः भवन्ति अन्यरीत्या। कथं वा भवेन्मनुष्यस्य व्यवहारः, येन हानिं विना अग्रे गन्तुमर्हति सः, तत्सम्बन्धिसमुदायो वा? कीदृशं निरीक्षणम् आवश्यकं कार्याचरणसमये येन कर्माचरणसमये मानवः सुदृढबुद्ध्या विवेकवैराग्यादिभिः मानसिक चाञ्चल्यकल्पितदुष्प्रभावेभ्यः रागद्वेषादिभ्यः आत्मानं विमुञ्च्य, धृत्या श्रद्धया निष्ठया च कार्यं कर्तुं सः समर्थः भवितुमर्हति? एतदर्थम् उचितमार्गदर्शिनः, तथा मार्गदर्शनस्य च अत्यावश्यकता अस्ति आधुनिके प्रपञ्चे। एतस्मिन्विषये रामायणे विभीषणादयः तथा महाभारते विदुर-अक्रूरादयः, स्वामिरामकृष्ण-विवेकानन्द-आदिशङ्कराचार्य-रामानुजाचार्यादयः अनेके उदाहरणपुरुषाः मार्गदर्शकाः भवितुमर्हन्ति।

उपरतिः – कर्माचरणे लाभादायिका सम्पत्तिः

एतस्मिन्सन्दर्भे उपकरोति साधनचतुष्टयान्तर्गता शमदमादिषट्सु अन्तर्भूता उपरतिः नामिकासम्पत्तिः। एते एव षट्गुणाः ज्ञानमार्गे प्रवेष्टुं सोपानभूताः भवन्ति यत् एतेषां साक्षात्कारानन्तरमेव वेदान्तविचारः आरभ्येत साधकैः अथवा जिज्ञासुभिः। एषा च उपरतिः कठिनप्रयासेनैव साक्षात्कर्तुं शक्या मानवैः, न तु सुलभतया। कारणम् एषा आन्तरिकपरिवर्तनार्थं विद्यमाना इत्यतः। रतिर्नाम विषयगत-सुख-लाभ-प्रशंसाभिः उत्पन्नः मनसः अनुभवः। तस्य साक्षाद्विपरीतगुणः तटस्थलक्षणभूतः अनुभवः एव उपरतिः। उपरतेः स्वरूपं किं स्यादिति विवरणं दीयते शङ्करभगवत्पादैः विवेकचूडामण्यां-

"विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके ।

उभयेषामिन्द्रियाणां स दमः परिकीर्तितः ॥

बाह्यानालम्बनं वृत्तेः एषोपरतिरुत्तमा ।[5]

विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा ।[6]

विषयाः एव अर्था इति व्यपदिश्यन्ते गीतायाम्भगवता। ज्ञानेन्द्रियसहकारार्थमेव कर्मेन्द्रियाणि विद्यन्ते। अतः उभयोः मध्ये गाढसम्बन्धः वर्तत एव। द्वयोः संयक्निरीक्षणं, तथा रक्षणं च अत्यावश्यकम्। एतेभ्यः इन्द्रियेभ्यः विषयप्रवर्तनात् जनिताः अनुभवा एव सुख-दुःख-मानापमान -लाभ-नष्टादयः विषयफलासक्तं मनः कामक्रोधादिभिः तथा रागद्वेषादिभिश्च निबध्य बाधन्ते। अत एव उक्तं –

"इन्द्रियेभ्यःपराह्यर्थाःअर्थेभ्यश्चपरंमनः।

मनसस्तुपराबुद्धिःयोबुद्धेःपरतस्तुसः।।[7]

अर्थात् आत्मज्ञानसाधने निरतान् साधकान् तथा सामान्यकर्मसुप्रवृत्तान् सामान्यजनांश्च चक्षुरादिबाह्येन्द्रियैः तथा चित्तविषयात्मकैः वासानादिभिश्च मनः लक्ष्यात् च्यावयितुं समर्थेभ्यः बाह्यविषयेभ्यः, विवेकवैराग्याभ्यां सम्पादितया धृत्या स्वलक्ष्ये एव या स्थापयितुं शक्नोति, तथा बाह्यविषयेषु सर्वथा अनासक्तिं च कल्पयति सा एव उपरतिः इति। **सुखानुशयी रागः**[8] , **दुखानुशयी द्वेषः**[9] इति योगसूत्रद्वयमपि सुखदुःखानां रागद्वेषाभ्यां सह कथं गाढसम्बन्धः सर्वथा चित्ते वर्तते इति प्रदर्शयति। उपरतिस्तावच्चित्तविषयात्मिका। अतएव - **"योगः चित्तवृत्तिनिरोधः"**[10] , **"वीतरागविषयं वा चित्तम् "**[11] इति चित्तस्यैव तत्र नियन्त्रणं निर्दिष्टमस्ति महर्षिणा पतञ्जलिना। कारणं चित्ते एव द्वन्द्वभूतैः सुख-दुःखाद्यनुभवैः कल्पिता वासना मनसः अन्तरङ्गे निरन्तरं विराजमाना, ऊर्ध्वगमनात् साधकं संस्तम्भ्य बाधते नितराम्। विवेक-वैराग्य-निष्ठादिभिः सम्पादिता दृढबुद्धिविषयिणी एषा उपरतिस्तावन्मनसः अन्तर्मुखीकरणार्थमुपकुर्वन्ती शमादिषड्कसम्पत्तिषु अन्यतमामुख्यं स्थानमावहति।

उपरतेः इदानीन्तनसमुदाये प्रभावः

न केवलम् आत्मज्ञानसाधनादि पारमार्थकेषु विषयेषु उपरतिः आवश्यकी। परं लौकिकजीवनसम्बन्धिव्यवहारेषु अपि रागद्वेषादीन् विहाय कार्यं कर्तुं एषा बहूपकरोति। लोके पश्यामश्चेत् लाभ-नष्ट-सुख-दुःख -मानापमानैः प्रभावितः सामान्यः अपि मानवः लोके बाधामेव अनुभवति, येन सः रोगग्रस्तः भवति कालान्तरे। मनोव्याधेः चिकित्सया साकं तस्य कारणान्वेषणं तस्य आमूलतः दूरीकरणं च इदानीन्तनकाले अत्यावश्यकम्।

समाजस्थितिः

विद्यालयेष्वपि विविधैः मानसिकरोगैः पीडितास्सन्ति छात्राः इति तदा तदा सूचनाः आगच्छन्त्यः सन्ति वार्तासु। युवकानां तथा ज्येष्ठानां विषये पश्यामश्चेत्, धन-प्रियपुत्र-बान्धावानां नष्टाद्दुःखमसहमानाः, अभीप्सित-फलमप्राप्य तेन कोपान्विताः, अहङ्कारयुक्ताः अथवा मोहान्विताः, विपरीतदशायां मनोनिर्वहणं कर्तुं सम्यक् अजानन्तः अनेके जनाः कथं समुदाये असमीचीनमार्गे गत्वा अधःपतन्तीति वयं सम्यक्जानीम एव। एतादृशव्यक्तिगतदोषाः एव सम्भूय समुदायं भाविनि बाधन्ते। एवं न भवेदित्येव सतां चिन्तनम्। तस्मात्प्रवृत्तिमार्गे अपि विवेक-वैराग्यसमुद्भूतायाः उपरतेः लाभः निश्चयेन भवति, येन व्यक्तिः समुदायो वा शान्ततया जीवितुमर्हति। आध्यातिमकपथि आश्रितं कर्म आत्मोपयोगी, तथा लौकिकजीवने व्यक्तेः समाजाय फलदायिनी भवेत्। तादृशं कर्म कर्तुम् उपरतिनामकस्य एतादृशगुणस्य आवश्यकता निश्चयेन भवत्येव।

उपसंहारः

"यदृच्छालाभसन्तुष्टः द्वन्द्वातीतो विमत्सरः ।
समस्सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥[12]

इति गीताचार्योक्तरीत्या आबाल्यात्मानवः बाल्यकाले गृहे मातापित्रादि पारिवारिकजनैः, विद्यालये शिक्षकैः तथा समुदाये उदाहरणभूतैः ज्येष्ठैः च तथा तथा उचितकाले सम्यक्शिक्ष्यते चेदेव ते उत्तमनागरिकाः भूत्वा भाविकाले सम्यक्व्यवहरिष्यति। युद्धं त्यक्त्वा, स्पर्धां त्यक्त्वा जीवनस्य आरम्भत एव उपरतेः अभ्यासः समीचीनतया निरन्तरम् अनुष्ठीयते चेत्, भाविकाले आचार्यपुरुषाणां सदुपदेशैः आत्मोपयोगिगुणानाम् आत्मसाक्षात्कारे मानवः यतमानस्सन्, लौकिकजीवने तथा पारमार्थिकजीवने च प्रगतिं नियततया पश्येदिति हि ज्येष्ठानाम्, ऋषीणाम्, आचार्यपुरुषाणां तथा गुरूणामाशय इतिशम् ॥

****

परिशीलितग्रन्थसूची

1. श्रीमद्भगवद्गीता –with English translation of Swami Tapasyananda, Sri Ramakrishna Math, Mylapore – 1997.
2. श्रीमद्भगवद्गीता – Ibid
3. श्रीमद्भगवद्गीता –Ibid
4. श्रीमद्भगवद्गीता –Ibid
5. विवेकचूडामणिः – आदिशङ्कराचार्यः – Text with English translation by Swami Turiyananda, Published by Sri Ramakrishna Math, Mylapore, Chennai - 04 – 1991.
6. अपरोक्षानुभूतिः – आदिशङ्कराचार्यः -with the commentary of Swami Vimurtananda, Advaita Ashrama, Bangalore, 2005.
7. कठोपनिषत् -translation of Swami Pramananda, Sri Ramakrishna Math, Mylapore, 1980.
8. पातञ्जलयोगसूत्रम् – पतञ्जलिः –षट्टीकोपेतम् – चौखाम्बासंस्कृतसंस्थान – वाराणसी-1982
9. पातञ्जलयोगसूत्रम् – पतञ्जलिः –Ibid
10. पातञ्जलयोगसूत्रम् – पतञ्जलिः – Ibid
11. पातञ्जलयोगसूत्रम् – पतञ्जलिः – Ibid

12. श्रीमद्भगवद्गीता – with English translation of Swami Tapasyananda, Sri Ramakrishna Math, Mylapore – 1997.

****

Author's Detail

Name : **DR. S. NARASIMHAN**
Designation : Assistant Professor
Address : Dept of Sanskrit, D.G.Vaishnav College, Chennai 600107
Email Id : srinarasimhan05@gmail.com

महाभारते श्रीकृष्णस्य स्तुतिः – एकम् अध्ययनम्

- सङ्गीता मण्डल

Abstract

वेदादारभ्य देवस्तुतिः कविताया मुख्यो विषय आसीत्। वेदेषु रामायणेषु च देवानां स्तुतिः मानवदैवतयोः सम्बन्धस्य सेतुचित्रमासीत्। महाभारतेऽपि स्तुतिसाहित्यस्य भृशं पल्लवनमाविष्कृतमस्माभिः। तदनुसारं महाभारतेऽपि विविधसमस्यासमाधानाय देव-दानव-मानवानां ब्रह्माविष्णुमहेश्वरादीनां कृते स्तुतिसमूहः प्राप्यते। महाभारतस्य शान्ति-सौप्तिक-अनुशासन-वन-द्रोणादिपर्वसु श्रीकृष्णस्तुतयः प्राप्यन्ते। भगवता श्रीकृष्णेन ब्रह्मरूपेण सृज्यते जगत् , नारायणरूपेण रक्ष्यते, रुद्ररूपेण संह्रियते। अतः श्रीकृष्णस्य महिमा अतुलनीयः। स सहस्रशीर्षः, पुराणपुरुषः,परमेश्वरः, आदिकर्ता, विश्वरूपः इत्यादिभिः विशेषणैः विभूषितः। अतः श्रीकृष्णस्य शरणं सर्वैः कर्तव्यम्। भक्तिभावजागरणाय व्यासदेवेन शब्दार्थानां समुचितप्रयोगः कविभिः शिक्षणीय इति प्रतिपाद्यते। अनेन स्तुतिसाहित्येन परवर्त्तिस्तोत्रसाहित्यं समुद्भूतमस्ति।

****

वेदादारभ्य देवस्तुतिः कविताया मुख्यो विषय आसीत्। वेदेषु रामायणेषु च देवानां स्तुतिः मानवदैवतयोः सम्बन्धस्य सेतुचित्रमासीत्। महाभारतेऽपि स्तुतिसाहित्यस्य भृशं पल्लवनमाविष्कृतमस्माभिः। स्तुतिसाहित्यं यथा पुष्टं वर्तते तदस्माभिः ज्ञातम्। तदनुसारं महाभारतेऽपि विविधसमस्यासमाधानाय देव-दानव-मानवानां ब्रह्माविष्णुमहेश्वरादीनां कृते स्तुतिसमूहः प्राप्यते। महाभारतस्य शान्ति-सौप्तिक-अनुशासन-वन-द्रोणादिपर्वसु श्रीकृष्णस्तुतयः प्राप्यन्ते।

व्यासकृतस्य महाभारतमहाकाव्यस्य वनपर्वणि द्वादशाध्याये द्वितीयपाण्डवेन अर्जुनेन सरलया गिरा श्रीकृष्णस्य महिमा वर्ण्यते। श्रीकृष्णः पुरा गन्धमादनपर्वते यत्र सायं गृहमुनिरूपेण दशवर्षसहस्राणि विचरति, वर्षसहस्रं केवलं जलं पीत्वा पुष्करतीर्थे निवसति, बदरिकाश्रमे बाहू उत्तोल्य केवलं वायुभुक् सन् एकपादेन सोऽतिष्ठत्, स हि क्षेत्रज्ञः, सर्वभूतानाम् आदिरन्तश्च, तपसामधिष्ठानं, यज्ञः, सनातनः पुरुषः। प्रथमे स नारयणः सन् हरिरूपेण प्रकटीभवति। तेन चैत्ररथवने यज्ञः अनुष्ठीयते। स उत्तमाश्रयः, देवशिरोमणिः –

> क्षेत्रज्ञः सर्वभूतानामादिरन्तश्च केशव। निधानं तपसां कृष्ण यज्ञस्त्वं च सनातनः।।
> स त्वं नारायणो भूत्वा हरिरासीः परंतपः। परायणं देवमूर्धा क्रतुभिर्मधुसूदन।
> अयजो भूरितेजा वै कृष्ण चैत्ररथे वने।। (वन, 12.17, 21, 23)

सः हि अदितेः पुत्रः, इन्द्रभ्राता, विष्णुरिति विख्यातः। स द्युलोके आकाशे च परिव्याप्तः सन् स्वतेजसा भास्करं प्रकाशयति। सहस्रावतारः सः। सृष्टेः प्राक् श्रीकृष्णस्य नाभिकमलोद्भवेन ब्रह्मणा जगद् रचितम्। श्रीकृष्णेन शैशवे कृतानि कर्माणि परे नापरे वा केनापि न कृतानि करिष्यन्ते। स हि ब्रह्मणा सह कैलासपर्वते तिष्ठति–

सम्प्राप्य दिवमाकाशमादित्यस्यन्दने स्थितः।
अत्यरोचश्च भूतात्मन् भास्करं स्वेन तेजसा।।
युगादौ तव वार्ष्णेय नाभिपद्मादजायत।
ब्रह्मा चराचरगुरुर्यस्येदं सकलं जगत्।।

(वन, 12. 27,38)

द्रौपद्या श्रीकृष्णस्य समाहात्म्यं स्तुतिः क्रियते। द्रौपद्या वर्ण्यते यत् प्रजासृष्टेः प्राक् सम्पूर्णजगत्स्रष्टा प्रजापतिः च भगवान् श्रीकृष्णः। स हि विष्णुः, यजमानः, योग्यः श्रीहरिः। साध्यदेवानां तथा कल्याणकारिणां रुद्राणाम् अधीश्वरः। श्रीकृष्णस्य शिरसा स्वर्गलोकः परिव्याप्तः पृथिवी च पद्भ्यां परिव्याप्ता –

विष्णुस्त्वमसि दुर्धर्ष त्वं यज्ञो मधुसूदन।
यष्टा त्वमसि यष्टव्यो जामदग्न्यो यथाब्रवीत्।।
साध्यानामपि देवानां शिवानामीश्वरेश्वर।

(वन, 12.51,53)

विद्यातपोभिः शोधितानाम् आत्मज्ञानेन परितृप्तानां महर्षीणां श्रीकृष्णः हि श्रेष्ठः। स सर्वधर्मसम्पन्नः पुण्यात्मा राजर्षीणामाश्रयः। स हि प्रभुः विभुः सर्वभूतात्मा, लोकः, लोकपालः, नक्षत्रं, दश दिशः, नभः,चन्द्रमा, सूर्यश्च –

राजर्षीणां पुण्यकृतामाहवेष्वनिवर्तिनाम्।
सर्वधर्मोपपन्नानां त्वं गतिः पुरुषर्षभ।
त्वं प्रभुस्त्वं विभुश्च त्वं भूतात्मा त्वं विचेष्टसे।। (वन, 12.57)

समग्रे महाभारते स्तुतिसाहित्यस्य पुष्कलता दृश्यते। तत्र वनपर्वणि अपि दुर्वाससः आगमने तेषां सम्यग् भोजनसत्काराय निर्धनाः पाण्डवाः चिन्तिताः अभवन्। तदा द्रौपदी श्रीकृष्णस्य स्तुतिं कृत्वा तम् आहूतवती। कृष्णस्य कृते सा स्तुतिः द्रौपद्याः विकलहृदयम् अभिव्यनक्ति। स वासुदेवः, दुःखदूराद्धेतोः जगन्नाथः, अविनाशी, विश्वोत्पादकः संहारकः च। शरणागतरक्षकः गोपालः, प्रजापालकः, मनबुद्ध्योः प्रवर्तकः। वरेण्यः स अगतीनां गतिः, पुराणपुरुषः। नीलोत्पलदलसदृशः सुन्दरः सः पीताम्बरः, तस्य वक्षसि

कौस्तुभमणिः शोभते। सर्वप्राणिनाम् आदिरन्तः स परमाश्रयः, परात्परः, ज्योतिर्मयः सर्वात्मा, सम्पदां निधिः, जगतः परमं बीजमिति विशेषणैः विभूषितः –

नीलोत्पलदलश्याम पद्मगर्भारुणेक्षण। पीताम्बरपरीधान लसत्कौस्तुभभूषण।।

त्वामेबाहुः परं बीजं निधानं सर्वसम्पदाम्। त्वया नाथेन देवेश सर्वापद्भ्यो भयं न हि।।

(वन, 263.13,15)

स अनन्तस्वरूपः, विष्णुः, देवगुरुः, प्रकृतिपुरुषरूपः, अव्यक्तः, विश्वात्मा, विश्वरूपः। सः सहस्राक्षः, सहस्रपात् , सहस्रशिरः। स हि शेषनागपर्यङ्कशायी। अस्मिन्नवसरे शेषनागः सहस्रसूर्यसदृशीं प्रभां धरति। तस्याः कान्तिः कुन्दपुष्प-चन्द्र-मुक्ताहार-गोदुग्ध- कमलनाल-कुमुदकुसुम-सदृशी उज्ज्वलमयी –

देवदेवो ह्यनन्तात्मा विष्णुः सुरगुरुः प्रभुः। प्रधानपुरुषोऽव्यक्तो विश्वमूर्तिमान्।।

चतुर्युगसहस्रान्ते सलिलेनाप्लुता मही। ततो नारायणाख्यस्तु सहस्राक्षः सहस्रपात्।।

सहस्रशीर्षा पुरुषः स्वप्तुकामस्त्वतीन्द्रियः। फटासहस्रविकटं शेषं पर्यङ्कभाजनम्।।

सहस्रमिव तिग्मांशुसंघातममितद्युतिम्। कुन्देन्दुहारगोक्षीरमृणालकुमुदप्रभम्।।

(वन, 272.31,37-39)

जलं हि भगवतः शरीरम् अतः स नार इति नाम्ना विभूषितः। अयं नार हि तस्य अयनम् अथवा नार तेन सह तिष्ठति। अस्मात् श्रीकृष्णः नारायणः इति कथ्यते – **आपो नारास्तत्तनव इत्यपां नाम शुश्रुम। अयनं तेन चैवास्ते तेन नारायणः स्मृतः** (वन, 272.42)।। तस्य नाभिकमलात् चतुर्मुखः ब्रह्मा आविर्भवति। भगवता श्रीकृष्णेन ब्रह्मरूपेण सृज्यते जगत् , नारायणरूपेण रक्ष्यते, रुद्ररूपेण संह्रियते। एतद् रूपत्रयं हि भगवतः श्रीकृष्णस्य –

सृज्यते ब्रह्ममूर्तिस्तु रक्षते पौरुषी तनुः।

रौद्रभावेन शमयेत् तिस्रोऽवस्थाः प्रजापतेः।। (वन, 272.47)

वेदतुल्य-वैदिकवाङ्मय-वराहरूपेण भगवान् श्रीकृष्णो जलं प्रविशति। तस्य देदीप्यमानं शरीरं, मेघस्वनसदृशः गम्भीरः कण्ठस्वरः, अंगकान्तिः नीलजीमूतसंनिभा। तेन स्वदंष्ट्रोद्धृता पृथिवी स्वस्थाने स्थापिता। महाबाहुः श्रीहरिः अपूर्वं तनुं धरति। स नृसिंहरूपेण हिरण्यकशिपुं निहत्य पुनः जनहिताय अन्यरूपेण प्रकटितोऽभवत् –

कृत्वा वराहवपुषं वाङ्मयं वेदसम्मितम्। दशयोजनविस्तीर्णमायतं शतयोजनम्।।

महापर्वतवर्ष्माभं तीक्ष्णदंष्ट्रं प्रदीप्तिमत्। महामेघौघनिर्घोषं नीलजीमूतसंनिभम्।।

(वन, 272.53,54)

वामनरूपेण तेन बलिना प्राप्ता मेदिनी देवराजाय समर्पिता। दुष्टदमनाय धर्मसंस्थापनार्थाय आविर्भूतः विष्णुः हि श्रीकृष्णः स्वयम्। स अनादिः, अनन्तः, अजः, दिव्यस्वरूपः, विश्ववन्दितः, अपराजितः, शंखचक्रगदाधारी, पीतपट्टाम्बरः इति विशेषणैः विभूषितः –

स एवं भगवान् विष्णुः कृष्णेति परिकीर्त्यते। अनाद्यन्तमजं देवं प्रभुं लोकनमस्कृतम्।।
यमाहुरजितं कृष्णं शङ्खचक्रगदाधरम्। श्रीवत्सधारिणं देवं पीतकौशेयवाससम्।।

(वन, 272.73,74)

राजा संजयः धृतराष्ट्रसमीपे श्रीकृष्णस्य विविधानां नाम्नां व्युत्पत्तिं कथयति। सर्वभूतानां वसनात् श्रीकृष्णो हि वसुः, देवतानाम् उत्पत्तिस्थानाद् देवः अत एव स वासुदेवः इति नाम्ना प्रसिद्धः। बृहत्त्वाद् व्यापकत्वात् स विष्णुः, मौनध्यानयोगबोधात् स माधवः, सर्वतत्त्वमयात् सर्वतत्त्वोपादानात् स मधुहा इत्यादिभिः नामभिः सुप्रसिद्धः। ''कृष्'' धातुः सत्तावाचकः, ''ण'' शब्द आनन्दवाचकः अतः नित्य-आनन्दस्वरूपः श्रीविष्णुः हि कृष्णः[1]।

अक्षतभावात् कमलाक्षियुक्तहेतोः वा पुण्डरीकाक्षः, दस्युजनानां त्रासात् स जनार्दनः। सत्याद् न च्युतः सत्त्वाद् न विच्छिन्नः अतः स सात्वतः। वेदे भासितत्वात् स आर्षभः। आर्षभात् स वृषभेक्षणः। केनापि जन्मदात्रा स न जायते अतः स अजः। उत्कृष्टरूपेण प्रकाशनात् स उदरः। इन्द्रियसंयमाद् दामः अतएव द्वयोः संयोगात् स दामोदरः। सुखात् हृषीकः, सुखैश्वर्याद् ईशः अतः स हृषीकेशः। सबाहुभ्यां पृथिव्याः धारणात् स महाबाहुः। कदापि अधो न क्षीयते अस्यातः सः अधोक्षजः। नराणाम् आश्रयत्वान् नारायणः। सर्वपुरुषाणाम् उत्तमात् स पुरुषोत्तमः। सतोऽसतः उत्पत्तिलयत्वात् स सर्वः। विक्रमणात् स विष्णुः जयहेतोः वा जिष्णुः, शाश्वत्वाद् अनन्तः, इन्द्रियाणि प्रकाशयति गां विन्दति वा स गोविन्दः [2]।

राज्ञा धृतराष्ट्रेण उद्योगपर्वणि भगवतः महिमा वर्ण्यते। भगवान् श्रीकृष्णः शत्रुहन्ता, वरेण्यः सनातनऋषिः, ज्ञानी, वागीशः, विघ्नविनाशकश्च। गरुडः तस्य स्वरूपम्, प्रजानामाश्रयः। स सहस्रशीर्षः,

---

[1] वसनात् सर्वभूतानां वसुत्वाद् देवयोनितः । वासुदेवस्ततो वेद्यो बृहत्त्वाद् विष्णुरुच्यते ।।
मौनाद् ध्यानाच्च योगाच्च विद्धि भारत माधवम् । सर्वतत्त्वमयत्वाच्च मधुहा मधुसूदनः ।।
कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । विष्णुस्तद्भावयोगाच्च कृष्णो भवति सात्वतः ।।

[2] न जायते जनित्रायमजस्तस्मादनीकजित् । देवानां स्वप्रकाशत्वाद् दमाद् दामोदरो विभुः।।
हर्षात् सुखात् सुखैश्वर्याद्धृषीकेशत्वमश्नुते । बाहुभ्यां रोदसी बिभ्रन्महाबाहुरिति स्मृतः ।।
अधो न क्षीयते जातु यस्मात् तस्मादधोक्षजः । नराणामयनाच्चापि ततो नारायणः स्मृतः ।।
विष्णुर्विक्रमणाद् देवो जयनाज्जिष्णुरुच्यते ।। शाश्वतत्वादनन्तश्च गोविन्दो वेदनाद् गवाम् ।
(तत्रैव, उद्योग, 70.8-10,13).

पुराणपुरुषः, अनादिरन्तश्चेति, अक्षयकीर्त्या सुशोभितः। स वीजवीर्यधारणकारी, नित्यः परमेश्वरः, त्रैलोक्यनिर्माता, देवासुरनागरक्षसां जनयिता, ज्ञानिप्रवरः। अतः श्रीकृष्णस्य शरणं सर्वैः स्वीकर्तव्यम् –

ऋषिं सनातनतमं विपश्चितं वाचः समुद्रं कलशं यतीनाम्।
अरिष्टनेमिं गरुडं सुपर्णं हरिं प्रजानां भुवनस्य धाम।।
त्रैलोक्यनिर्माणकरं जनित्रं देवासुराणामथ नागरक्षसाम्।
नराधिपानां विदुषां प्रधानमिन्द्रानुजं तं शरणं प्रपद्ये।।

(उद्योग, 71.5,7)

भीष्मपर्वणि पञ्चत्रिंशत्तमाध्याये (गीतायां एकादश अध्याये) भगवतः कृष्णस्य विश्वरूपं दृष्ट्वा अर्जुनेन या स्तुतिः कृता सा कृष्णस्तुतिरिरिति विहिता भगवतः विश्वरूपवर्णनायाम्। स परब्रह्म, परमात्मा, जगतः परमाश्रयः, सर्वशक्तिमान् , शाश्वतधर्मगोप्ता, अनन्तवीर्यः। स देवदेवः, जगतः परमाधारः अतः स जगन्निवासः। अत्र अर्जुनेन स्तवननमस्कारेण साकं श्रीकृष्णसमीपे क्षमाप्रार्थना क्रियते। स ब्रह्मणः आदिकर्ता, आदिदेवः, विश्वस्य परमं निधानं, चराचरस्य पिता, गुरुर्गरीयान्, चतुर्भुजः, विश्वरूपः इत्यादिभिः विशेषणैः विभूषितः –

त्वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम्।
त्वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे।।

(भीष्म, 35.18)

स्तुतिसाहित्यस्य वर्णना महाभारते बहुशः परिलक्ष्यते। भगवतः श्रीकृष्णस्य माहात्म्यवर्णनकाले युधिष्ठिरस्य महानुभवता परिचीयते। जगत्स्रष्टुः श्रीकृष्णस्य महिमवर्णना संस्कृतसाहित्ये अमृतस्वरूपा। युधिष्ठिरः श्रीकृष्णस्य स्तुतिं कृत्वा सर्वेषां हृदये सद्गुणस्य भक्तिभावस्य च समावेशं करोति। स पुराणपुरुषः, परमदेवः, देवदेवः, सनातनः , जगत्स्रष्टा, विश्वविधाता, अविकारी। चतुर्वेदे तस्य यशोगानं गीयते। सः परमेश्वराणां शरणं, सर्वेश्वरः, नरेश्वरः, ईश्वराणाम् ईश्वरः, उत्पत्तिप्रलययोः कारणम्, सत्यः, महान् तेजः, तपः, श्रेयः, यशः, जगतः कारणम्, स्थावरजंगमस्रष्टा। स अनादिनिधनः, दिव्यस्वरूपः, धाता, विश्वतोमुखः इति नामभिः प्रसिद्धः। यथा इन्द्रः देवान् रक्षति तथैव श्रीकृष्णः सर्वलोकान् रक्षति। अतः श्रीकृष्णस्य सश्रद्धभजनम् अवश्यमेव कर्तव्यम् –

अनादिनिधनं देवं विश्वस्येशं जगत्पते। धातारमजमव्यक्तमाहुर्वेदविदो जनाः।।
सर्वतो रक्षणीयाः स्म शक्रेणेव दिवौकसः। यैस्त्वं सर्वगुणोपेतः सुहृन्न उपपादितः।।

(द्रोण, 149.30,34)

शान्तिपर्वणि त्रिचत्वारिंशाध्याये युधिष्ठिरस्य श्रीकृष्णस्तवनं भक्तिभावापन्नम्। स विश्वकर्मा, विश्वसम्भवः, पापहरणाद्धरिः, आकृष्टकारणात् कृष्णः। विकुण्ठधाम्नः अधिपतिः, अतः सः वैकुण्ठः। क्षरोऽक्षरपुरुषाणाम् उत्तमेषु पुरुषोत्तमः इति विशेषणैः विभूषितः। त्रियुगप्रकटकारणात् सः त्रियुगः, अदितिगर्भोऽवतारहेतोः पृश्निगर्भः इति कथ्यते बुधैः। वराहः, अग्निः, बृहद्भानुः, वृषभः, गरुडध्वजः, शत्रुसेनानां वेगसहनहेतोः स शिपिविष्टः, उरुक्रमः चैतानि सर्वाणि तेषां नामानि। स यज्ञस्वरूपः, इन्द्रदर्पदलनाद् वृषदर्भः, हरिहरः, सिन्धुः, निर्गुणपरमात्मा, ऊर्ध्वमध्यधः इति त्रिसृणां दिशां हेतोः त्रिककुपः, सूर्यचन्द्रोऽग्नितेजहेतोः स त्रिधामा, सम्राट्, विराट्, सर्वत्रव्यापकः, निराकारः परमात्मा। स मयूरपंखधारकः अतः सः शिखण्डी, नक्षत्ररूपी पुनर्वसुः, आकाशव्याप्तकारी महेश्वरः, पिङ्गलवर्णयुक्तः सुबभ्रुः, सुन्दर-सेनासम्पन्नः सुषेणः, रुक्मयज्ञः –

कृष्णधर्मस्त्वमेवादिर्वृषदर्भो वृषाकपिः। सिन्धुर्विधर्मस्त्रिककुप् त्रिधामा त्रिदिवाच्युतः।।

शिखण्डी नहुषो बभ्रुर्दिवःस्पृक् त्वं पुनर्वसुः। सुबभ्रू रुक्मयज्ञश्च सुषेणो दुन्दुभिस्तथा।।

(शान्ति, 43.10,13)

सः कालचक्रः, श्रीपद्मः, पुष्करः, पुष्पधारी, ऋभुः, विभुः, जलनिधिसमुद्रः, ब्रह्मा, पवित्रधाम, धामवित्, हिरण्यगर्भः, स्वधा, स्वाहा इति विशेषणैः विभूषितः। स जगतः आदिकारणं, धनुश्चक्रखडगधारी परमात्मा –

अम्भोनिधिस्त्वं ब्रह्मा त्वं पवित्रं धाम धामवित्।

हिरण्यगर्भं त्वामाहुः स्वधा स्वाहा च केशव।।

योनिस्त्वमस्य प्रलयश्च कृष्ण त्वमेवेदं सृजसे विश्वमग्रे।

विश्वं चेदं त्वद्वशे विश्वयोने नमोऽस्तु ते शार्ङ्गचक्रासिपाणे।।

(शान्ति, 43.15,16)

शान्तिपर्वणि एकपञ्चाशततमाध्याये भीष्ममुखेन श्रीकृष्णः स्तूयते। श्रीकृष्णस्य महिमा, वैशिष्टानि रूपाणि तेन वर्ण्यन्ते। स जगतः कर्ता संहर्ता च। स प्राणिनां मोक्षस्वरूपः, पञ्चभूतानां परतः, त्रिगुणातीतः, योगेश्वरः सर्वपरायणः सः –

विश्वकर्मन् नमस्तेऽस्तु विश्वात्मन् विश्वसम्भव।

अपवर्गोऽसि भूतानां पञ्चानां परतः स्थितः।।

(शान्ति, 51.3)

स वायुरूपं धारयित्वा सप्तमार्गं परिव्याप्तः। स्वर्गलोकं शिरसा परिव्याप्तः वसुन्धरा च पद्भ्यां स परिव्याप्ता। तस्य दिक् बाहुः, शशीसूर्यनेत्रः, वीर्ये प्रतिष्ठितः शुक्रः। अतसीपुष्पसदृशः तस्य श्रीविग्रहः। तस्योपरि पीताम्बरं शोभते अतः स पीताम्बरः। तस्य शरीरे सविद्युन्मेघो शोभते –

दिवं ते शिरसा व्याप्तं पद्भ्यां देवी वसुन्धरा। दिशो भुजा रविश्चक्षुर्वीर्ये शुक्रः प्रतिष्ठित।।

अतसीपुष्पसंकाशं पीतवाससमच्युतम्। वपुर्ह्यनुमिमीमस्ते मेघस्येव सविद्युतः।।

(शान्ति, 51.7,8)

शान्तिपर्वणि सप्तचत्वारिंशाध्याये भीष्मस्य श्रीकृष्णस्तुतिः भक्तिभावापन्ना माहात्म्यपूर्णा च। स सहस्रशीर्षं, सहस्रचरणयुक्तः, सहस्राक्षः, सहस्रबाहुः, मुकुट- सहस्रवदनैः देदीप्यमानः। स विश्वस्य परमाधारः अतः स नारायणदेवः, सूक्ष्माद् सूक्ष्मः, स्थवीयसां स्थविष्ठः, वाक्-अनुवाक्-निषद्-उपनिषत्सुसाममन्त्रेषु च स सत्कर्मा, युगादिषु ब्रह्म, युगान्तेषु संकर्षणः इति विशेषणैः विभूषितः। स शुक्लपक्षे देवान् कृष्णपक्षे पितृन् तृप्यति। सम्पूर्णद्विजानां नृपः सः। अतः सोमस्वरूपं परमात्मानं नमस्करोति। ऋग्यजुसामवेदाः तस्य आश्रयाः, पञ्चहविष्यं तस्य स्वरूपम्, गायत्र्यादिछन्दांसि सप्ततन्तुः। अतः यज्ञरूपधारिणं परमात्मानं सर्वे श्रद्धया प्रणमन्ति। आश्रावय, अस्तु, श्रौषट्, यज, ये यजामहे, वषट् इत्यादिभिः सप्ताक्षरमन्त्रैः हविष्यप्रदानकारिणं होमस्वरूपं परमेश्वरं नमस्कुर्वन्ति सर्वे[3]।

पदसमूहः तस्यांगं, संधिः शरीरस्य पर्व, स्वरव्यञ्जनः तस्य आभूषणम्। अतः वाणीरूपपरमेश्वरः वन्द्यते। स योगमायाबलेन शेषनागफणासहस्रचितं पर्यङ्कं अधिशेते। अतः निद्रारूपः परमात्मा सर्वेषां वन्दनीयः। इहलोके स अव्यक्तरूपेण विराजते। स सर्वक्षेत्रक्षेत्रज्ञः। अतः उच्यते क्षेत्ररूपिणे परमात्मने नमः –

यः शेते योगमास्थाय पर्यङ्के नागभूषिते। फणासहस्ररचिते तस्मै निद्रात्मने नमः।।

यं च व्यक्तस्थमव्यक्तं विचिन्वन्ति महर्षयः। क्षेत्र क्षेत्रज्ञमासीनं तस्मै क्षेत्रात्मने नमः।। (शान्ति, 47.49,53)

स सर्वभूतानि संभक्ष्य एकार्णवं करोति। बालरूपं धारयित्वा अक्षयवटपत्रं अधिशेते। अतः मायामयबालमुकुन्दाय नमः। तस्य केशेषु जलदा, सर्वांगसन्धिषु नद्यः, कुक्षौ चत्वारसमुद्रा विद्यन्ते। अतः कविः जलरूपिणं परमात्मानं प्रणामं व्याहरति। स युगे युगे आविर्भवति। अतः उच्यते कालरूपिणे परमात्मने

---

[3] शुक्ले देवान् पितृन् कृष्णे तर्पयत्यमृतेन यः । यश्च राजा द्विजातीनां तस्मै सोमात्मने नमः।।
ऋग्यजुःसामधामानं दशार्धहविरात्मकम् । यं सप्ततन्तुं तन्वन्ति तस्मै यज्ञात्मने नमः ।।
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां तस्मै होमात्मने नमः ।।
(तत्रैव, शान्ति, 47.40,43,44).

नमः। तस्य ब्रह्म वक्त्रं, सम्पूर्णक्षत्रिया-भुजौ, वैश्यः ऊरूदरम्, शूद्रः तस्य चरणे आश्रितः। अतः कविः चातुर्वर्ण्यरूपं परमेश्वरं नमस्करोति –

सम्भक्ष्य सर्वभूतानि कृत्वा चैकार्णवं जगत्।
बालः स्वपिति यश्चैकस्तस्मै मायात्मने नमः।।
यस्य केशेषु जीमूता नद्यः सर्वांगसंधिषु।
कुक्षौ समुद्राश्चत्वारस्तस्मै तोयात्मने नमः।।
ब्रह्म वक्त्रं भुजौ क्षत्रं कृत्स्नमूरूदरं विशः।
पादौ यस्याश्रिताः शूद्रास्तस्मै वर्णात्मने नमः।।

(शान्ति, 47.58,61,68)

स अग्निमुखः, स्वर्गमस्तकः, आकाशनाभः। पृथिवी तस्य चरणयुगलम्, सूर्यः नेत्रम् दिशः कर्णः। ईदृशं लोकरूपपरमात्मनं नमस्करोति। स अनन्तनामक शेषनागरूपेण रसातले अवस्थाय जगत् शिरसा धारयति। अतः कविः वीर्यरूपधारिणं परमात्मानं प्रमणति- जटादण्डधारिणे लम्बोदराय कमण्डलुहस्ताय ब्रह्मरूपाय श्रीकृष्णाय त्रिशूलपाणये देवदेवाय रुद्राय त्रयम्बकाय परमात्मने नमः। सर्वस्थितः, सर्वोत्पादकः, सर्वस्वरूपः सर्वमयः, सर्वात्मा सर्वेषां वन्द्यः। यथा सत्यं विष्णुमयम्, जगद् विष्णुमयम्, सर्वं विष्णुमयम्। अतः संसारो विष्णुमयो भवेद् यतः सत्यप्रभावेन पापं नश्यति। नारायणः परमब्रह्म, परमं तपः, परो देवः। नारायणो हि सर्वत्र विराजते। अतः श्रीकृष्णस्य वन्दना सर्वेषां कर्तव्या –

यथा विष्णुमयं सत्यं यथा विष्णुमयं जगत्।
यथा विष्णुमयं सर्वं पाप्मा मे नश्यतां तथा।।
नारायणः परं ब्रह्म नारायणपरं तपः।
नारायणः परो देवः सर्वं नारायणः सदा।।

(शान्ति, 47.97,100)

सभापर्वणि अष्टात्रिंशाध्याये शान्तनुनन्दनः भीष्ममुखेन श्रीकृष्णस्य महिमवर्णना स्तुतिश्च महाभारतीय-स्तुतिसाहितस्य एकम् अनन्यम् उदाहरणम्। सः त्रयाणां लोकानाम् अर्चनीयः। कृत्स्नं जगत् श्रीकृष्णेन पूर्णरूपेण प्रतिष्ठितः। स ज्ञानवृद्धानां द्विजातीनां च परमः पूज्यः। बलाधिकं दानं, दाक्ष्यं, श्रुतं, शौर्यं, ह्रीः, कीर्तिः, बुद्धिः, सन्नतिः, श्रीः, धृतिः, तुष्टिः, पुष्टिश्चैतेसर्वगुणाः तस्य मध्ये विराजमाना। स अव्यक्तप्रकृतिः, सनातनः, सर्वभूतात्मा अतः सः पूज्यतमः –

न हि केवलमस्माकमयमर्च्यतमोऽच्युतः। त्रयाणामपि लोकानामर्चनीयो महाभुजः।।

एष प्रकृतिरव्यक्ता कर्ता चैव सनातनः। परश्च सर्वभूतेभ्यस्तस्मात् पूज्यतमोऽच्युतः।।

(सभा, 38.9, 24)

महत्तत्त्व-अहंकार-एकादशेन्द्रिय-आकाश-वायु-तेज-जल-पृथिवी-जरायुज-अण्डज-स्वेदज-उद्भिज-प्रभृतयः तस्य मध्ये प्रतिष्ठिताः। यथा वेदानाम् अग्निहोत्रकर्म, छन्दसां गायत्री, मनुष्याणां नृपः, नदीनां समुद्रः, नक्षत्राणां चन्द्रमा, तेजोमयपदार्थानां सूर्यः, पर्वतानां मेरुः, पक्षिणां गरुडः श्रेष्ठः तथैव सम्पूर्ण ऊर्ध्वतिर्यगधलोकेषु भगवान् श्रीकृष्णः श्रेष्ठः। उद्गाता उच्चस्वरैः सामगानेन श्रीकृष्णस्य स्तुतिं करोति – **उद्गाता चापि मां स्तौति गीताघोषैर्महाध्वरे** (आश्वमेधिक, 54.10)। मल्ला-नटा-ग्रान्थका-सौख्यशायिका-सुतमागधाः श्रीकृष्णस्य स्तुतिं कुर्वन्ति (आश्वमेधिक, 70.8)। सर्वे ऋषयः भगवान् श्रीकृष्णस्य अपूर्वमहिमानं दृष्ट्वा अर्थयुक्तऋङ्मन्त्रेण तं स्तुवन्ति – **वर्धयन्तस्तथैवान्ये पूजयन्तस्तथापरे। वाग्भिर्ऋग्भूषितार्थाभिः स्तुवन्तो मधुसूदनम्** (अनुशासन, 139.46)।।

वेदादारभ्य स्तुति-स्तोत्र-सूक्तादीनां पोषणं संस्कृतसाहित्ये दृश्यते। स्तुतिषु देवतानां शक्ति-स्वरूप-वैशिष्ट्य-कर्मादिविषयाः स्पष्टीभवन्ति। भक्तिभावजागरणाय व्यासदेवेन शब्दार्थानां समुचितप्रयोगः कविभिः शिक्षणीय इति प्रतिपाद्यते। शोधनिबन्धेऽस्मिन् एतस्याः स्तुतेः साहित्यिकमूल्याङ्कनं विहितं मया। शोधनिबन्धे एतस्याः स्तुतेः साहित्यिकमूल्यं समुचितमस्ति। अनेन स्तुतिसाहित्येन परवर्त्तिस्तोत्रसाहित्यं समुद्भूतमस्ति।

****

सहायकग्रन्थः

श्रीमन्महर्षिवेदव्यासप्रणीतमहाभारतम् (प्रथमखण्डः), प्रकाशकः – गोविन्दभवन कार्यालय, गीताप्रेस, गोरखपुरम्, अष्टादशसंस्करणम्, 2075 संवत्सरम्, उद्योगपर्वणि, अध्यायः - 70, श्लोकः 3-5)

****

Author's Detail

Name	:	**SANGITA MONDAL**
Designation	:	गवेषिका, संस्कुत विभागः, विश्वभारती
Address	:	Department of Sanskrit, Visva-Bharati, Santiniketan - 731235
Email Id	:	sajansansgeo@gmail.com

महाभाष्यानुसारेण "तदस्यास्त्यस्मिन् इति मतुप्"इति सूत्रविवरणम्

- अर्चकम्. श्रीविद्या

अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा।

आदौ वेदमयी दिव्या ततः सर्वाः प्रवृत्तयः॥

धर्ममार्थकाममोक्षात्मकचुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः। वेदाध्ययनादेव मोक्षः सिध्यति। धर्माथकामाः यद्यपि पुरुषार्थाः तथापि क्षीणेपुण्ये मर्त्यलोकं विशन्ति इति उक्त्यनुसारेण तेषां न परमपुरुषार्थता। न स पुनरावर्तत इति इति प्रमाणानुसारेण मोक्षः परमपुषार्थः। तथा च उक्तं वेदाध्ययनात् ऋते न मोक्षोपलब्धिः इति। महाभाष्यकारः पतञ्जलिरवदत् ब्रह्मणेन निष्कारणो धर्मः षडङ्गो वेदः अध्येतव्यो ज्ञेयश्च इति –

शिक्षा, व्याकरणं, छन्दः, ज्योतिषं, निरुक्तं, कल्पः इति इमानि षडङ्गानि। एवञ्च वेदपुरुषस्य मुखस्थानं भजते व्याकरणम्। मुखं व्याकरणं स्मृतं इति पाणिनीयशिक्षावचनम्। एवञ्च शरीरावयवेषु मुखस्यैवात्यन्तं प्राधान्यम्। यथा मुखं विना भोजनं भोक्तुं न शक्नुमः तद्वत् व्याकरणज्ञानं विना वेदाध्ययनं न सुलभम्।

एवञ्च किमिदं व्याकरणम् इति प्रश्ने सति उच्यते- अनुशास्यन्ते असाधुशब्देभ्यः साधु शब्दाः विविच्यन्ते अनेन इति व्याकरणम्। साधुत्वविषया सैषा व्याकरणस्मृतिः इति भर्तृहरिः। व्याक्रियन्ते शब्दाः अनेन इति व्याकरणम्। महाभाष्यकारः पतञ्जलिः पस्पशाह्निके अवदत् लक्ष्यलक्षणे व्याकरणम् इति। अर्थात् लक्ष्यलक्षणमेतत् समुदितं व्याकरणम् इति। यथा लक्षणं सूत्रं , लक्ष्यं शब्दः।

महाभाष्यकारः पतञ्जलिः व्याकरणसूत्राणां विषये इत्थमवदत्- **प्रमाणभूत आचार्यः दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति**[1] स्म । तत्राशक्यं वर्णेनापि अनर्थकेन भवितुम्, किं पुनरियता सूत्रेण इति वैशिष्ट्यं सूत्राणाम्। अष्टाध्यायीग्रन्थे पाणिनिना विरचिततद्धितप्रत्ययानां महद्वैशिष्ट्यं वर्तते। तद्धितमूढावैयाकरणाः, तद्धितम् ऊढाः वैयाकरणाः इति सुप्रसिद्धं वचनम्। अर्थात् तद्धितमूढाः इत्यत्र ये तद्धितेषु मूढाः ते अवैयाकरणाः इति। एवञ्च ये तद्धितम् ऊढाः (तद्धितज्ञानवन्तः) भवन्ति ते वैयाकरणाः इति। एतेन ज्ञायते यत् व्याकरणे तद्धितप्रत्ययाणां कियत् माहात्म्यं वर्तते इति। तद्धितप्रियाः दाक्षिणात्याः इति सुप्रसिद्धवचनम्।

---

[1] महाभाष्यम्

तत्र अधिकारसूत्रं भवति - तदस्यास्त्यस्मिन् इति मतुप् ५-२-९४ इत्यनेन सूत्रेण मतुप् प्रत्ययः विधीयते। उदाहरणम् यथा- गावः अस्य सन्ति इत्यर्थे गोमान् देवदत्तः इति। वृक्षाः अस्मिन् सन्तीति वृक्षवान् पर्वतः। अत्र प्रश्नः- अस्मिन् सूत्रे अस्ति, अस्मिन् इत्यनयोः ग्रहणं किमर्थम् ? इति आक्षेपः। यतोहि यस्य अस्ति तस्मिन् भवति। यस्मिन् अस्ति तस्य भवत्येव इति। अत्र समाधानम् - सूत्रे अस्ति अस्मिन् इत्यनयोः आवश्यकता अस्ति। यथा श्रूयते - देवदत्तस्य गावः इति चेत् न ते गावः देवदत्ते सन्ति। पर्वते वृक्षाः इति चेत् न ते वृक्षाः पर्वतस्य भवन्ति। अतः सूत्रे अस्ति अस्मिन् इत्यनयोः ग्रहणम्।

सूत्रे अस्ति ग्रहणं किमर्थमिति? उच्यते – मतुप् प्रत्ययः केवलं संप्रतिसत्तायामेव यथा भवतु इति। यदि भूतभविष्यदर्थेष्वपि मतुप् स्यात् तेन - गावो अस्य आसन् ,गावो अस्य भविष्यन्ति इत्यत्रापि प्राप्नुयात्, अस्ति ग्रहणेन केवलवर्तमानकाले एव प्रत्ययः भवति। गावः अस्य सन्ति, गावः अस्य आसन् इति वाक्यमेव भवति। अतःउक्तं महाभाष्ये "सम्प्रति सत्तायामेव(बाह्यसत्ता) यथा स्यात् भूतभविष्यत् सत्तायां मा भूत्" इति ।

मतुप् प्रत्ययः केवलं सत्ता मात्रे यदि स्यात् तर्हि व्रीहिरस्य अस्ति, यवः अस्य अस्तीत्यत्रापि प्राप्नोति ? इति चेत् उच्यते - भूमादि ग्रहणं क्रियते -

"भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।

सम्बन्धे अस्ति विवक्षायां भवन्ति मतुबादयः॥"

भूमा - बह्वर्थे भूरि गावः सन्त्यस्य इत्यर्थे मतुप् प्रत्ययः गोमान् इति। निन्दायां- ककुदावर्तिनी कन्या, प्रशंसायां - रूपवान्, नित्ययोगे - क्षीरिणो वृक्षाः, अतिशये- उदरिणी कन्या, संसर्गे - दण्डी इति उदाहरणानि। अत्र उच्यते भूमादिग्रहणं न कर्तव्यम् भूमादि ग्रहणाभावे अपि सूत्रे "इति" इति पदेन तेषां ग्रहणं क्रियते। अर्थात् भूमादियुक्तस्यैव सत्ता कथ्यते तेषामेव विवक्षा। क्वचित् ऋषि दर्शनात् केवल सन्मात्रेऽपि मतुप् प्रत्ययः विधीयते। यथा यवमतीभिरद्भिर्यूपं प्रोक्ष्यत इति अत्र यवानामल्पत्वेपि मतुप् प्रत्ययः भवति।

मत्वर्थात् न मत्वर्थीयः भवति – मत्वर्थीयात् मत्वर्थीयेन भवितव्यमिति पूर्वपक्षिणामाशयः? अत्र समाधानम्- मत्वर्थीयात् पुनः मत्वर्थीयः प्रत्ययः न विधीयते। यतो हि अर्थगत्यर्थकः शब्दप्रयोगः इति। अर्थस्य गतिः अर्थगतिः,अर्थगतेरर्थः अर्थगत्यर्थः, सः शब्दः अर्थात् प्रयोगः। अर्थं संप्रत्याययिष्यामीति शब्दः प्रयुज्यते। एवञ्च एकेनार्थेन उक्तत्वात् पुनः तस्मिन् एवार्थे प्रत्ययः नोच्यते। "उक्तार्थानामप्रयोगः" इति नियमात्। यः प्रत्ययः यस्मिन् अर्थे उक्तः तस्मिन्नेवार्थे पुनः प्रत्ययः नोच्यते।

एवं मत्वर्थीयान्न मत्वर्थीयः इति सिध्यति। अत्र पुनः प्रश्नः दण्डिमती शाला, हस्तिमत्युपत्यका इत्यादि स्थलेष्वपि प्रत्ययस्य सिद्धिः न स्यात्? दण्डाः येषां सन्ति ते दण्डिनः इति "अत इनिठनौ" ५-२-११५ "इनि" प्रत्ययान्तः, दण्डिनः सन्त्यस्यां शालायामिति पुनः तत्र मतुप् प्रत्ययः विधीयते। हस्तः अस्य अस्तीत्यर्थे "हस्ताज्जातौ" ५-२-१३ इति सूत्रेण इनि प्रत्ययः विधीयते। पुनः हस्तिनः सन्ति अस्यां हस्तिमत्युपत्यका इति। अत्र समाधानम् - अत्र तु भवत्येव "अर्थान्तरे वृत्तमर्थान्तरे वृत्तिः" इति नियमात्। प्रथमं दण्डिनः इत्यत्र षष्ठ्यर्थे प्रत्ययः विहितः, पुनः दण्डिमती इत्यत्र सप्तम्यर्थे प्रत्ययः विहितः। अतः अर्थान्तरे मत्वर्थात् मतुप् भवत्येव।

द्वितीयः प्रश्नः - मत्वन्तात् मतुप् प्रत्ययः भवति वा न वा इति। यथा गावः सन्ति येषां ते गोमन्तः भवति , गोमन्तः सन्ति अस्य ग्रामस्य इत्यर्थे पुनः मतुप् प्रत्ययः भवति वा न वा इति। न, यतो हि अत्र गोभिः साक्षात् सम्बन्धे गोमान् इति गोमन्तः अस्य सन्तीत्यत्र पारम्परिकसम्बन्धः अतः अत्र न भवति। यथा दण्डिमती शाला हस्तिमत्युपत्यका इति स्थलेषु यथा अर्थान्तरे वृत्तमर्थान्तरे वृत्ति इति नियमेन गोमन्तः सन्ति अस्मिन् देशे इति यदि उच्यते तर्हि मतुप् प्राप्नोति , इति चेत् उच्यते- मत्वर्थीयान्मतुबादेः प्रतिषेधः वक्तव्यः इति वार्तिकेन निषिध्यते। तर्हि दण्डिमती हस्तिमती इत्यत्र न सिध्यति इति चेत् , तत्र समानवृत्तौ सरूपे इति उच्यते समानवृत्तौ सरूपप्रत्ययौ न भवतः इति। तथा च अत्र कारिका –

"शैशिकान्मत्वर्थीयाच्छैशिको मतुबर्थिकः।
सरूपप्रत्ययो नेष्टः सनन्तात् न सनिष्यते॥ "

यथा गावः सन्ति अस्य इति अर्थे मतुप् प्रत्यये गोमान् इति सिध्यति। गोमन्तः ग्रामाः अस्य सन्तीति, यवमन्तः अस्य सन्तीति अर्थेषु मत्वन्तात् न पुनः मतुप् प्रत्ययः विधीयते। यतः अत्र उक्तार्थानामप्रयोगः इति नियमः न पुनः मत्वर्थे मतुप् प्रत्ययः। अतः गोमान् देशः इत्यादि वाक्यमेव। अत्र पुनरेकं वार्तिकं दृश्यते। "समानवृत्तौ सरूपे" इति। समानवृत्तौ सरूपप्रत्ययौ न भवतः इति - एतेन दण्डिमती शाला हस्तिमत्युपत्यका इत्यादि सिध्यति। गुणवचनेभ्यः मतुप्प्रत्ययस्य लुक् भवति। यथा कृष्णः पटः, शुक्लः पटः इत्यादि। अत्र विहित मतुपः लुक् उच्यते। इत्थं महाभाष्ये मतुप् प्रत्ययविशये वर्णितमस्ति।

****

सन्दर्भग्रन्थसूची-

1. महाभाष्यम् – व्याकरणमहाभाष्यम्, टीकाकारः - हरिनारायणतिवारी, प्रकाशकः - चौखम्बा विद्याभवनम्।
2. काशिका, प्रकाशकः - जयकृश्णदास हरिदासगुप्ता – चोखम्बा संस्कृतसीरीज्।
3. सिद्धान्तकौमुदी – बालमनोरमा - वासुदेवदीक्षितः, संशोध्यप्रकाशिता-चम्द्रशेखरशास्त्रिणा।
4. वाक्यपदीयम् – प्रकाशकः चौखम्भासंस्कृतसीरीज्, मुद्रकः-विद्याविलास् प्रेस् , वाराणसी, द्वितीयसंस्करणम्, 2018

****

Author's Detail

Name	:	**ARCHAKAM. SREEVIDYA**
Designation	:	PhD scholar
Address	:	Dept of vyakaranam, Rastriya Sanskrit Vidyapeetha, Tirupati
Email Id	:	archakamsreevidya@gmail.com

,

,

,

याज्ञवल्क्यस्मृतौ सीमानिर्णयविवादस्य पर्यालोचनम्

- लीना भोइ

शोधसारः –

स्मृतिग्रन्थ: प्रमुखतया वेदस्य अर्थ: वैदिकधर्मस्य च व्याख्यानं करोति । धर्माचरणम् सदाचारश्च अस्य ग्रन्थस्य प्रमुखविषयेषु अन्यतमाः । धर्मशास्त्रे स्मृत्यादिनां साकं वेदधाराया सूत्रसाहित्यस्य अपि गुरुत्वं भवति । संपूर्ण विश्वस्य संचालनार्थं इश्वरस्य निर्णय धारणपूर्वकं राष्ट्रसंचालनार्थं शासनविधानस्य आवश्यकता वर्तते । तत् विधानं स्मृतिषु व्यवस्थितरूपेण प्रतिभाति । सीमानिर्णयविवादः इदानीं समाजे विवादेषु प्रमुखः भवति । तस्य समाधानं याज्ञवल्क्यस्मृतौ सुष्टुतया उल्लिखितमस्ति । सीमानिर्णयभेदाः , विधिः, विधिः उल्लघने दण्डविधानादयः प्रस्तुतप्रबन्धे वर्णिताः सन्ति।

कूटशब्दाः – स्मृतिः , सीमाविवादः , सीमानिर्णयः , दण्डविधानम्।

****

प्रस्तावना

मनुस्मृते: अनन्तरं द्वितीयमहत्त्वपूर्ण: स्मृतिग्रन्थरूपेण याज्ञवल्क्यस्मृति: अन्यतम: । याज्ञवल्क्यस्मृते: अध्यायत्रय: विराजमानाः सन्ति । ते भवन्ति यथा -

१- आचाराध्याय:

२-व्यवहाराध्याय:

३-प्रायश्चिताध्याय:

अस्य स्मृतिग्रन्थस्य श्लोका: अनुष्टुप्छन्दोवद्धा: । ग्रन्थेऽस्मिन् प्रायेण १००९ श्लोका: , अध्यायत्रयं तथा ४४ प्रकरणानि सन्ति । प्रथमे आचाराध्याये: १३ प्रकरणानि - ३६८ श्लोका:, द्वितीये व्यवहाराध्याये: २५ प्रकरणानि - ३०७ श्लोका: तृतीये प्रायश्चित्ताध्याये: ६ प्रकरणानि -३३४ श्लोका: सन्ति । स्मृतिषु प्रसिद्धयाज्ञवल्क्यस्मृतौ सीमानिर्णयविवादस्य विषये बहुनि तथ्यानि समुपलभ्यन्ते ।

विषयः -

भौगोलिकपरिसीमासु विवादत्वात् सीमानिर्णयस्य आवश्यकता वर्तते । राष्ट्रत: राष्ट्रस्य , प्रदेशत: प्रदेशस्य , ग्रामत: ग्रामस्य तथा क्षेत्रत: क्षेत्रस्य सीमानिर्णयार्थं रेखापरिमापकं भवति मापदण्ड: ।

संप्रति सीमानिर्णये राष्ट्र – प्रदेश – ग्राम - क्षेत्रभूम्यादिषु सर्वदा विवादा: परिलक्षन्ते । अत: प्रायत: प्रत्येकस्मिन् दिवसे कलहं सीमायुद्धं सन् जनजीवनानां हानीं भवति । उदा - पाकिस्तानस्य आविर्भावादनन्तरं निरन्तरं भारतपाकिस्तानमध्ये सीमाविवादं भवति । काश्मिरसीमाविवादकारणत्वात् आर्थिकाभावमपि भवति । इदानीं चीनदेशेन साकं अस्माकं भारतवर्षस्य सीमाविवाद: प्रचलति । भारतचीनसीमाविवादस्य परिणामं भयावह भविष्यति इति नास्ति कोऽपि सन्देह: । न केवलं पाकिस्तानचीनदेशेषु सीमाविवाद: जायते अपितु अन्येषां राष्ट्राणां मध्ये अपि सीमाविवाद: अस्ति ।

तदर्थं सीमाविवादस्य दीर्घस्थायीसमाधानस्य नितान्तमावश्यकम् । सीमाविवादस्य सामाधानं प्रसंगे प्राचीने भारतवर्षे संस्कृतभाषया रचितं स्मृतिग्रन्थानां मध्ये यथा - मनुस्मृति:, याज्ञवल्क्यस्मृति: , वशिष्ठस्मृति: , नारदस्मृत्यादिषु प्राञ्जल रूपेण उपायाः परिलक्षते । एतदर्थं सीमाविवादस्य समाधानार्थं याज्ञवल्क्यादि स्मृत्यादिषु निर्देशितानामुपायानाम् अध्ययनं पालनं च परममावश्यकं प्रतिभाति ।

आलोच्य विषयं याज्ञवलक्यस्मृते अध्यायत्रयस्य व्यवहाराध्याये नवमप्रकरणे विस्तृतरूपेण वर्णितमस्ति । अस्य पठनपाठनेन आधुनिक: सीमाविवादसमस्याया: काचित् समाधानमपि कर्तुं शक्नुम: । न केवलं राज्यवहिर्गत विवाद: ग्रन्थोऽयं अन्तर्राज्यीयविवाद: विषये सूक्ष्मातिसूक्ष्मरूपेण विवेचनं प्रस्तुयते महर्षियाज्ञवल्क्येन । सीमाविवाद: न तु केवलं देशस्य कृते समस्याया विषयं भवति अपितु प्रत्येकस्मिन् ग्रामे गृहे च अस्य विवादस्य प्रभावं परिदृश्यते ।

सीमाविवादस्य प्रकारद्वयं वर्तते- १- राज्यान्तर्गत:,२-राज्यवहिर्गत: ।

सीमाविवादस्य भेदाः -

कात्यायनानुसारेण सीमाविवाद: षड्विध: भवति यथा-

(१)- अत्यधिकभूयाचनाविवादः

(२)- स्वल्पभूदानविवादः

(३)- अंशस्य अधिकारप्रदर्शनगतविवादः

(४)- अन्यांशस्य प्रतिषेधगतविवादः

(५)- अभुक्तभूमेः अधिकारगतविवादः

(६)- भुक्तभूमैः अधिकारस्थापनागतविवादः

सीमानिर्णये ग्रामसीमा ,जनपदसीमादयः ग्रहणीयाः । महर्षिमनुमतेन सीमानिर्धारणाय काचित् वृक्षाः अपि परिगणितं भवन्ति । यथा- अश्वत्थः, शिमिलः, शालः,ताडः,गुलरादयः ।

यत्र राज्यविषयकं सीमाविवादोत्पन्नं भवति , तत्र उपर्युक्ततत्वसहायेन अन्तर्राज्यीयस्तरेण विवादनिष्पादितं भवति । नारदेन वस्त्वनुसारेण सीमानिर्धारणस्य नामानि अपि उल्लिखितमस्ति । तद्यथा-

(१)ध्वजिनी

(२) मत्स्यिनी

(३) नैधानी

(४) भयवर्णिता

(५) राजशासननीता

महर्षियाज्ञवल्क्येन व्यवहाराध्यायस्य १५०तः१५८ श्लोकयोर्मध्ये सीमानिर्णयविवादस्य विधिः दण्डविधानं च विषये वर्णनं मया अधोलिखितम् ।

सीमानिर्णयविधि:

ग्रामद्वयसम्बन्धिन: क्षेत्रस्य सीमाविवादे तथैक ग्रामान्तर्वर्तिक्षेत्रमर्यादाविवादे च सामन्तादयः , वृद्धपुरुषः , गोपालः , सीमावर्ती क्षेत्रस्वामी , वनचरादयः उच्चभूमि:, अङ्गार:, धान्यक्षेत्र:, प्राचीनवृक्ष:, सेतु: , वल्मीक: ,गर्त: , अस्थि: तथा पाषाणादिभि: पूर्वकृतै: सीमालक्षणै: सीमा निर्णयेयुः । सीमाक्षेत्रादि मर्यादा: सा चतुर्विधा:- जनपदसीमा,ग्रामसीमा,क्षेत्रसीमा,गृहसीमाश्चेति । यथा-

सीम्नो विवादे क्षेत्रस्य सामन्ता: स्थविरादय: ।

गोपा: सीमाकृषाणां ये सर्वे च वनगोचरा: ।।

नयेयुरेते सीमानं स्थलाङ्गारतुषद्रुमै: ।

सेतुवल्मीकनिम्नास्थिचैत्याद्ये रूपलक्षिताम् ।।[1]

(१) सीमानिर्णयसाधनमनुपलव्धे: सीमानिर्णय: -

यदि पूर्ववर्णितं किमपि चिह्नानि न सन्ति तर्हि सामन्ता:, पार्श्व ग्रामस्य चत्वार:,अष्ट: दश: आदि समसंख्यकं ग्रामवासी सम्मुखे , रक्तवर्णमालां, रक्तवर्णवस्त्रं ,मूर्धारोपिताक्षितिखण्डा: धारयित्वा सीमानिर्णयं कुर्यात् । यथा याज्ञवल्क्यमतेन-

सामन्ता वा समग्रामाश्चत्वारोऽष्टौ दशापि वा ।

रक्तस्रग्वसना: सीमां नयेयु: क्षितिधारिण: ।।[2]

(२) सामन्तादिनाम् अभावे सीमानिर्णय: -

सामन्तप्रभृतयो: ज्ञातारचिह्नामभावे सीमानिर्धारक: वृक्षादि समीपवर्ती सीमां दृष्ट्वा राजा सीमानिर्णयं कुर्यात् । यथा -

अभावे ज्ञातृचिह्नानां राजा सीम्न: प्रवर्तिता ।[3]

---

1 याज्ञ.स्मृ-२/१५०,१५१

2 याज्ञ.स्मृ-२/१५२

CC BY

(३) कूपखननसेतुनिर्माणसमये सीमानिर्णय: -

पुष्पफलोपचयत्वात् भूभाग: निवेशनं पलालादि कूटाद्यर्थं विभक्तो भूप्रदेश: ग्रामनगरादि – पानीयस्थानं , कूपप्रभृतिकम् , क्रीडार्थं भूमि:, गृहादिनां सीमानिर्णये पूर्वोक्तविधि: प्रयुज्य: । यथा-

"आरामायतनग्रामनिपानोद्यानवेश्मसु ।

एष एव विधिर्ज्ञेयो वर्षाम्बु प्रवहादिषु ।।"[4]

(४)कृषिक्षेत्रस्य सीमानिर्णयः -

य: पुनःक्षेत्रस्वामीः पार्श्वे "अहमिदंक्षेत्रंकृषामि" इत्यङ्गिकृत्य पश्चात् स्वयंकर्षणं न कृत्वा अन्येन अपि न कार्षयति तच्च क्षेत्रफलं दत्वा क्षेत्रं अन्यव्यक्ते: कर्षणार्थं दातव्यम् । यथा –

फलाहतमपि क्षेत्रं न कुर्याद्यो न कारयेत् ।

स प्रदाप्य: कृष्टफलं क्षेत्रमन्येन कारयेत् ।।[5]

दण्डविधानम् -

(१)असत्यभाषणे सामन्तादीनां कृते दण्ड: -

सीमानिर्णयसमये यदि सामन्तादय: असत्यं भाषयन्ति तर्हि राजा मध्यमसाहसेन चत्वारिंशदधिकेनपणपञ्चशतेन दण्डेन दण्डयेत् । यथा-

"अनृते तु पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ।"[6]

---

[3] याज्ञ.स्मृ-२/१५३

[4] याज्ञ.स्मृ-२/१५४

[5] याज्ञ.स्मृ-२/१५८

[6] याज्ञ.स्मृ-२/१५३

(२) सीमानिर्णये भूरेखाभंगस्य दण्ड: -

अनेक क्षेत्रव्यवच्छेदिका सामान्या भूरेखाः तस्या प्रकर्षेण भेदेन सीमातिक्रमणे , सीमामतिलङ्घ्य कर्षणे , भयप्रदर्शनेन क्षेत्रहरणे यथा क्रमेण अधमोत्तममध्यम: साहसा: दण्ड: वेदितव्या: । यथा-

मर्यादाया: प्रभेदे च सीमातिक्रमेण तथा ।

क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमा: ।।[7]

(३) सार्वजनिक कल्याणार्थं सेतुनिर्माणे तन्निषेधत: क्षेत्रस्वामिन: दण्डविधान: -

याज्ञवल्क्य मतानुसारम् -

न निषेध्योऽल्पबाधस्तु सेतु: कल्याणकारक: ।

परभूमिं हरन्कूप: स्वल्पक्षेत्रो बहूदक: ।। [8]

अर्थात् परस्य भूमेः नाशयन्नपि सार्वजनिककल्याणार्थं सेतु: , कूप:, पुष्करीण्यादिनिर्माणे क्षेत्रस्वामिना न प्रतिषेध्य: । कूप: च अल्पक्षेत्रव्यापित्वेन अल्पबाधो: बहूदकत्वेन कल्याणकारकश्चेतो बहूदको नैव निवारणीय: ।

पुनः याज्ञवल्क्येन उक्तम् -

स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्तयेत् ।

उत्पन्ने स्वामिनो भोगस्तदभावे महीपते: ।।[9]

अर्थात् यदा क्षेत्रस्वामी स्वीकृतिरहितत्वात् तस्य क्षेत्रे सेतुनिर्माणं कोऽपि करोति तदा सेतो: लाभफले: क्षेत्रस्वामि: अधिकारी: भवति परन्तु तस्याभावे राजा सेतो: स्वामी भवति ।

याज्ञवल्क्यस्मृतेः आवश्यकता -

साम्प्रतिककाले: याज्ञवल्क्यस्मृते: आवश्यकता: वर्तते ।

---

7 याज्ञ.स्मृ.-२/१५५

8याज्ञ.स्मृ-२/१५६

9 याज्ञ.स्मृ-२/१५७

CC BY

• सम्प्रति ग्रामग्रामयोर्मध्ये, गृहगृहयोर्मध्ये, राष्ट्रराष्ट्रयोर्मध्येसीमाविवाद: भवति । फलत: अस्य सीमाविवादस्य समाधानार्थं याज्ञवल्क्यस्मृते निर्देशिता नियमानां पालनं करणीयम् ।

• सीमाविवाद: भवति सकलप्रकाराणां विवादानां मध्ये अन्यतमम् । मानव: स्वस्य परिसीमाबर्धनार्थं सर्वदा प्रयत्नशील: । फलत: परिस्थित्यनुसारं स कदाचिदपि स्वस्य हिंस्रप्रवृत्तिनां प्रदर्शनेन अपरस्य प्राणनाशने उद्बुद्धं भविष्यति । अतः सीमानिर्णयविधि प्रसंगे निर्देशिता नियमानां ज्ञानार्थं याज्ञवल्क्यस्मृते आवश्यकता वर्तते ।

यद्यपि प्राचीनभारतवर्षस्य संविधानस्वरूप: मनुस्मृति: प्रसिद्धं भवति । तथापि सीमाविवादस्य समाधानं कृत्वा उत्तमोत्तमसमाजनिर्माणाय याज्ञवल्क्यस्मृते: आवश्यकता: नूनमेव वर्तते ।

आधुनिकयुगे सीमानिर्णयस्य औपचरिकम् –

(१)साम्प्रतिके सीमाविवादस्य कारणं भवति आधुनिकसमाजस्य विधिव्यवस्था तथा न्यायिकनियमा: । परन्तु यदि वयं प्राचीनस्मृतिग्रन्थानाम् अवलोकनं कुर्म तर्हि मन्वादिस्मृते तस्य समाधानं प्राप्तुं शक्नुम: । यद्यपि वयं एतस्य समाधानार्थं न्यायालयं प्रति गच्छाम तथापि प्राक्स्मृतीनां अवलम्बनेन अवश्यमेव अस्माकं हितसाधनं भविष्यति । प्राचीनकाले जना: स्मृतीश्रुत्यादिनां पालनं कृतमासन् । अतः ते सम्यक् रूपेण जीवननिर्वाहं कुर्वन्ति स्म ।

(२)वयं यदि सांप्रतिकसमाजस्य स्थितिं पश्याम तर्हि नूनमेव द्रष्टुं शक्नुम: यत् समाजे जना: क्षेत्रस्य कारणाय स्वस्मिन् मध्ये कलहं कुर्वन्ति । फलत: प्रतिदिनं सीमानिर्णयविवादस्य कारणात् हत्याऽपहरणादिनां घृण्यकार्याणां वृद्धिं भवति । परिवार– ग्राम–राष्ट्रेषु सर्वदा विवादं प्रचलति । समग्रसंसारं मानवस्य क्षेत्रलिप्सुकार्येषु सर्वदा पीड़ितं भवति । तदर्थं अस्मिन्नेव काले याज्ञवल्क्यादयः निर्देशित नीतिनियमानाम् आवश्यकताम् अनुभूयते । प्राचीनकाले यद्यपि आसीत् तदा तस्य आशुसमाधानमपि संजात: । परन्तु अस्य आशु समाधानं न भवति । सर्वकारस्य न्यायालया:

कार्यक्षमा: भवति चेत् तस्य समाधानं न संभवति । फलत: तस्य कारणात् अपराधादिनां वृद्धिं भवति । भारतवर्षे प्रतिदिनं सहस्रात्मकं अपराधं न्यायालये उपस्थापनं भवति । तन्मध्ये क्षेत्रजविवाद: अपि आगच्छति । एकेन सर्वेक्षणेन स्पष्टं भवति यत् भारतवर्षे सर्वाधिक विवादीय विषयः मध्ये सीमाविवाद: अस्ति । सर्वत्र सीमाविवादोपरि कलहं दृश्यति।

निष्कर्षः -

यद्यपि मन्वादिस्मृति सर्वमान्य भवति तथापि नारदस्मृते: यत् वर्णितमस्ति तत् अतीव सरलं महत्त्वपूर्णं च भवति । याज्ञवल्क्यस्मृतौ अधुना समाजे या या समस्या परिलक्षते तेषां समाधानं वर्णितम् । यद्यपि मनुस्मृति: सर्वत्र ग्रहणीयं भवति तथापि मानवसमाजकृते याज्ञवल्क्यस्मृत्यैरपि आवश्यकतामनुभूयते । यदि वयं संपूर्णरूपेण प्राचीनतत्वानां परित्यागं कुर्म तर्हि कदापि सफलतां प्राप्तुं न शक्नुम: इति अहं मन्ये ।

सहायकग्रन्थसूची

(१) सेत्लुर, एस्.एस्, याज्ञवल्क्यस्मृतिः, ब्रह्मवादीन् प्रेस, मद्रास, १९१२

(२) काणे, पि.वि., धर्मशास्त्रकाइतिहास, उत्तरप्रदेशहिन्दीसंस्थान, लक्नौ,१९९५

(३) सिंह, पं पि.डि., याज्ञवल्क्यस्मृति, चौखम्बा क्रिष्णदास अकादमी, वाराणसी,लक्नौ २०१४

(४) त्रिपाठी , प. श्यामसुन्दरलाल, अष्टादशस्मृतिः, श्रीवेङ्कटेश्वर प्रेस, वम्बै, १८३०

(५) स्वाई, डा.ब्रजकिशोर, स्मृतिमीमांसा, अक्षय प्रकाशन, नई दिल्ली, २००६

****

Author's Detail

Name : लीना भोइ

Designation : शोधछात्रा,संस्कृत विभागः

Address : गंगाधर मेहेर विश्वविद्यालयः, सम्बलपुरम्,ओडिशा

Email Id : leenabhoi1995@gmail.com

राजशेखरस्य काव्येषु सहजाहार्यप्रतिभाविमर्षणम्

- असीमहालदारः

शोधसारः-

राजशेखरः स्वीये काव्यमीमांसाग्रन्थे विभिन्नप्राचीनालङ्कारिकानां विचारान् संगृह्य तैः सह स्वीयविचारान् संकलितवान्। यतोहि अलङ्कारशास्त्रानि काव्यत्वस्य मानदण्डं निर्धारयति। अतः अनेन मीमांसाग्रन्थेन राजशेखरेण काव्यानां तथा कवीनां च मानदण्डं निर्धारिम्। यतोहि राजशेखरोऽलङ्कारशास्त्रेन सह काव्यान्यपि विरचितवान् अतोऽस्मिन् शोधपत्रे राजशेखरस्यालङ्कारशास्त्रस्यालोकैव तस्य कवित्वं तथा तस्य काव्यानां मानदण्डञ्च मीमांस्यते इति।

****

सुप्राचीनकालादेव अभिनयकला मानवसमाजस्य मनोरञ्जनाय मुख्योपादानरुपेण परिगण्यते। अस्या अभिनयकलायाः आधारोऽस्ति दृश्यकाव्यमिति। वेदस्य आख्यानधर्मी(यम-यम्यादि) संवादसूक्तानि एव एतेषां दृश्यकाव्यानां मूलमिति अधिकांशसमालोचकैः स्वीक्रियन्ते। कालान्तरे अस्या नाट्यकलायाः सर्वाङ्गिनविकाशप्रवाहः सहृदयकवीनां लेखन्यां विराजते। दशमशताब्द्याः कृत्रिमतायाः तथा अनुकरणप्रियतायाः युगे येषां नाट्यकारानां आविर्भावोऽभवन् तेषु 'राजशेखरः' उल्लेखयोग्यः। राजशेखरः तस्य सर्वाणां नाट्यकार्याणां प्रस्तावनायामात्मपरिचयं सविस्तारं प्रदत्तवान्। एतेन अभिज्ञायते यत् राजशेखरः महाराष्ट्रः चुडामणिरकालजलदस्य चतुर्थपुरुष आसीत्। तस्य पितुर्नामासीत् दुर्दुकः। माता चासीत् शीलावती। तस्य पत्नी आसीत् अवन्तिसून्दरी। सा आसीत् चौहान वंशीय क्षत्रीयरमणी[१]। राजशेखरः सर्वदा स्वं **यायावरीयोब्राह्मणः** रूपेण वर्णनं कृतवान्। अतः क्षत्रीयरमण्या अवन्तीसून्दर्य्या सह तस्य 'अन्तर्जातीयः' विवाहोऽभवत्। राजशेखरः वालरामायणं वालभारतञ्चेति नाटकद्वयं, कर्पूरमञ्जरीति सट्टकः, विद्धशालभञ्जिका इति नाटिका तथा काव्यमीमांसा इति काव्यशास्त्रमपि अरचयत्।

राजशेखरः स्वीये काव्यमीमांसाग्रन्थे काव्यस्य प्रयोजनम्, काव्यस्य हेतुः, काव्यविभाजनमादयः आलोचितवान्। अस्य ग्रन्थस्य प्रथमाधिकरणस्य चतुर्थे अध्याये काव्यहेतुः आलोचनावसरे उक्तवान् यत्- "समाधिः आन्तरप्रयत्नः बाह्यस्त्वभ्यासः। तावुभावपि शक्तिमुद्भासयतः। सा केवलं काव्ये हेतुः[२] इति

---

[१] चाहुमानकूलमौलिमालिका राजशेखरः कवीन्द्रगेहिणी

[२] समाधिर्वा अभ्यासो वा न काव्यस्य साक्षातकारणम्। किन्तु शक्तिमुपकृत्यैव साक्षात्तु शक्तिरेवेति अभिप्रायवानाह- समाधिरिति समाधिरान्तरो मानसिकः आभ्यासस्तु वाह्य प्रयत्नः। तवुभौ समाध्याभ्यासौ अपि शक्तिं कवित्ववीजभृतां कार्यकल्पनीयां काञ्चिद्वासनामुद्भासयतः उत्तेजयतः। काव्ये सैव शक्तिरेव हेतुः।(मधुसूदतीविवृतिटीका)।।

यायावरीयः"। यद्यपि राजशेखरः अस्मिन्नंशे शक्तेः संज्ञां न निर्धारितवान् परन्तु मधुसूदनी-विवृति इति टीकाग्रन्थे उक्तं यत्- **कवित्ववीजभूता-कार्यकल्पनीया-काश्चिद्वासना इति शक्तिः।**

राजशेखरस्य मतानुसारेन-"विप्रसृतिश्च[३] सा(शक्तिः) प्रतिभाव्युत्पत्तिभ्याम्। शक्तिकतृके हि प्रतिभाव्युत्पत्तिकर्मणी। प्रतिभा या शब्दग्राममर्थसार्थमलङ्कारं तन्त्रमुक्तिमार्गमन्यदपि तथाविधमधिहृदयं प्रतिभासयति सा प्रतिभा। अप्रतिभस्य पदार्थसार्थः परोक्ष इव, प्रतिभावतः पुनरपश्यतोऽपि प्रत्यक्ष इव"।

सा (प्रतिभा) च द्विधा- कारयित्री भावयित्री च। कवेरुपकुर्वाणा कारयित्री। सा अपि त्रिविधाः - सहजाऽऽहार्यौपदेशिकी च। सहजा-जन्मान्तरसंस्कारपेक्षिणी सहजा। इह जन्मसंस्कारयोनिराहार्या। मन्त्रतन्त्राद्युपदेशप्रभावा औपदेशिकी। अत्र स्पष्टं यत्- सहजा प्रतिभा सम्पन्नः कविः आहार्याप्रतिभया सह कवित्वं प्रतिपादने सक्षमो भवति, यथा-लावण्यवती रमणी अलङ्कारेण सह सौन्दर्यं प्रतिपादने सक्षमः भवति। यद्यपि- न हि प्रकृतिमधुरा द्राक्षा फणितसंस्कारमपेक्षते। तथापि राजशेखरस्य मतानुसारेण-

बुद्धिमत्त्वं च काव्याङ्गविद्यास्वभ्यासकर्म च।
कवेश्चोपनिषच्छक्तिस्त्रमेकत्र दुर्लभम्।।
काव्यकाव्याङ्गविद्यासु कृताभ्यासस्य धीमतः।
मन्त्रानुष्ठाननिष्ठस्य नेदिष्ठा कविराजता।।

(काव्यमीमांसा)

अर्थात् व्युत्पत्त्याभ्यासशक्तित्रयाणामेकत्र उपस्थितिर्दूर्लभा तथापि येषु कविषु एतेषां त्रयाणां उपस्थितिर्दृश्यते ते शीघ्रमेव कविराजपदं लभ्यते। एवमेव सर्वासां प्रतिभानां कविषु एकत्र उपस्थितिरपि तेषामुत्कर्षं प्रतिपादयति।

अन्यस्यां दिशि भावयित्री प्रतिभायाः आलोचनावसरे राजशेखरेणोक्तं- 'भावकस्य समालोचकस्य उपकुर्वाणा भावयित्री प्रतिभा। सा हि कवेः श्रममभिप्रायं च भावयति'। कविः अनया भावयित्रीप्रतिभया काव्यस्य अवाञ्छितांशान् त्यक्तुं सक्षमो भवति, यतोहि राजशेखरेणोक्तं यत्-

सत्काव्ये विक्रियाः काश्चिद्भावस्योल्लसन्ति ताः।
सर्वाभिनयनिर्णीतौ दृष्ठा नाट्यसृजा न याः।।

(काव्यमीमांसा)

---

[३] आभ्यां भेदं प्रदर्श्य शक्तेरन्यतोऽपि भेदं दर्शयति। विप्रसृतिरिति। सा शक्तिः, प्रतिभा च व्युत्पत्तिश्चेति ताभ्यामपि विप्रसृतिभिन्ना। चोप्यर्थे। दृष्टान्तेन विवेकेन वा भेदमुपपादयति शक्तीति। प्रतिभाव्युत्पत्तीक्रिये शक्तिजन्ये। कथं तज्जन्यत्वं तस्या इत्यत आह शक्तेति। शक्तः शक्तिमान् व्युत्पत्ते लोकशास्त्रकाव्येषु निपुणौ भवति। शक्तिमतः शक्तस्य प्रतिभाति काव्यघटनाकूलशव्दार्थोपस्थितिः जायन्ते।(मधुसूदतीविवृतिटीका)।।

CC BY

अर्थात् वक्तुं शक्यते यत्- कारयित्रीप्रतिभा कवेः कवित्वं निर्माति तथा भावयित्रीप्रतिभा कवेः कवित्वं दृढरूपेण प्रतिस्थापयति।

अन्यस्यां दिशि व्युत्पत्तिविचारे आचार्यैः कथ्यन्ते यत्- वहुज्ञता व्युत्पत्तिः, परन्तु राजशेखरस्य मतानुसारेण- उचितानुचितविवेको व्युत्पत्तिः। अनयोः परिपूरकयोः वाक्ययोः तात्पर्यं भवति- यथा व्यक्तिर्बहुषु शास्त्रेषु ज्ञानी भवति तदा तस्य उचितानुचित विचारशक्तिः उत्पद्यते। अयमेव विचारशक्तिः व्युत्पत्ति इति। एतयोः प्रतिभाव्युत्पत्योः मिलित प्रवाहः कवेः कवित्वं समुज्वलयति। राजशेखरस्य मतानुसारेण- प्रतिभाव्युत्पत्ती मिथः समवेते श्रेयस्यौ। (तथा) न खलु लावण्यलब्धिर्महते सौन्दर्याय। (अतः) प्रतिभाव्युत्पत्तिमांश्च कविः कविरित्युच्यते।

अनेन प्रकारेण राजशेखरः काव्यस्य हेतुर्निर्णीतवान्। इदानीं वयं अनेन हेतुना राजशेखरस्य दृष्ट्यानुसारेण कवीनां कवित्वं निर्णाय समर्थौ भवामः। अधुना राजशेखरेण प्रतिपादितेन अनेन हेतुना आधारेण तस्यैव काव्यानि विश्लेषणेन तस्य कवित्वं मीमांस्यते।

राजशेखरो बहुविषये ज्ञानी आसीदिति। डॉ.श्यामावर्मा महोदयः स्वीयशोधानुभूत्यानुसारेण राजशेखर इति पुस्तके उक्तवान् यत् – स वेद-व्याकरण-पुराण-दर्शन-काव्य-धर्मादिशास्त्रेषु प्रवीणः आसीत्। राजशेखरेण स्वीयकाव्यमीमांसाग्रन्थे स्वीकृतं यथा-

शास्त्रपूर्वकत्वात् काव्यानां पूर्वं शास्त्रेष्वभिनिविशेत्
नह्यप्रवर्तितप्रदीपास्तमसि तत्त्वार्थसार्थमध्यक्षयन्ति ।।

(काव्यमीमांसा)

अर्थात् राजशेखरः **व्युत्पत्तिशक्तेः** अधिकारी आसीदिति।

यथा काव्यं कवीनां निकषं वदन्ति अर्थात् यथा काव्येषु कवीनां कवित्वस्य मानदण्डो निर्धार्यते तथैव अलङ्कारशास्त्रेषु काव्यस्य काव्यत्वं निर्धार्यते। यतोहि भावकस्य समालोचकस्य उपकुर्वाणा भावयित्रीप्रतिभा। अतः कवेः भावयित्रीप्रतिभानिर्धारणे अलङ्कारशास्त्रं तु निकषप्रस्तर इव। यतोहि राजशेखरः स्वयमेव काव्यमीमांसा इति अलङ्कारशास्त्रं विरचितवान् अतः स **भावयित्रीप्रतिभायाः** अधिकारी आसीदिति।

पूर्वजन्मसंस्कारात् प्राप्ता प्रतिभा साधारणतया इहजन्मनि मौलिकरूपेण प्रकाशितं भवति। अतः राजशेखरस्य यानि यानि मौलिककार्याणि तस्य नाट्यकार्येषु दृश्यन्ते तानि तस्य **सहजाप्रतिभा** एव इति मत्वा तेषां मौलिककार्यणां विवरणमत्र प्रदीयते। यथा-**(क)सट्टकोन्मोचनम्-**

सट्टक-साहित्यस्य इतिहासे राजशेखररासीत् प्रथमो व्याक्तिः यः प्रथमं सट्टकस्य लक्षणं प्रतिपादिवान् तथा सट्टकस्य रचनापि कृतवान् इति अभिनवगुप्तः (अभिनवभारती, भागः-२, पृष्ठाङ्कः-५३६)। राजशेखरस्य

पूर्वम् २०० खीष्टपूर्वाब्दे प्राप्तौ **भरहुतस्तुपे** साडक् तथा साटक् शब्दस्य प्रयोगो दृश्यते। प्रसङ्गतः डॉ.सुदर्शनमिश्रेणानुमीयते यत् राजशेखरस्य पूर्ववर्ती 'साडिक्' तथा 'साटक्' शब्दस्य प्रयोगः नाट्याभिनयार्थं भवति स्म। प्रसङ्गेऽस्मिन् वक्तुं शक्यते यत् हिन्दिशब्दः 'साडी' शब्दस्य व्युत्पत्तिः प्राकृतात् 'साडिआ'-शब्दादेव निष्पद्यते। यस्य संस्कृतरूपं भवति 'साटिका' [४]। अतः शाटिका-साटकयोः शब्दयोर्ध्वनिसाम्यात् अनुमीयते यत् 'शाटिका'-शब्दः 'साटकशब्दात्' एव निष्पद्यते। यस्य प्रयोगः प्राचीनकालादेव 'वस्त्रविशेषार्थे' कृतोऽभवत्। यतोहि रूपकादिमञ्चाभिनयार्थं बहुलव्याय-विस्तृतस्थान-अधिकपरिश्रम-अधिकसमय-विस्तृतपरिकल्पनादीनां आश्यकता वर्तते या सामान्यजनानां प्रात्यहिकरसानन्दानुभूत्यर्थं वाधकैव। सम्भवतः एता वाधाका दूरीकरणार्थं मञ्चाभिनयस्य परिवर्ते जनसामान्यात् सहजलभ्येन शाटिकावस्त्रेण यवनिकानिर्माणेन तस्मिन् नाट्याभिनयं भवन्नासन्। अतः सम्भवतः शाटिका-वस्त्रेण निर्मितायां यवनिकायामभिनीता नाट्यकलाः रूपकेभ्यः पृथकरूपेण सूचयितुं साटकोऽथवा सट्टकः इति शब्दस्य प्रयोगो भवन्नासन्, यश्च परवर्तीसमये पृथक् नाट्यभेदरूपेण प्रसिद्धिर्लभ्यते। प्रसङ्गतः डॉ.सुरेन्द्रनाथदीक्षितमहोदयेनापि अनुमीयते यत् यवनिका सट्टकवस्त्रेण निर्मितुं शक्यते। एतदर्थं रूपकस्य भेदोऽयं सट्टको नाम्नाभिधीयते। इतोऽपि सट्टकस्य प्रत्याङ्कस्य नाम 'यवनिकान्तरः' इति। यश्च उक्तविचारान् एव समर्थ्यते। एवमेव क्रमेण सट्टकस्य सामग्रीको विकासः पूर्णतां लभ्यते राजशेखरस्य हस्तेनैव। राजशेखर एव प्रथमो व्यक्तिरासीत् यः सट्टकस्य लक्षणेनोक्तवान् यत्-

तत् सट्टकमिति भण्यते दूरं योनाटिकभिरनुहरति

किंपूनः प्रवेशक-विष्कम्भकौ केवलं न दृश्यते।।(१/६)

(कर्पूरमञ्जरी)

(ख)नाट्येषु शास्त्रालोचनम्-

राजशेखरः स्वस्य नाट्यकार्येषु प्रयोजनानुसारेण विविधः काव्यशास्त्रीयालोचनां कृतवान्, अनन्तरं नाट्यकथावस्तु विषये मनोनिवेशं कृतवान्, यच्च तस्य अतिमौलिकं कार्यमासीदिति। यथा-कर्पूरमञ्जर्यां "काव्यस्य संज्ञायां" तेनोक्तम्-

उक्तिविशेषं काव्यं भाषा या भवति सा भवतु।।(१/३)or

तत् काव्यं यत् सभायां पठ्यते।।

अर्थात् चमत्कारयुक्तं वाक्यमेव काव्यम्, यच्च सभायां पाठनीयम्। अनन्तरं काव्यस्य भेदोपभेदादिन् तथ्यादिन् त्यात्त्वा सट्टकस्य संज्ञां प्राकृतभाषायामेव प्रदत्तवान्-

---

[४] तहिं गच्छ जहिं मे मादाए पढम सडिआ गदा।।कर्पूरमञ्जरी।।

CC BY

तत् सट्टकमिति भण्यते दूरं योनाटिकभिरनुहरति

किंपूनः प्रवेशक-विष्कम्भकौ केवलं न दृश्यते।।(१/६)

(कर्पूरमञ्जरी)

अनन्तरं यतोहि सट्टकः सामान्यजनानां कृते विरच्यते अतः तस्य भाषा प्राकृतं भवेत्। अस्मिन् प्रसंङ्गे राजशेखर उक्तवान् यत्-

पूरुषा: संस्कृतवन्धा प्राकृतवन्धापि भवति सुकुमार:

पूरुषमहिलानां यावदिहान्तरं तावत्तेषु।।(१/९)

(कर्पूरमञ्जरी)

एतेन अभिज्ञायते यत् सट्टकः सर्वदा सुकुमारगुणाश्रितायां प्राकृतभाषायां विरचितं भवेदिति। वालरामायनवालभारतादिषु नाटकेषु अपि प्रयोजनानुसारेण ध्रुवागीतस्य संज्ञायामपि तेनोक्तं यत् -

प्रथयति पात्रविशेषान्सामाजिकमनांसि रञ्जयति

अनुसंवधाति च रसान् नाट्यविधाने ध्रुवागीति।।(१/२०)

(बालरामायणम्)

यतोहि **आहार्याप्रतिभा** इहजन्मनि काव्याभ्यासेन जायते अतः अस्यां प्रतिभायां इतरकवीनां प्रभावः स्पष्टतया दरीदृश्यते। अत अत्र राजशेखरस्य आहार्यप्रतिभायाः विमर्शाय तस्य काव्यप्रतिभायां प्राचीनकवीनां प्रभाव आलोच्यते। यथा- प्रथमत: कर्पूरमञ्जर्य्यां वर्णीतं वसन्तवर्णनम्[५], नायिकाया: मूलपरिचयमुपस्थापनेन प्रकाशितप्रतिक्रिया[६], नायक-नायिकयोः प्रणयसत्रोपस्थापनम्[७], नायक-नायिकयोः प्रणयस्थानचयनम्[८],

---

[५] विम्वोष्ठे वहुलं न ददाति मदनं नोगन्धः तैलाविला वेणीर्विरचयन्ति ददति न तथाङ्गेऽपि कूर्पासकम्।
यद्वाला मुखकुङ्कुमेऽपि घने वर्तन्ते शिथिलादरास्तन्मन्ये शिशिरं विनिर्जित्य वलात्प्राप्तो वसन्तोत्सवः।।(१/१३)कर्पूरमञ्जरी।।

- सुभगसलिलावगाहा पाटलसंसर्गे सुरभिवनवाताः। प्रच्छायसुलभनिद्रा दिवसाः परिणामरमणीयाः।।(१/३)अभिज्ञानशकुन्तलम्।।

[६] न खलु शशिप्रभागर्भोत्पत्तिमन्तरेणेदृशी रूपरेखा भवति।
नखलु वैदुर्य भूतिमन्तरेण वैदूर्यमणिशलाका निष्पद्यते।। कर्पूरमञ्जरी।। प्रथमयवनिकान्तरस्य अन्तिमे भागे।।

- मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः। न प्रभातरलं ज्योतिरुदेति वसुधतलात्।।(१/२३)अभिज्ञानशकुन्तलम्।।

[७] तत्रभवतः कण्वस्य महर्षेरसान्निध्याद्रक्षांसि न इष्टिविघ्नमुत्पादयन्ति। तत्कतिपयरात्रां सारथी द्वितीयेन भवता सनाथी क्रियतामाश्रममिति।। अभिज्ञानशकुन्तलम्।। द्वितीयोऽङ्कः।।

- आर्य भैरवानन्द, तव प्रसादेनापूर्वं संविधानकमनुभूतं कर्पूरमञ्जरीदर्शनेन। तत्तिष्ठतु तावदेशापञ्चदशदिवसानि। पश्चाद्यानविमानेन तेष्यथ।।कर्पूरमञ्जरी।। प्रथमयवनिकान्तरस्य अन्तिमे भागे।।

[८] वेतसलतापुञ्ज।।(अभिज्ञानशकुन्तलम्)।।

- मरकतपुञ्ज।।(कर्पूरमञ्जरी)।।

नायिकां प्रति विदूषकस्य मनोभावस्य[९] प्रकाशः, नायक-नायिकयोः प्रणयसमापणम्[१०], नायिकायाः नैसर्गिकसौन्दर्यवर्णनम्[10] इत्यादिषु स्थानेषु कालिदासस्य 'अभिज्ञाशकुन्तलमिति' प्रकरणस्य व्यापकप्रभावः दरिदृश्यते। इतोऽपि राजशेखरेण विरचितायां विद्धशालभञ्जिकायां वर्णितं 'गण्डस्योपरिपिण्डकासंवृतः' इति वाक्यम् सम्पूर्णतया अभिज्ञानशकुन्तलादेव परिगृह्यते। द्वितीयतः बिद्धशालभञ्जिकायां नायक-नायिकयोः विवाहसम्पादनार्थं प्रधानसेनापतेः परिकल्पना, नायकस्य स्वप्नवृत्तान्तं, नायिकायाः कन्दुक-क्रीडादिघटनादिषु भासस्य स्वप्नवासवदत्तायाः प्रभावो व्यापकरूपेण परिलक्ष्यते। तृतीयतः राजशेखरस्य वालरामायनादिनाटकादिषु भवभूत्यादि कवीनां व्यापकः प्रभावो लक्ष्यते। एतानि एव तस्याहार्यप्रतिभाया लक्षणानि इति।

पुर्वेभ्यो विवरणेभ्यो ज्ञातुं शक्यते यत् सहजाप्रतिभाया आहार्याप्रतिभायाः व्युतपत्तिशक्तेः च यथायथं स्फुरणं राजशेखरस्य कवित्वे दृश्यते। अतः तस्य मीमांसाग्रन्थस्य विचारेण स एकः सम्पूर्णकवित्वस्य अधिकारी आसीदिति। सम्भवतः स्वीयप्रतिभां विचार्य्य स स्वं कविराजः[11] इति पदे अभूषयत्, तथा कविराजमहाकवयोः[12] कविभेदयोः युगपदालोचनेन स्वं कालिदासस्य समस्तरीय कवि इति प्रतिपादयितुमिच्छति स्म। तथा च स्वस्य विषये तेनोक्तं यत्-

वभूव वाल्मीकिभवः कविः पुरा/ ततः प्रपेदे भूवि भतृमेण्ठताम्

स्थितः पुनर्योभवभूतिरेखया/ स वर्तते सम्प्रति राजशेखरः।।(१/१२)

(बालभारतम्)

---

[९] यथा कस्यापि पिण्डखर्जुरैः उद्वेझितस्य तिन्तिन्यामभिलाषोभवेत्, तथा स्त्रीरत्नपरिभाविनो भवत-इयमभ्यर्थना।।अभिज्ञानशकुन्तलम्।। द्वितीयोऽङ्कः।।

- किं ततोऽपि परिहीणप्रमानगुणादेवी।।कर्पूरमञ्जरी।।

[१०] (नेपथ्ये)चक्रवाकवधूके आमन्त्रयस्य सहचरम्। उपस्थितारजनी।।अभिज्ञानशकुन्तलम्।। तृतीयोऽङ्कः।।

- (नेपथ्ये) चक्रवाक मित्रं जातोऽस्ताचलार्थी पश्यत दिनमनि।।कर्पूरमञ्जरी।।

[10] यस्या दृष्टिस्तरलधवला कज्जलं तस्या योग्यं या विस्तीर्णस्तनकलशिनी शोभते तस्या हारः।
चक्राकारे रमणफलके कोऽपि काञ्च्याडम्वरो यस्यास्तस्याः पुनरपि भणामो भूषणं दूषणं च।।(२/२३)कर्पूरमञ्जरी।।

- सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोलक्ष्म लक्ष्मीं तनोति।
  इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।(११८)अभिज्ञानशकुन्तलम्।।

[11] वालकविकविराजोनिर्भयराजस्य तथोपाध्याय: इत्येतस्य परम्परया आत्मामाहात्मामारूढ।।(१/९)कर्पूरमञ्जरी।।

[12] योऽन्येतरप्रवन्धे प्रवीनः स महाकविः। यस्तु तत्र तत्र भाषाविशेषे तेषु प्रवन्धेषु तस्मिंस्तस्मिंश्च रसे स्वतन्त्रः स कविराजः। ते यदि जगत्यपि कतिपये।।काव्यमीमांसा।।

CC BY

कालिदासादिकवीनां प्रभावो यद्यपि तस्य काव्येषु दृश्यते तथापि कालिदासादिवत् औज्वल्यं तस्य काव्येषु नास्त्येव। अतो हृदयग्राहितायाः आह्लादस्य दृष्ट्या वा तस्य काव्यानि कालिदासादपेक्षायाः किञ्चित् शीथिलमिति। तथापि स्वीयमीमांसाग्रन्थस्याधारेण स आसीदेकः कालिदासस्तरीयः कवि। अतः स्वीय मीमांसाग्रन्थस्याधारेण राजशेखरस्य कवित्वं सूदृढरूपेण प्रतिष्ठितमिति।

****

सन्दर्भग्रन्थसूची-

१.कालिदासः, डॉ.अनिलचन्द्रवसु(सम्पादकः). (२०१०). *अभिज्ञानशकुन्तलम्.* कलिकाता:संस्कृतबुकडिपो।

२.पाण्डे, डॉ.सञ्जयकुमार. (१९९९). *राजशेखरकृत कर्पूरमञ्जरी एवं विशवेशवरकृत श्रृङ्गारमञ्जरी सट्टकों का आलोचनात्मकअध्ययन.* इलाहावादविश्वविद्यालय।

३.भास, डॉ.वालगोविन्द झा(सम्पादकः). (२०१३). *स्वप्नवासवदत्तम्.* वाराणसी:चौखाम्बाविद्याभवन।

४.राजशेखरः, डॉ.गङ्गाधरराय(सम्पादकः). (२०११). *बालरामायणम्.* वाराणसी:चौखाम्बाविद्याभवन।

५.राजशेखरः, डॉ.गङ्गाधरराय(सम्पादकः). (२०११). *वालभारतम्.* वाराणसी:चौखाम्बाविद्याभवन।

६.राजशेखरः, पं.रमाकान्त त्रिपाठी(सम्पादकः). (१९९१). *विद्धशालभञ्जिका.* वाराणसी:चौखाम्बाविद्याभवन।

७.राजशेखरः, श्री रामकुमार आचार्य(सम्पादकः). (१९५५). *कर्पूरमञ्जरी.* वाराणसी:चौखाम्बाविद्याभवन।

८.राजशेखरः, श्री पं.मधुसूदनमिश्रः(सम्पादकः). (१९७७). *काव्यमीमांसा.* वाराणसी:चौखाम्बाविद्याभवन।

९.वर्मा, डॉ.श्यामा. (१९७१). *आचार्यराजशेखर.* भोपाल:मध्यप्रदेश हिन्दी ग्रन्थ अकादेमि।

१०.विश्वनाथः, डॉ.सत्यव्रतसिंह(सम्पादकः). (१९७०). *साहित्यदर्पणः.* वाराणसी:चौखाम्बाविद्याभवन।

****

Author's Detail

Name : ASIM HALDER
Designation : शोधच्छात्रः
Address : हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः
Email Id : clickasimhalder@gmail.com

विश्वबालसाहित्येषु संस्कृतसाहित्यस्य, पञ्चतन्त्रस्य च प्रभावः

- दवे नेहल नरेन्द्रकुमार

✓ **शोधसारः** (Abstract)

संस्कृतसाहित्यस्य अन्यभाषासु प्रभावः वर्तते इति तु सर्वविदम्। संस्कृतग्रन्थानाम् अनुवादाः अपि बहुधा प्रसिद्धाः। परन्तु संस्कृतपद्यानाम् पद्येषु एव अनुवादः जातः इत्यपि बोध्यम्। न केवलं भारतीयभाषासु पद्यात् पद्येषु अनुवादः जातः, अपि तु विदेशीयभाषासु अपि पद्यानुवादः जातः इति शोधलेखेऽस्मिन् उपस्थाप्यते। पञ्चतन्त्रस्य अन्यभाषासु या अनुवादयात्रा अस्ति, सा अपि अत्र उल्लिखिता। बालभोग्यानां पञ्चतन्त्रस्य कथानां विस्तारः सम्पूर्णे विश्वे विद्यते, एवं ताः कथाः एव विश्वस्य बालसाहित्यस्य आधारत्वेन उपस्थापिताः सन्ति। हितोपदेशकथाः, प्रह्लादचरितं, ध्रुवचरितं, हरिश्चन्द्रचरितं, सिंहासनद्वात्रिंशतिः, वेतालपञ्चविंशतिः, पञ्चतन्त्रम् इत्येतेषां संस्कृतपद्यसाहित्यानां भारतस्य सर्वासु भाषासु अनुवादः जातः, तस्य अनुवादस्य आधारेण अनेके प्रादेशिकाः कवयः स्वस्य निवीनं पद्यसाहित्यं रचितवन्तः। पञ्चतन्त्रस्य पहलवी, ईरानी, सीरियाई, अरबी, यूनानी, रूसी, स्लावा, हिब्रू, स्पैनिश, लैटिन, जर्मन, आङ्ग्लं, ब्रूती, तूर्की, फ्रेञ्च, स्वीडिश, पोलिश, स्पोंडेल, डच, हंगापियाई इत्येतासु भाषासु अनुवादः जातः। तेषाम् अनुवादानाम् अपि अनेके अनुवादाः जाताः। एवं बालसाहित्यस्य विषये संस्कृतं न केवलं प्रादेशिकभाषाः प्रभावयति, अपि तु विश्वस्य सर्वाः भाषाः प्रभावायति।

✓ **मुख्यशब्दाः** (Keywords) – **बालसाहित्यम्, पञ्चतन्त्रम्, प्रादेशिकभाषाः ।**

****

✓ **भूमिका** (Introduction)

बालसाहित्यविषये सम्पूर्णे विश्वे पञ्चतन्त्रस्य प्रभावः वर्तते। वास्तवेन न केवलं भारतीय-प्रादेशिक-भाषासु, अपि तु सम्पूर्णविश्वस्य प्रादेशिकभाषासु निर्मितस्य बालसाहित्यस्य मूलस्रोतः संस्कृतसाहित्यस्य हिरकसमानः ग्रन्थः पञ्चतन्त्र-ग्रन्थः वर्तते। पञ्चतन्त्रस्य कथाः अफगानिस्तान-आदि-देशानां मार्गेण सम्पूर्णस्य विश्वस्य बालसाहित्ये प्रभावम् अस्थापयन्। अत एव अलिफ लैला इत्यादीनां ग्रन्थानां रचनायां पञ्चतन्त्रस्य शैल्याः प्रभावः स्पष्टतया दरीदृश्यते। भारते अनुवादस्य परम्परा अतीव पुरातनी वर्तते। परन्तु लिखितग्रन्थानां प्रचलने सति एव अनुवादस्य एतस्याः प्राचीनायाः परम्परायाः ज्ञानम् अभवत्। गुजरातराज्यस्य प्रसिद्धः

रचनाकारः मूळशङ्कर-महोदयस्य मते कथाः तु सांस्कृतिपूञ्जः अस्ति।[1] कथायाः प्रचारे सति, सा वर्धमाना भवति। पञ्चतन्त्रस्य २०० अधिकाः अनुवादाः अद्यत्वे उपलभ्यन्ते। संस्कृतसाहित्यस्य बालकथानां विकासस्य क्रमः कीदृशः आसीत्, संस्कृतसाहित्यस्य बालभोग्यकथानां विस्तारः सम्पूर्णे भारतवर्षे, आविश्वं च कथम् अभवत्, अद्यापि संस्कृतसाहित्यस्य प्रभावः कुत्र कुत्र दरीदृश्यते? इत्यादयः विषयाः शोधलेखेऽस्मिन् चर्चिताः सन्ति।

✓ **शोधोद्देशाः** (Research Objective)

- संस्कृतपद्यसाहित्यस्य भारतस्य प्रादेशिकभाषायाः, विश्वस्य भाषायाः च पद्यसाहित्ये विशेषप्रभावस्य विषये अध्ययनाय।
- संस्कृतपद्यसाहित्यस्य विदेशीयभाषायः पद्यसाहित्ये विशेषप्रभावस्य विषये अध्ययनाय।
- पञ्चतन्त्रस्य पद्यात्मकस्य, गद्यात्मकस्य च भागस्य क्रमेण पद्यात्मकतया, गद्यात्मकतया च अनुवादस्य स्थितेः अध्ययनाय।
- संस्कृतभाषायाः पद्यसाहित्यस्य कालान्तरे भारतस्य विविधासु भाषासु ये अनुवादाः जाताः, तेषां विषये अध्ययनाय।
- संस्कृतात् निर्गतस्य बालसाहित्यस्य देशे, विदेशे च कीदृशी यात्रा आसीत् इति अध्ययनाय।

✓ **शोधप्रविधिः** (Research Methodology)

प्रकृतमिदम् अध्ययनं वर्णनात्मकम् अनुसन्धानं, विशिष्टाध्ययनात्मकम् अनुसन्धानं च वर्त्तते।

❖ संस्कृतभाषायाः कथाव्यापः

भारतं तु कथासाहित्यस्य जन्मभूमिः अस्ति, अत एव "कथासाहित्यस्य आदिभूमिः" इति भारतं प्रसिद्धम् अस्ति। सम्पूर्णजगतः अधिकतमासु भाषासु संस्कृत-भाषायाः प्रभावः अस्ति इति सर्वविदम्।[2] एवमेव विविध-भाषासु यत् बालसाहित्यम् उपलभ्यते, तस्मिन् संस्कृतभाषायाः प्रभावः अस्त्येव। अद्यत्वे समग्रे विश्वे संस्कृतभाषायां रचितस्य पञ्चतन्त्रस्य २०० तः अधिकाः अनुवादाः प्राप्यन्ते।[3] यदि संस्कृते कश्चन विषयः श्लोक-माध्यमेन उपस्थापितः, तर्हि बहुत्र अनुद्यमानायां भाषायाम् अपि पद्य-माध्यमेन तस्य विषयस्य उपस्थापनं जातम् अस्ति। भारतवर्षे आङ्ग्लानाम् आगमनोत्तरं महत्तम-बालसाहित्यस्य रचना पाठशालायाः शिक्षणस्य लक्ष्यं साधयितुम् एव अभवत्। तत्र हिन्दी, बङ्गाली, गुजराती, कनडा, तमीळ् इत्यादयः भाषाः अन्तर्भवन्ति।

---

[1] बाळकोने वार्ता केवी रीते कहीशुं ,?मूळशंकर भट्ट ,पृ .२८ ,ई. १९२८

[2] The Sanskrit language (in Norwegian). (http://bit.ly/1XNqBPh)

[3] The Fables of Bidpai, Introduction

❖ भारतीयभाषायां बालसाहित्यस्य अनुवादाः

भारतवर्षस्य स्वातन्त्र्योत्तरम् एव हिन्दीभाषायाः बालसाहित्यक्षेत्रे अनुवादानां पुरवत् स्थितिः दृश्यते। यतो हि भारतीयायां शिक्षणपद्धत्यां राजभाषात्वेन हिन्द्याः समावेशः जातः आसीत्, एवञ्च सा अनिवार्या भाषा जाता। राज्यसर्वकाराः, केन्द्रसर्वकारः च हिन्दी-साहित्याय पर्याप्तमात्रायाम् अनुदानम् अयच्छत्। अतः हिन्दीभाषायां विविधानां साहित्यानां निर्माणे स्वाभाविकतया एव वेगः दृश्यते स्म। तस्मिन् साहित्ये बालेभ्यः निर्मितस्य साहित्यस्य आधिक्यम् आसीत्। यतो हि पाठशालासु हिन्द्याः प्राथमिकज्ञानं प्रदातुं पाठ्यपुस्कानाम् अतीव आवश्यकता आसीत्। तस्मिन् समये पञ्चतन्त्रकथाः, हितोपदेशकथाः, प्रह्लादचरितं, ध्रुवचरितं, हरिश्चन्द्रचरितम् इत्यादृशानां संस्कृताख्यानानां, संस्कृतकाथानां च बालभोग्योद्देशेन सह अनुवादः अभवत्। इ. १८७४ तः १९०० पर्यन्तं हिन्दीभायाः साहित्यस्य कालः भारतेन्दुः इति प्रसिद्धः। तस्मिन् काले येषां बालसाहित्यानां रचना जाता, तेषां पारम्परिक-रचना नाभवत्। अतः तस्मिन् साहित्ये मनोरञ्जनयुक्तः उपदेशः समाविष्टः दृश्यते। ततः हिन्दीभाषायाः बालसाहित्ये वैज्ञानिकानां पुस्तकानां प्रसिद्धिः अवर्धत। तत्प्रसिद्धेः कृते 'शिशु', 'नन्दन', 'बालभारती', 'पराग', 'बालविनोद', 'बालसखा' इत्यादीनां सामयिकानां अतीव महत्त्वपूर्णं योगदानम् आसीत्।

- **वङ्गभाषा** – इ. १८०२ तमे वर्षे 'बत्रीश सिंहासन' इति वङ्गानुवादः जातः। ततः १८०८ तमे वर्षे 'हितोपदेश' ग्रन्थस्य वङ्गभाषायाम् अनुवादः अभवत्। ततः १८४७ तमवर्षे ईश्वरचन्द्रः विद्यासागरः 'वेतालपञ्चविंशतिः'-ग्रन्थात् वेतालकथानां वङ्गभाषायां भाषान्तरम् अकरोत्। वङ्गभाषायां रवीन्द्रनाथ-ठाकुर-महोदयस्य योगदानम् अपि अद्वितीयम्। सः विविधप्रकारेण वङ्गबालसाहित्यं समृद्धम् अकरोत्। ठाकुरमार-झूली-ग्रन्थस्य रचयिता दक्षिणारञ्जन-मगोदयस्य वङ्गप्रदेशस्य स्थानीयकथानां सङ्ग्रहणं कृतवान् अस्ति।[4]
- **असमियाभाषा, उडियाभाषा च** – संस्कृतसाहित्यस्य पौराणिकानाम् आख्यानानाम् आधारेण असमियाभाषायां विविधस्य बालसाहित्यस्य निर्माणस्य आरब्धः। हेम-सरस्वती-महोदयेन लिखितः "प्रहलाद चरित्र" नामकः संस्कृतात् असमियाभाषायाम् अनुदितः प्रप्रथमः ग्रन्थः प्राप्यते। एषः काव्यग्रन्थः अस्ति। केशव कोईली-महोदयः उडियाभाषायाः बालसाहित्यस्य अनुवादम् अकरोत्। सः कविः आसीत्, अतः पद्यमाध्यमेन एव तस्य अनुवादकार्यम् आसीत्। सः गीतात्मककविताया: रचनाम् अकरोत्। तस्यां कवितायां हितोपदेशस्य साक्षात् प्रभावः दृश्यते।

[4] भारतीय भाषाओमां बाळसाहित्य ,पृ .१६४

CC BY

- **कन्नडभाषा –** कन्नडभाषायां कथासाहित्यस्य बाहुल्यं विद्यते। कन्नडभाषायां संस्कृतभाषायाः अनुदिताः काश्चन कथाः उपलभ्यन्ते। एवञ्च तस्य अनुवादस्य आधारेण अनेकाः नवीनाः रचनाः जाताः। पञ्जे मङ्गेशराव, श्रीमती आर् कल्याणम्मा, शिवरा कारन्त इत्यादीनां कन्नडबालसाहित्यस्य विकासाय मुख्यतया उल्लेखः भवति। डॉ. कारन्त-महोदयेन रचितं 'बाळप्रपञ्च'-नामकं पुस्तकं बालविश्वकोषत्वेन प्रसिद्धम् अस्ति। तत् पुस्तकं बालकेषु विद्यान-विविधानां जिज्ञासानां, ज्ञानपीपासायाः च उपशमनं करोति।
- **मराठीभाषा –** १८२२ तमे वर्षे 'बोम्बे नेटिव एज्युकेशन् सोसाइटी'-संस्थायाः प्रयासेण अनेकेभ्यः संस्कृतग्रन्थेभ्यः मराठीभाषायाम् अनुवादिताः ग्रन्थाः रचिताः। तेषु ग्रन्थेषु मुख्यतया देशभक्तेः, नीतेः च कथानां बाहुल्यं भवति स्म। उक्तायाः संस्थायाः स्थापनायाः पूर्वमेव स्थापकैः १८१५ तमवर्षे वैजनाथशास्त्रिणा अनुदितौ 'पञ्चतन्त्रः', 'हितोपदेशः' च गन्थौ प्राकाशयतः। ततः १९०६ तमवर्षे 'आनन्द'-नामकस्य बालसामयिकस्य मराठीबालकेभ्यः आरम्भः जातः। बालसामयिकस्यास्य मुख्यसम्पादकः श्रीवासुदेवः गोविन्दः आप्टे-महोदयः आसीत्, यः स्वयं साहित्यकारः आसीत्। १९२० इ. पश्चात् मराठीबालसाहित्ये मौलिकानां रचनानाम्, अनुदितानां ग्रन्थानां च परिपाटिः आरब्धा।[5] ततः त्रिंशदधिकानि (३००) बालपुस्तकानि 'अरगडे-आणि-कुलकर्णी'-प्रकाशन-संस्थया प्रकाशितानि।[6]
- **नेपालीभाषा, सिन्धीभाषा च –** नेपालीभाषायाः संस्कृते गोरखाली इति नाम प्रसिद्धम् अस्ति। नेपालीभाषायाः प्राचीनतमः ग्रन्थः "भास्वाती" संस्कृतभाषायाः एव अनुदितः अस्ति। एतस्य ग्रन्थस्य अनुवादः १४०१ मध्ये अभवत् इति मन्यते।[7] एषः ग्रन्थः ज्योतिषशास्त्रसम्बद्धः अस्ति। १७७१ मध्ये शक्तिवल्लभ आर्याल-महोदयः महाभारतस्य विराटपर्वणः अनुवादं नेपालीभाषायाम् अकरोत्। 'श्रेष्ठ साहित्यमाला' इति सिन्धीभाषायाम् अनुदितः बालभोग्यः ग्रन्थः अस्ति। सिन्धीभाषायाः बालसाहित्यम् एव न अपि तु पद्यसाहित्यं संस्कृतपद्येभ्यः एव प्रभावितं दरीदृश्यते।
- **गुजरातीभाषा –** गुजरातीबालसाहित्यं सामान्यतः द्वयोः भागयोः विभक्तं भवति। १) मध्यकालीन-बालसाहित्यम् (१८५० यावत्), २) अर्वाचीनकालीन-बालसाहित्यम् (१८५१ उत्तरम्) इति। मध्यकालस्य साहित्ये धर्मकथा, संसारकथा, नीतिकथा, दृष्टान्तकथा च संस्काराणां सिञ्चनाय,

---

[5] हिन्दी बालसाहित्य – एक अध्ययन, डॉ. हरिकृष्ण देवसरे, इ. १९६९

[6] हिन्दी बालसाहित्य – एक अध्ययन, डॉ. हरिकृष्ण देवसरे, इ. १९६९

[7] भारतीय भाषाएँ और हिन्दी अनुवाद समस्या – समाधान, ले. कैलाश चन्द्र भाटिया, प्र. वाणी प्रकाशन, पृ. ३१

मनोरञ्जनाय च प्रयुक्ता आसीत्। तस्मिन् काले केवलं मौखिकतया कथानां प्रचलनम् आसीत्। जाककथाः, बृहत्कथाः, कथासरित्सागरकथाः, तरङ्गवतीकथाः, तरङ्गलोलाकथाः, वसुदेवहिण्डाकथाः, दशकुमारचरितकथाः, सिंहानसद्वात्रिंशतिकाकथाः, वैतालपञ्चविशंतीकथाः, शुकसप्ततीकथाः, पञ्चतन्त्रकथाः, हितोपदेशकथाः, भोजप्रबन्धकथाः च तासां कथानां स्रोतः आसीत्।

मलयालमभाषायः, पञ्जाबीभाषायाः, काश्मीरीभाषायाः, तेलुगुभाषायाः च बालसाहित्यस्य विकासः अतीव विलम्बेन अभवत्। परन्तु तासु अधिकतम-भाषासु भारतस्य स्वातन्त्र्योत्तरमेव बालसाहित्यस्य क्षेत्रे विकासः जातः। तस्य विकासस्य मुख्यः आधारः पञ्चतन्त्रं, हितोपदेशः, पौराणिककथाः च एव परिगणनीयम्। तदनुवादे कृते सत्येव अन्यभारतीय-भाषासु बालसाहित्यं विपुलातां प्रापत्।

❖ वैदेशिकबालसाहित्ये संस्कृतसाहित्यस्य प्रभावः

भारतात् बहिः यत्किमपि बालसाहित्यं प्राप्यते, तस्य मूले तु संस्कृतभाषायाः पञ्चतन्त्रग्रन्थः एव अस्ति। ततोऽधिकं जातककथाः अपि तेषां बालसाहित्यस्य आधारः अस्ति। पञ्चन्तत्रस्य क्रमशः अनेकभाषासु अनुवादः अभवत्। न तावदेव पञ्चतन्त्रस्य अनुवादात् अपि अनेके अनुवादाः जाताः। एवं सम्पूर्णे विश्वे निर्मितेषु बालसाहित्येषु संस्कृतस्य पद्यसाहित्यस्य प्रभावः दरीदृश्यते। पञ्चतन्त्रस्य प्रप्रथमवैदेशिक-भाषायाम् अनुवादः पहलवीभाषायाम् अभवत्। ततः सम्पूर्णे विश्वे तासां कथानां क्रमशः अनुवादः जातः। अर्थात्, संस्कृतपद्यानाम् आधारेण आविश्वं स्वबालसाहित्याय पद्यानां निर्माणम् अकरोत्।

➢ पहलवी-भाषानुवादः –

पहलवी-भाषायां पञ्चतन्त्रस्य प्रप्रथमवारं अनुवादः अभवत्। प्राचीनफारसीभाषात्वेन पहलवी-भाषा प्रसिद्धा। संस्कृतात् सा प्राचीनफारसीभाषा प्रभाविता आसीत्। पहलवी-भाषायां यः अनुवादः अभवत्, तस्य किंवदन्ती श्रूयते। 'शाह खुसरो' इत्येषः ईरान-देशस्य राजा (५३१-५७९)। सः 'खुसरो प्रथम', 'अनूशीरवाँ' इत्यपि प्रसिद्धः। सः ईरानदेशस्य राजा कुत्रचिद् पठितवान् यत्, भारतदेशस्य कस्मिंश्चित् पर्वते किमपि औषधम् उपलभ्यते। तस्य ओषधस्य सेवनेन मृतः जनः अपि जीवितः भवति इति। अतः सः राजा 'बजीर बुर्जुए'-नामकं राजवैद्यम् औषधम् आनेतुं भारतं प्रैषयत्। सः वैद्यः भारतदेशस्य विभिन्न-पर्वतेषु अटिवान्। परन्तु सः अन्वेषणकार्ये विफलः जातः। अन्ते सः कञ्चन भारतीयविद्वांसं तस्य औषधस्य विषये अपृच्छत्। सः विद्वान् उक्तवान् यद्, भवान् सुष्ठु श्रुतवान्। विद्वान् एव पर्वतरूपः, यस्मिन् ज्ञानरूपिणी सञ्जीवनी विकसते। तस्याः सञ्जीवन्याः सेवनेन एव अज्ञानी, मूर्खः च नवनं जीवनं प्राप्नोति। सा सञ्जीवनी एव 'पञ्चतन्त्रम्' इति।

पञ्चतन्त्रस्य मातृकाग्रन्थं स्वीकृत्य 'बुर्जुए'-महोदयः ईरानदेशं प्रत्यगच्छत्। ईरानदेशस्य राज्ञः आज्ञानुसारं सः पञ्चतन्त्रस्य पहलवीभाषायाम् अनुवादम् अकरोत्। ईरान्-राजः पञ्चतन्त्रस्य कथाः श्रुत्वा अतीव प्रफुल्लितः

CC BY

जातः। पञ्चतन्त्रस्य अनुदितायै मातृकायै सः विशेषं कक्षं निर्मापितवान्। पञ्चतन्त्रस्य प्रप्रथमवारम् अनुवादः पहलवी-भाषायाम् एव अभवत्। ततः पञ्चतन्त्रस्य अनेके अनुवादकाः जाताः।

➢ **सीरियाई-अरबी-यूनानी-'रूसी'-'स्लावा'-भाषानुवादः –**

पहलवी-भाषायाः अनन्तरं पञ्चतन्त्रस्य प्रप्रथमः अनुवादः सीरियाई-भाषायां जातः। जर्मनदेशस्य विदुषां मतानुसारं ५७० ई. मध्ये पहलवी-तः सीरियाई-भाषायां पञ्चतन्त्रस्य अनुवादः जातः।[8] इब्न्-उल्-मुकफ्फा-नामकः अनुवादकः पहलवी-भाषायाः पञ्चन्तस्य द्वितीयम् अनुवादं कदाचित् द्विशतं वर्षानन्तरम् अरबी-भाषायाम् अकरोत्। करटक-दमनकयोः नाम्ना मुकफ्फा-महोदयः स्वानुदितस्य पञ्चतन्त्रस्य 'कलीला-व-दिमना' इति नामकरणम् अकरोत्। एकादशेऽब्दे अरबी-भाषायाः पञ्चतन्त्रस्य अनुवादः यूनानी-भाषायां जातः। यूरोप-देशस्य भाषासु एषः प्रप्रथमः पञ्चतन्त्रस्य अनुवादः। यूनानी-भाषायाः अनुवादोत्तरं विभिन्नासु यूरोपदेशस्य भाषासु पञ्चतन्त्रस्य अनुवादः अतीव स्पर्धात्मकः अभवत्। पञ्चतन्त्रस्य यूनानी-भाषानुवादात् रूसी-भाषायां, स्लावा-भाषायां च अनेके अनुवादाः जाताः। पश्चिमीयस्य यूरोप-देशस्य अनेके भषाविदः रूसी-स्लावा-भाषयोः पञ्चतन्त्रानुवादात् प्रभाविताः। अतः क्रमेण इतालवी-लैटिन्-जर्मन-भाषासु पञ्चतन्त्रस्य अनुवादः आरब्धः। एवं युरोप-देशस्य विविधासु भाषासु वेगेन पञ्चतन्त्रस्य अनुवादकार्यं जातम्। ततः सम्पूर्णे विश्वे प्रप्रथमवारं बालसाहित्यस्य विधिवत् स्थापना जाता।

➢ **'हिब्रू'-'स्पैनिश'-' लैटिन'-'जर्मन'-भाषानुवादः –**

त्रयोदशेऽब्दे अरबी-भाषायाः पञ्चतन्त्रस्य प्राचीनस्पैनिश-भाषायाम् अनुवादः जातः। परन्तु तस्माद् अनुवादात् पूर्वमेव कश्चन अज्ञात-कविः पञ्चतन्त्रस्य अरबीभाषा-तः हिब्रू-भाषायाम् अनुवादम् अकरोत्। पञ्चतन्त्रस्य हिब्रू-भाषानुवादः अतीव महत्त्वपूर्णः मन्यते। यतो हि तस्यानुवादस्य अनन्तरमेव सर्वेषां ज्ञानम् अभवत् यद्, लैटिनभाषायामपि पञ्चतन्त्रानुवादः विद्यते इति। १२६० तमदशके कपुआ-नगरीयः जॉन्-नामकः यहूदी-जनः लैटिन-भाषायां पञ्चतन्त्रानुवदं कृतवान्। सः अवादः 'कलीला व दिमना मानवजीवनज्ञानकोषः' इति प्रसिद्धः। १४८० तमदशके लैटिनभाषायाः पञ्चतन्त्रानुवादः जर्मनभाषायां जातः। तस्यानुवादे लोकेप्रिये जाते सित तस्मात् जर्मनभाषानुवादादेव हॉलैण्ड-डेनमार्क्-आइसलैण्ड-देशानां भाषासु पञ्चतन्त्रानुवादः जातः।[9]

---

[8] Kalilah and Dimnah; or, The fables of Bidpai; being an account of their literary history, Introduction, p. xiv

[9] History of the Migration of Panchatantra, Vijay Bedekar, Institute for Oriental Study, Thane, Saturday, the 27th December 2008

- **फारसी-तूर्की-फ्रांसीसी-भाषानुवादः –**

अरबी-तः 'कलीला व दिमना'नामकानुवादात् पञ्चतन्त्रस्य फारसी-अनुवादः जातः। षोडशेऽब्दे 'अनवार सुलेही'नामक-पञ्चतन्त्रानुवादात् तूर्की-भाषायाः 'हुमायूनामा'-नामकः पञ्चतन्त्रानुवादः अभवत्। १६४४ तमवर्षे फारसी-तः 'अनवरी सुहेली'-नामकात् अनुवादादेव पञ्चतन्त्रस्य 'पिलपई'-नामकः फ्रेञ्च-अनुवादः जातः। पिलपई-महोदयस्य कथाः इत्येव सः अनुवादः प्रसिद्धः।[10]

- **आङ्ग्लानुवादाः –**

आङ्ग्लभाषायां १८५४ तमवर्षे ईस्ट विक्-नामकेन विदुषा कृतः अनुवादः, १८७७ तमवर्षे वॉस्टन्-नामकेन विदुषा कृतः अनुवादः च प्रकाशितौ। तयोः उभयोः अनुवादयोः नाम 'लोइह्व् ओफ कैनोपस्' इति आसीत्। विंशतिशताब्द्याम् अरौ द्वौ अनुवादौ प्रकाशितौ। १९२४, १९२५ वर्षे तयोः कर्तारौ क्रमेण स्टैनली राईस्-महोदयः, आर्थर् डब्ल्यू राइडर्-महोदयः च।[11] अत्र वैशिष्ट्यम् अस्ति यत्, यथा पञ्चतन्त्रे पद्यस्य, गद्यस्य च प्रयोगः वर्तते, तथैव आर्थर्-महोदयेन आङ्ग्लानुवादः पद्यात्मकः, गद्यात्मकः च वर्तते। अर्थात् आङ्ग्लभाषायाः पद्यसाहित्ये संस्कृतपद्यसाहित्यस्य प्रभावः प्रत्यक्षः भवति।

- **अन्ये अनुवादाः –**

ब्रूती-नामकः विद्वान् १६५४ तमवर्षे स्पेनीशभाषायां पञ्चतन्त्रानुवादम् अकरोत्। तूर्की-अनुवादात् (हुमायुनामा) फ्रेञ्चभाषायां १७२४ तमवर्षे अनुवादः जातः। फ्रेञ्चभाषायाः अनुवादः 'बिदपई'-नाम्ना प्रसिद्धः।[12] [13] वाइल्ट-महोदयस्य १७४५ तमवर्षे स्वीडिश-अनुवादः, १७४५ तमवर्षे एव अज्ञातेन कविना जर्मन-अनुवादः प्रकाशितः। १७६२ तमवर्षे यूबेंस्-महोदयस्य स्वीडिश-अनुवादः उपलभ्यते। १७७० तमवर्षे पोलिश-अनुवादः केनापि अज्ञातकविना कृतः। १७८१ तमे वर्षे स्पोंडेल-भाषातः डच-भाषायाम् अपि पञ्चतन्त्रस्य अनुवादः प्रकाशितः। १७८१ तमे वर्षे हंगापियाई-भाषायां, यूनानी-भाषायां च पञ्चतन्त्रानुवादः जातः।

✓ **शोधनिष्कर्षः (Conclusion)**

पञ्चतन्त्रग्रन्थस्य अनुवादस्य परम्परा क्रमेण पहलवी, अरबी, हिब्रू, लैटिन्, इटालवी, आङ्गलभाषां यावत् विस्तृता दरीदृश्यते। सम्प्रति अपि एतस्य ग्रन्थस्य अनुवादस्य परम्परा प्रचलति। कदाचित् अद्यापि विश्वस्य

---

[10] Tales Within Tales – adapted from the fables of Pilpai पुस्तकनाम्ना एव ज्ञायते

[11] Harvard Oriental Series. Department of Sanskrit and Indian Studies, Harvard University, 2009

[12] The Fables of Pilpay, Introduction

[13] A Curriculum for English, Page – 109 (https://archive.org/stream/ERIC_ED013810#page/n128/mode/1up/search/bidpai)

CC BY

कस्मिँश्चित् भागे कोऽपि अनुवादकः, लेखकः, सम्पादकः वा पञ्चतन्त्रग्रन्थस्यस्य नवीनप्रौद्योगिक्याः उपयोगेन प्रकाशनाय तत्परः स्यात्। पञ्चतन्त्रग्रन्थस्य अभारतीयाभाषासु साक्षात् अनुवादः जातः। पहलीभाषायाः अनन्तरं थियोराडो-जर्मनविदुषः जर्मनभाषानुवादः साक्षात् संस्कृतभाषायाः जातः। पञ्चतन्त्रस्य अनुवादेभ्यः अनुवादाः बहुधा जाताः, तेभ्यः अनुवादेभ्यः प्रेरिताः जनाः स्वस्य साहित्यस्य रचनाम् अपि अकुर्वन्, अतः वैश्विकस्तरे बालसाहित्यस्य मूलस्रोतः तु संस्कृतभाषा एव स्वीकरणीया भवति।

****

✓ <u>सन्दर्भग्रन्थसूची (Bibliography)</u>

1. बाळकोने वार्ता केवी रीते कहीशुं ,?मूळशंकर भट्ट, પૃ.૬ ,૨૮ . ૧૯૨૮
2. The Sanskrit language (in Norwegian). (http://bit.ly/1XNqBPh)
3. The Fables of Bidpai, Introduction
4. भारतीय भाषाओमां बाळसाहित्य, પૃ૧૬૪ .
5. हिन्दी बालसाहित्य – एक अध्ययन, डॉ. हरिकृष्ण देवसरे, इ. १९६९
6. भारतीय भाषाओमां बाळसाहित्य, પૃ૧૬૨ .
7. भारतीय भाषाएँ और हिन्दी अनुवाद समस्या – समाधान, ले. कैलाश चन्द्र भाटिया, प्र. वाणी प्रकाशन, पृ. ३१
8. Kalilah and Dimnah; or, The fables of Bidpai; being an account of their literary history, Introduction, p. xiv
9. History of the Migration of Panchatantra, Vijay Bedekar, Institute for Oriental Study, Thane, Saturday, the 27th December 2008
10. Tales Within Tales – adapted from the fables of Pilpai पुस्तकनाम्ना एव ज्ञायते
11. Harvard Oriental Series. Department of Sanskrit and Indian Studies, Harvard University, 2009
12. The Fables of Pilpay, Introduction
13. A Curriculum for English, Page – 109 (https://archive.org/stream/ERIC_ED013810#page/n128/mode/1up/search/bidpai)

****

Author's Detail

Name	:	Nehal Narendrakumar Dave
Designation	:	शोधच्छात्रः, विद्यावारिधिः
Address	:	श्रीसोमनाथसंस्कृतविश्वविद्यालयः, गुजरात
Email Id	:	clickasimhalder@gmail.com

श्रीभाष्ये पञ्चाग्निविद्याप्रतिपादनम्

- डा. वि. बालाजिः

ABSTRACT

यद्यपि कर्मविचारेण तत्फलेषु वैराग्यवत एव ब्रह्ममीमांसायामधिकार इति जिज्ञासासूत्रे व्यवस्थापितत्वेन पुनरपि वैराग्योत्पादनाय प्रयत्नोऽयं व्यर्थ इति शङ्कितुं शक्यं, तथाऽपि पञ्चाग्निविद्यानिरूपणेन यादृशं वैराग्यं विषयेषूत्पद्येत, न तादृशं वैराग्यं कर्मविचारेणोत्पद्यत इति तदर्थं प्रयत्नस्सफल एवेति मन्यमानस्तृतीयाध्यायप्रथमपादे पञ्चाग्निविद्यानिरूपणेन कर्मफलानां सर्वेषामपि नश्वरतां निरयतुल्यतां च ख्यापयितुमारभते **तदन्तरप्रतिपत्तौ** इत्यादिना।।

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् इति प्रथमं सूत्रं भवति। अत्र **अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः** इत्युत्तरसूत्रात् **इष्टादिकारी** इति पदं प्रथमैकवचनान्तमुपतिष्ठते। **वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति** इति प्रश्नवाक्यं त्रिवृत्करणभूतसूक्ष्मपरं **आप** इति पदं तृतीयान्ततया विपरिणतं बुद्धिस्थतयाऽन्वेति। **संज्ञामूर्तिक्लृप्तिस्तु** इति पूर्वाधिकरणसूत्रे मूर्तिशब्देन प्रस्तुतो देहः **तदन्तर** इत्यत्र तच्छब्देन परामृश्यते। ततश्च **इष्टीदिकारी** – जीवः, **तदन्तरप्रतिपत्तौ** – देहान्तरप्राप्तौ, भूतसूक्ष्मैः **संपरिष्वक्तः** – संबद्ध एव **रंहति** – गच्छति, **प्रश्ननिरूपणाभ्यां** – प्रश्नोत्तराभ्यां तथाऽवगतेरिति सूत्रार्थः....

****

श्रीभाष्ये पञ्चाग्निविद्याप्रतिपादनम्

यद्यपि कर्मविचारेण तत्फलेषु वैराग्यवत एव ब्रह्ममीमांसायामधिकार इति जिज्ञासासूत्रे व्यवस्थापितत्वेन पुनरपि वैराग्योत्पादनाय प्रयत्नोऽयं व्यर्थ इति शङ्कितुं शक्यं, तथाऽपि पञ्चाग्निविद्यानिरूपणेन यादृशं वैराग्यं विषयेषूत्पद्येत, न तादृशं वैराग्यं कर्मविचारेणोत्पद्यत इति तदर्थं प्रयत्नस्सफल एवेति मन्यमानस्तृतीयाध्यायप्रथमपादे पञ्चाग्निविद्यानिरूपणेन कर्मफलानां सर्वेषामपि नश्वरतां निरयतुल्यतां च ख्यापयितुमारभते **तदन्तरप्रतिपत्तौ** इत्यादिना।।

तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्[1] **इति** प्रथमं सूत्रं भवति। अत्र **अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः**[2] इत्युत्तरसूत्रात् **इष्टादिकारी** इति पदं प्रथमैकवचनान्तमुपतिष्ठते। **वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति**[3] इति प्रश्नवाक्यं त्रिवृत्करणभूतसूक्ष्मपरं **आप** इति पदं तृतीयान्ततया

---

[1] ब्र.सू 3.1.1

[2] ब्र.सू 3.1.6

[3] छा.5.3.3

विपरिणतं बुद्धिस्थतयाऽन्वेति। **संज्ञामूर्तिक्लृप्तिस्तु**[4] इति पूर्वाधिकरणसूत्रे मूर्तिशब्देन प्रस्तुतो देहः **तदन्तर** इत्यत्र तच्छब्देन परामृश्यते। ततश्च **इष्टीदिकारी** – जीवः, **तदन्तरप्रतिपत्तौ** – देहान्तरप्राप्तौ, भूतसूक्ष्मैः **संपरिष्वक्तः** – संबद्ध एव **रंहति** – गच्छति, **प्रश्ननिरूपणाभ्यां** – प्रश्नोत्तराभ्यां तथाऽवगतेरिति सूत्रार्थः।

यागदानादिसुकृतकर्मकृत् जीवः देहान्तरप्राप्तिदशायां पुनः शरीरान्तरारम्भकतया अतिभीषणैर्भूतसूक्ष्मैरनुद्रुतस्सन् गच्छति। अहो दुस्सहोऽयं संसारबन्धक्लेश इति पञ्चाग्निविद्यया प्रतिपाद्यते। सोऽयं सर्वोऽपि क्लेशः परस्य ब्रह्मणः तत्तत्कर्मफलानुगुणं सङ्कल्पाद्भवतीति श्वेताश्वेतरोपनिषदाऽवगम्यते। तत्र **प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः**[5] इति मन्त्रेण जगदीश्वरस्य क्षेत्रज्ञसंसारबन्धहेतुत्वं तज्जनकसंकल्पवत्वरूपं प्रतिपादितम्। ततश्च संसारबन्धस्य ईश्वरसंकल्पकृतत्वात् बन्धान्तर्गतस्य भूतसूक्ष्मैस्सह जीवस्य लोकान्तरगमनादेः ईश्वरसंकल्पत्वं सिद्धम्। अत एव हि सूत्रकारैः तृतीयाध्याये द्वितीयपादे सन्ध्याधिकरणे **पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ**[6] इति सूत्रे जीवात्मनस्संसारबन्धस्य परमात्मसंङ्कल्पकृतत्वेन तदन्तर्गतं तत्स्वरूपतिरोधानमपि तत्संकल्पकृतमिति सूत्रितम्।

अयं च जगदीश्वरः नारायण एवेति **वेदाहमेतं पुरुषं महान्तं आदित्यवर्णं तमसः परस्तात्**[7] इति तस्यामेवोपनिषदि तृतीयाध्याये पठ्यमानमन्त्रादवगम्यते। अयं हि मन्त्रः **अद्भ्यस्संभूतः पृथिव्यै रसाच्च**[8] इत्यनुवाके श्रूयते। ततश्च तदनुवाके श्रुतेन नारायणादन्यत्र असंभवता लक्ष्मीपतित्वलिङ्गेन उक्तमन्त्रश्रुतो महापुरुषः नारायण एवेति, तदुपनिषदि श्रुताः ईशान-शिव-शम्भु-रुद्रादयः शब्दाः योगादिना नारायणेऽपि संभवन्तस्तत्परा एवेति, कृत्स्नापि ईयमुपनिषन्नारायणपरैवेति च निर्धार्यते। अतः **प्रधानक्षेत्रज्ञपतिर्गुणेशः** इति पूर्वोदाहृतमन्त्रश्रुत ईश्वरोऽपि स एवेति निर्धार्यते इति।

ननु देहान्तरप्राप्तये गच्छन् इष्टादिकारी जीवः देहान्तरारंभकैः भूतसूक्ष्मैरसंसृष्ट एव गच्छति, देहान्तरारंभकाणां भूतसूक्ष्माणां तत्र तत्र सुलभत्वेन भूतसूक्ष्मैस्सह गमनकल्पनस्य निष्प्रयोजनत्वादिति चेत् उच्यते – देहाद्देहान्तरं गच्छन् इष्टापूर्तादिकृत् भूतसूक्ष्मैस्संसृष्ट एव गच्छति, पञ्चाग्निविद्याप्रकरणे श्रूयमाणेन **वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति** इति प्रतिवचनेन च भूतसूक्ष्मैस्संसृष्ट एव गच्छतीत्यवगमात्

[4] ब्र.सू. 2.4.17

[5] श्वे.6.16

[6] ब्र.सू.3.2.4

[7] श्वे.3.21

[8] पु.सू. 2

cc BY

श्रुत्येकसमधिगम्यस्य यथाश्रुति प्रतिपत्तव्यत्वात्। तत्र हि **भूतसूक्ष्मविशिष्टस्य जीवस्य पञ्चस्वग्निषु होमप्रकारं पञ्चमाहुत्यनन्तरं देहविशिष्टरूपेण भवनप्रकारं च जानासि किं** इति प्रश्नप्रकारः। भूतसूक्ष्मविशिष्टो जीवः द्युलोक-पर्जन्य-पृथिवी-पुरुष-योषिद्रूपेषु पञ्चस्वाग्निषु क्रमेण संबन्धं प्राप्य, योषिद्रूपाग्निसंबन्धप्राप्त्यनन्तरं देहविशिष्टो भवतीति प्रतिवचनप्रकारः। अतो भूतसूक्ष्माणां जीवेन सह गमनाभावे पञ्चाग्निसंबन्धपूर्वकं तदीयदेहात्मतया परिणामस्यासंभवात्, जीवेन सह गच्छन्तीति प्रतीयते।

ननु उक्तप्रश्नप्रतिवचनयोरपामेव देहात्मना परिणामप्रकारप्रश्नः, तत्पर्तिवचनं च श्रूयते न तु पञ्चानां भूतसूक्ष्माणाम्। अतः कथं भूतसूक्ष्मपञ्चकस्य जीवेन सह गमनलाभ इति चेत्- उच्यते – देहान्तरारंभकाणामपां तदारंभकप्रकारप्रश्नप्रतिवचनयोः श्रवणात् भूतान्तरासंसृष्टानामपां देहारंभकत्वासंभवेन अर्थसामर्थ्यादेव भूतान्तरसंसृष्टानामपां गमनलाभः। श्रुतावब्ग्रहणं तु देहारंभकेषु भूतेषु लोहितादिरूपाणामपां बाहुल्याभिप्रायम्। एवं **तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति**[9] इति जीवेन समं मुख्यप्राणस्य इन्द्रियाणां च गमनश्रवणात्, निराश्रयाणां तेषां गमनासंभवेन भूतसूक्ष्माश्रितानामेव तेषां गमनस्य वक्तव्यत्वादपि जीवेन सह भूतसूक्ष्माणां गमनसिद्धिः।।

ननु जीवस्य मरणदशायां तदीयवागादीन्द्रियाणामग्न्यादौ लयश्रवणात् कथं तेषां जीवेन सह गमनोक्तिसंभवः? श्रूयते हि **यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम्**[10] इत्यादौ वागादीन्द्रियाणामग्न्यादौ लय इति चेत् – मैवं **ओषधीर्लोमानि वनस्पतीन् केशाः**[11] इति मृतशरीरेण समं दह्यमानानां लोम्नां केशानां च ओषध्यादिषु लयश्रवणस्य ओषध्याद्यभिमानिनीनां देवतानां लोमाद्यभिमाननिवृत्तिपरतया अवश्यवक्तव्यतया, तत्सहपठितस्य वागादीन्द्रियलयस्यापि अग्न्याद्यभिमानिदेवतानां वागादीन्द्रियाभिमाननिवृत्तिपरतया उपपत्तेः।।

ननु **असौ वाव लोको गौतमाग्निस्तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति**[12] इति प्रतिवचने प्रथमाहुतौ श्रद्धाया हूयमानत्वं श्रूयते, न त्वपाम्, अतः कथं प्रतिवचनेन भूतसंसृष्टस्य जीवस्य गमनलाभाय इति चेत् – उच्यते – **वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति**[13] इति अपां पञ्चम्याहुतौ शीरात्मना परिणामप्रकारप्रश्नस्य प्रथमाहुतिविषये **तस्मिन्नेतस्मिन्नग्नौ** इत्यादिप्रतिवचने अपां हूयमानत्वप्रकारविषयः प्रश्नः।

---

[9] बृ.6.4.2

[10] बृ.5.2.13

[11] बृ.3.2.13

[12] छा.5.4.2

[13] छा.5.3.3

अतस्तत्रश्रद्धाशब्देन आप एवोच्यत इत्यवश्यमाश्रयणीयम्। अस्ति च श्रद्धाशब्दस्य अप्सु वैदिकः प्रयोगः **श्रद्धा वा आपः** इति।।

नन्वेवमपि श्रद्धाशब्दोक्तस्य भूतसूक्ष्मपञ्चकस्य हूयमानत्वलाभेन तस्यैव गमनलाभस्संभवति, न तु तत्संसृष्टस्येष्टादिकारिणः गमनस्य पञ्चाग्निविद्यया लाभ इति चेत् – उच्यते – उत्तरत्र पितृयाणमार्गोक्तिप्रकरणे छान्दोग्ये **अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपास्ते**[14] इतीष्टादिकारिणां पितृयाणमार्गेण गतिमुपक्रम्य, **पितृलोकादाकाशमकाशाच्चन्द्रमसमेष सोमो राजा तद्देवानामन्नं तं देव भक्षयन्ति**[15] इत्यत्र पितृयाणमार्गेण प्रस्थितस्येष्टादिकारिणश्चन्द्रप्राप्त्यनन्तरं सोमराजात्मना भवनस्याभिधानात्, इह पञ्चाग्निविद्याप्रकरणेऽपि **तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेस्सोमो राजा संभवति**[16] इति प्रथमाहुतौ हुतस्य श्रद्धाशब्दोक्तस्य सोमराजात्मना संभावस्याभिधानात्, स एवायमिष्टादिकारिणस्सोमराजभाव इति प्रत्यभिज्ञायमानतया अत्र श्रद्धाशब्देन भूतसूक्ष्मपञ्चकविशिष्ट इष्टादिकारी निर्दिश्यत इति निर्धार्यते।।

न च **एष सोमो राजा** इत्येतदनन्तरं **तद्देवानामान्नं तं देवा भक्षयन्ति**[17] इत्यत्र तच्छब्देन पूर्ववाक्यप्रस्तुतं परामृश्य तस्यान्नत्वभक्ष्यमाणत्वयोर्वचनात् इष्टादिकारिणो जीवस्य भक्ष्यमानत्वासंभवात् **एष सोमो राजा** इतीदं वाक्यं न इष्टादिकारिपरं, अपि तु प्राप्यचन्द्रपरं, तथा सति चन्द्रस्य देवान्नत्वदेवभक्ष्यमाणत्वयोः पुराणादिषु प्रसिद्धत्वेन वाक्यार्थोपपत्तेरिति वाच्यम् – **एष सोमो राजा** इत्यस्य प्राप्यचन्द्रपरत्वे चन्द्रस्य सोमत्वराजत्वयोः प्रसिद्धयोरनुवादे प्रयोजनाभावेन वाक्यवैयर्थ्यप्रसङ्गेन प्राप्तिष्टादिकारिपरतया अवश्यवक्तव्यत्वात्। तथा सति चन्द्रं प्राप्तस्येष्टादिकारिणः अमृतमयदेहप्राप्तिविधिपरत्वेन सार्थक्यसंभवात्।

तं देवाः भक्षयन्ति इति वाक्यं इष्टादिकारिण आजानदेवैः पशुवत् स्वभोगोपकरणीक्रियमाणत्वपरम्, इष्टादिकारिणः ब्रह्मवितिवाभावेन देवैः पशुवत् स्वभोगोपकरणीक्रियमाणत्वस्य **यथा पशुरेवं स देवानाम्**[18] इत्यत्र श्रूयमाणत्वात्। यथा पशुः मनुष्यस्य भोगोपकरणीभवति, एवं सः अब्रह्मवित् इष्टादिकारी देवानां किंकरीभूय भोगोपकरणीभवतीति तदर्थः।

ततश्च **तस्मिन्नेतस्मिन्नग्नौ देवाः**[19] इत्यादिवाक्यस्य तस्मिन्नेतस्मिन्नग्नौ - द्युलोकरूपेऽग्नौ, देवाः – इष्टादिकारिणो जीवस्य इन्द्रियाणि, श्रद्धां-भूतसूक्ष्मपञ्चकविशिष्टमिष्टादिकारिणं, द्युलोकं प्रापयन्तीति फलितम्।

---

[14] छा.5.10.6

[15] छा.5.10.6

[16] छा.5.4.2

[17] छा.5.10.4

[18] बृ.3.4.10

[19] छा.5.4.2

तस्या आहुतेस्सोमो राजा संभवति – द्युलोकं प्राप्त इष्टादिकारी अमृतमयदिव्यशरीरविशिष्टो भवतीत्यर्थः। **आकाशाच्चन्द्रमसमेष सोमो राजा** इत्यत्रापि एषः – चन्द्रं प्राप्त इष्टादिकारी, सोमो राजा – अमृतमयदिव्यशरीरविशिष्टो भवतीत्यर्थः।

इत्थं च **वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति**[20] इति प्रश्नस्य प्रथमाहुतिविषयेण **असौ वाव लोको गौतमाग्निस्तस्मिन्नग्नौ देवाः श्रद्धां जुह्वति**[21] इत्यनेन प्रतिवचनेन भूतसूक्ष्मपञ्चकविशिष्टस्य इष्टादिकारिणो गमनलाभात् भूतसूक्ष्मपञ्चकविशिष्ट एव इष्टादिकारी गच्छतीति सिद्धम्।।

****

पुस्तकसूची

BIBLIOGRAPHY

1. श्रीमद्भगवद्रामानुजविरचितब्रह्मसूत्रश्रीभाष्यम्
   सुदर्शनसूरिप्रणीतश्रुतप्रकाशिकाव्याख्योपेतम्
   श्रीमद्रङ्गरामानुजमुन्युपज्ञभावप्रकाशिकाव्याख्योपेतम् च
   श्री नृसिंहप्रिया ट्रस्ट्, चेन्नै, 2006.
2. श्रीमद्भगवद्गीता
   श्रीमद्भगवद्रामानुजविरचितभाष्येण
   श्रीकवितार्किकसिंहसर्वतन्त्रस्वतन्त्र-श्रीमद्वेदान्तदेशिकविरचितया तात्पर्यचन्द्रिकया,
   श्रीमदभिनवदेशिक-वीरराघवार्यमहादेशिकयविरचित-विशेषभूमिका-टिप्पणेन च समेता
   Sri Uttamur Viraraghavachariar Centenary Trust, Chennai, 2004.
3. उपनिषद्भाष्यम्
   श्रीरङ्गरामानुजमुनिप्रभृति विरचित केनाद्युपनिषदुपेतम्
   श्रीमदभिनवदेशिक-वीरराघवार्यमहादेशिकविरचित-परिष्कर-उपनिषदर्थकारिका सहितम्
   Sri Uttamur Viraraghavachariar Centenary Trust, Chennai, 2003.
4. सिद्धान्तसंरक्षणम्
   प्रकाशिका, श्रीवैष्णवसभा, बैङ्गळूरु 560021, 2000.

[20] छा.5.3.3

[21] छा.5.4.2

5. श्रीमन्निगमान्तमहादेशिकानुगृहीता अधिकरणसारावलिः
कुमारवेदान्ताचार्यानुगृहीतेन चिन्तामणिना समेता च
श्रीवण्शठकोपश्रीलक्ष्मीनृसिंहशठकोपयतीन्द्रमहादेशिकदिव्यनियमनानुसारेण
कुरुचि. लक्ष्मीनृसिंहाचार्येण प्रकाशिता, 1940.

6. श्रीभगवद्रामानुजविरचित-गीताभाष्यम्
सम्पादकौ श्रीमुष्णं,पुराणं,वङ्गीपुरम्,न्यायशिरोमणिः डा.व. सौम्यनारायणः,
मेल्मा.डा.ल. सम्पत्कुमाराचार्यः,
श्रीरङ्गं श्रीमदाण्डवनाश्रमः, चेन्नै, 2017.

7. श्रीकपिस्थलंदेशिकाचार्यैः अनुगृहीता अधिकरणरत्नमाला
पुदुक्कोट्टै श्रीनिवासराघवेण परिशोधिता ग्रन्थकर्तृभिः प्रत्यवेक्षिता च
पुदुक्कोट्टै यन्त्रालये मुद्रयित्वा प्रकाशिता, 1938.

****

Author's Detail

Name	:	**DR. V. BALAJI**
Designation	:	Assistant Professor, Department of Sanskrit
Address	:	D G Vaishnav College, Arumbakkam, Chennai – 106
Email Id	:	clickasimhalder@gmail.com

श्रीमद्भगवद्गीतायां योगस्वरूपम्

- गोबिन्दः दासः

शोधसारः

परब्रह्मणः योगेश्वरस्य श्रीकृष्णस्य मुखपद्मात् निःसृतः महाभारतस्यांशोऽस्ति श्रीमद्भगवद्गीता। अस्मिन्ग्रन्थेऽष्टादशाध्यायाः विद्यन्ते। श्रीमद्भगवद्गीतायाः प्रत्येकेऽस्मिनध्याये योगस्य पृथक्-पृथग्रूपाणि प्रतिपादितानि समुपलभ्यन्ते। तानि चेत्थं प्रथमोऽध्याये विषादयोगः, द्वितीये साङ्ख्ययोगः, तृतीये कर्मयोगः, चतुर्थे ज्ञानयोगः, पञ्चमे सन्न्यासयोगः, षष्ठे ध्यानयोगः, सप्तमे ज्ञानविज्ञानयोगः, अष्टमे अक्षरब्रह्मयोगः, नवमे राजयोगः, दशमे विभूतियोगः, एकादशे विश्वरूपदर्शनयोगः, द्वादशे भक्तियोगः, त्रयोदशे क्षेत्रक्षेत्रज्ञविभागयोगः, चतुर्दशे गुणत्रयविभागयोगः, पञ्चदशे पुरुषोत्तमयोगः, षोडशे देवासुरसम्पद्विभागयोगः, सप्तदशे श्रद्धात्रयविभागयोगः, अष्टादशे च मोक्षयोगः। आत्मा-परमात्मनः मिलनरूपयोगः गीतायाः प्रधानप्रतिपाद्यविषयः। तस्मात्करणात् अस्य ग्रन्थस्य प्रत्येकेऽस्मिन् अध्याये बहुभावेन योगतत्त्वानि प्रतिपादितानि सन्ति। यथा योगस्य स्वरूपः, तस्य साधनविधिः, ताभ्यां सहयोगेन फलानि च समुपलभ्यन्ते। सम्पूर्णा गीता ज्ञान-कर्म-भक्तियोगविभागेन त्रिधा विभज्यते। एभिः सह राजयोगस्य विश्लेषणमपि प्राप्यते। अस्मिन्ग्रन्थे मनसः अस्थिरतायाः दूरीकरणार्थमभ्यास-वैराग्य-सद्गुणानां सम्पादनं तथा च प्राणायामस्य बहुविधविवेचनं व्यासेन कृतमस्ति। अत्र प्रतिपादिताः योगाभ्यासस्य विषयः पातञ्जलयोगस्य पुर्वरूपमिति मन्यन्ते विद्वांसः। ध्यानः कया रीत्या करणीय इति विषये साधकाय अयमादेशः प्रदीयते यत् साधकः ग्रीवां शिरसं सरलं कृत्वा नासाग्रे दृष्टिं स्थापयित्वा ध्यानं कुर्यादिति। अस्मादेव कारणात् श्रीमद्भगवद्गीता एकं योगशास्त्रमिति वक्तुं शक्यते। सम्प्रति अध्यायानुसारं योगस्य स्वरूपं पश्यामः।

पादटिप्पणी – योगः, ध्यानः, आत्मसंयम्, इन्द्रियवशीकरणम्, प्रकृतिपुरुषः, त्रिगुणः, क्लिष्टाऽक्लिष्टवृत्तयः, तपः

****

सन्दर्भः

श्रीमद्भगवद्गीतायाः साङ्ख्ययोगाख्ये द्वितीयोऽध्याये व्यवसायात्मिकां बुद्धिं विहाय स्थिरायाः निश्चयात्मिकायाः वा बुद्धेरुपादेयत्वं निरूपितम्।[1] अयुक्तस्य बुद्धियोगो न सम्भवति। अतएवः मोक्षकामी सुखार्थी वा नियतं योगाभ्यासं कुर्यात्। बुद्धियोगेन शाश्वतसुखं शान्तिं वा प्राप्तुं शक्यते। समत्वभाव अर्थात् सिद्ध्यसिद्ध्योः समभाव एव योगः। यं पुरुषं सिद्ध्यसिद्धी विचालयितुं न पारयतः, यस्मिन् विषमतायाः नोत्पत्तिः,

---

[1] श्रीमद्भगवद्गीता – २/४१

एतादृशे भावे जायमाने सत्ययं समत्वयोग इत्यूच्यते। अयं योग इष्टात् समत्वं दापयति। अतएवः एनं समत्वं योगं कथयन्ति तत्त्वविदः। सर्वथा कामनानां त्यागो कर्तव्य, तादृशत्यागरूपयोगः निष्कामकर्मयोग इति कथयन्ति मुनीषिणः। कर्म करणीयम् इति कृत्वा अयं योगः कर्मयोगो। अनेन परमात्मना सह जीवात्मनः संयोगो। तदुक्तम-

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥[2]

गीतायाः प्राधान्यं निष्कामकर्मयोगे वर्तते। तत्र समत्वबुद्धिसम्पन्नः पुरुषः पापपुण्ययोः परित्यजति, तस्मिन् न संलिप्तो भवति। अस्माद्धेतोः समत्वबुद्धियोगार्थं चेष्टां करणीया। समत्वबुद्धा सह कर्मणः समाचरणकौशलं हि योगः इत्युच्यते-

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम्॥[3]

अस्मिन्नेवाऽध्याये समाधिस्थस्य स्थितप्रज्ञस्य स्वरूपं स्थितेश्च वर्णनं प्राप्यते।[4] योगी सततं परमशान्तिमिच्छति। स एव स्थितप्रज्ञो भूत्वा ब्रह्माधिगच्छति। बुद्धियोगेन संयुक्तः सन् योगी कर्मजं फलं त्यक्त्वा जन्मबन्धविनिर्मुक्तश्च भूत्वा अनामयं पदं गच्छति। योगः सत्त्व-रज-तमसां गुणत्रयानां निरोधेन सम्भवः तदर्थं भगवता श्रीकृष्णेन अर्जुनायः योगी भवितुमुपदिदेशः।

योगः पुरातनकालात् भारते एकं प्रचलितं मोक्षसाधनमार्गमासीत्। विदुषां नये योगः दुर्लभविषयः। अनेन योगः सर्वसाधारणधर्मो नासीदिति अनुमियते। गीतायाः तृतीये चतुर्थे च अध्यायद्वये कर्मणः स्वरूपं, कर्मणः बन्धननाशोपाय इत्यस्य विस्तृतं वर्णनं लभ्यते। अत्रैव भगवता श्रीकृष्णेन योगधर्मस्य 'रहस्यं ह्येतदुत्तमम्'[5] समाधिना एव कर्मबन्धनानि छिद्यन्ते, संशयस्य च नाशो जायते। आत्मवतः योगिनः कर्माणि न निबध्नान्ति' इत्युक्तम्।[6]

---

[2] श्रीमद्भगवद्गीता – २/४८

[3] श्रीमद्भगवद्गीता – २/५०

[4] श्रीमद्भगवद्गीता – २/५५

[5] श्रीमद्भगवद्गीता – ४/३

[6] श्रीमद्भगवद्गीता – ४/४१

cc BY

पञ्चमोऽध्याये सः विशुद्धात्मा, विजितात्मा जितेन्द्रियो योगी कर्माणि कुर्वन्नपि न कर्मफलैः बध्यते।[7] तेन सः सन्न्यासी भवति। श्रीमद्भागवद्गीतायाः पञ्चमोऽध्याये सन्न्यासस्य योगस्य च महिमानं दर्शयन् योगस्यैव उत्कृष्टता व्यासेन प्रतिपादिता। सन्न्यासी यदा कर्मबन्धनैः संयुक्तो भवति तदा स सन्न्यासस्य फलं न प्राप्तुं शक्नोति किन्तु कर्मबन्धनैर्विनिर्मुक्तः साधको योगी वा अचिरेण ब्रह्मतत्त्वमाप्नोति।[8]

बहुविधेषु योगेषु ध्यानयोगोऽन्यतमः। विषयोऽयम् व्यासेन श्रीमद्भगवद्गीतायाः षष्ठोऽध्याये प्रतिपादितम्। पण्डिताः मन्यन्ते यत् सः योगः कपिलो योगः अर्थात् सांख्ययोगरेव। अत्र ग्रन्थे अष्टयोगाङ्गानामभ्यासेन सह वीतरागीणां कृते योगस्योपायानामपि प्रतिपादनं जातम्।[9]

ध्यानयोगविधिना युक्ताहारविहार आत्मसंयम इत्येतेषां तत्त्वानां महत्त्वं प्रदर्शितम्।[10] ध्यानविषयमवलम्ब्य भगवता श्रीकृष्णेन निगदितं यत् यो योगी क्रियाकाले परमात्मानमेवं ध्यायति स्मरति वा स सर्वश्रेष्ठः श्रद्धावानस्ति।[11] अत्र योगस्योपायभूतौ अभ्यासवैराग्ययोश्च उपादेयता प्रतिपादिता। योगी आत्मानमात्मनि युञ्जानः विगतकल्मषः ब्रह्म संस्पर्शमक्षयसुखञ्चाश्नुते। दुःखसंयोगस्य वियोगोपायत्वेन योगस्य अपरिहार्यता उपादिष्टा। अनन्यचित्तेन निरन्तरं यो नित्यमिश्वरं ध्यायति स एव युक्तयोगी भूत्वा परमपदं लभते। सर्वभूते स्थितं परमात्मानं यो एकत्वेन भजते स योगी सर्वथा वर्तमानोऽपि परमात्मनि वर्तते। प्रयाणकाले योगविधिना भक्तिपूर्वकमविचलितमनसा प्राणान् भ्रूमध्ये स्थापयित्वा यः प्रयाति सः परमपुरुषः। अत्र स्पष्टरूपेण अर्जुनं निर्दिश्य भगवता श्रीकृष्णेन कथितं यत् यो योगी सर्वेषु जीवेषु आत्मनं जानाति आचरति च, सर्वान् आत्मवत् अवलोकयति, सुखे दुःखे च समानरूपेण पश्यति स योगी परमश्रेष्ठः इत्युच्यते-

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः॥[12]

इशोपनिषदि अपि

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥[13]

---

[7] श्रीमद्भगवद्गीता – ५/७

[8] श्रीमद्भगवद्गीता – ५/२४

[9] श्रीमद्भगवद्गीता – ६/१०,१५, १२/१३,१७, १६/१,३

[10] श्रीमद्भगवद्गीता – ६/१७

[11] श्रीमद्भगवद्गीता – ६/४७

[12] श्रीमद्भगवद्गीता – ६/३२

तस्मात् भगवान् कृष्णोऽर्जुनमादिदेशः यत् सदा योगमार्गस्य अवलम्बनं करणीयम्। यतो हि योगी ज्ञानिषु ज्ञानी, तपस्विषु तपस्वी भवति। तेनोक्तम्-

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥[14]

गीतानुसारं राजगुह्ययोगे ब्रह्मज्ञानसम्पन्नभूत्वा प्रभोः प्राप्त्यर्थं तत्परता वर्धते साधकस्य। अत्रैव भगवता श्रीकृष्णेन अर्जुनाय उपदिष्टं यत् 'मम मनोऽनुकूलं तव मनः भवेदिति'। कृष्णं विना अस्य मनसि अन्यथा भावना नागच्छतु कृष्णस्य अनन्यभक्तोऽस्ति तृतीयपाण्डवः। अतः कृष्णे निरन्तरं चित्तं सन्नद्धो भवतीति। श्रद्धया सह निरन्तरं कृष्णस्य पूजनं हि अर्जनस्य धर्मो भवतु। अनेन प्रकारेण यः वासुदेवसरणागतो भवति स स्वात्मानमेकीभावेन भगवति सन्निवेश्य त्वं परमात्मारूपिणं देवकीसूतं प्राप्नोति। अर्थात् तेन सहैकतां प्राप्यति।

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥[15]

द्वादशोऽध्यायः भक्तियोगविषयकः। भक्तियोगस्य संसिध्यर्थमिन्द्रियाणां वशीकरणं परमं प्रयोजनम्। परमात्मनि भक्तिं विना तेन सह एकात्मभावः नैव सम्भवः। अतः तं परमात्मनं प्राप्तुं भक्तेरनिवार्यता वर्तते। तस्मात् भगवता कृष्णेण मयेव मनः आधत्स्व, मयि बुद्धिं निवेशय इत्युक्त्वा भक्तियोगसिद्धान्तस्य पुष्टिं कृता[16]। अत्रैव भक्तानां निरहङ्कार-समसुखदुःख-क्षमी-दृढनिश्चय-अनपेक्ष-इत्यादीनां विशिष्टगुणानां वर्णनं परिदृश्यते[17]। साधकानां कृते तेषामुपादेयता अपरिहार्या अस्ति। यथार्थभक्तः साधकः वा निन्दया न क्रुध्यति, प्रशंसया च न प्रसीदति। स केवलं स्थिरभूत्वा विराजते। श्रीकृष्णस्य मते ये जना ईश्वरपरायणा अर्थात् तस्य उपासकाः भवन्ति ते एव ईश्वरस्य समधिकाः प्रियाः भवन्ति। अर्थात् ईश्वराय कृष्णाय रोचन्ते। यदुक्तं तेन-

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तो स्तेऽतीव मे प्रियाः॥[18]

---

[13] ईशोपनिषद्- ७

[14] श्रीमद्भगवद्गीता – ६/४६

[15] श्रीमद्भगवद्गीता – ९/३५

[16] श्रीमद्भगवद्गीता – १२/८

[17] श्रीमद्भगवद्गीता – १२/१३-२०

[18] श्रीमद्भगवद्गीता – १२/२०

CC BY

भक्तस्य प्रथमः कर्तव्यो भवति आत्मसंयमता, इन्द्रियानां वशीकरणम्, सांसारिकविषयवासनां परित्यज्य चञ्चलचित्तं निरुध्य भगवती मनोनिवेशं करोति समाधिस्थो भवति वा इति योगदर्शनस्य योऽभिप्रायाः सोऽत्र गीतायां पुष्टिर्भवति।

त्रयोदशोऽध्याये साङ्ख्ययोगस्य प्रकृतिपुरुषेति तत्त्वद्वयस्य विस्तृता चर्चा लभ्यते[19]। तपसाधनदृष्ट्या अध्यायोऽयं महती भूमिकामावहति। अध्यायेऽस्मिन् क्षेत्र-क्षेत्रज्ञस्य विभाजनं दृश्यते। क्षेत्र-क्षेत्रज्ञसंयोगेनैव सम्पूर्णस्थावरजङ्गमं तत्त्वं संजायते[20]। प्रकृतिरेव सर्वाणि कार्याणि करोति। सा कर्त्री। पुरुषस्तु अकर्ता। अतएव 'असङ्गोऽयं पुरुष' इति श्रुतिवचनम्। प्रकृतिः पुरुषश्च द्वावपि अनादी तत्त्वे स्तः। सत्त्वादयः गुणाः प्रकृतेः विकाराः सन्ति। परन्तु तद्विपरीतः निर्गुणत्वादनादित्वादव्ययत्वादयं परमात्मा पुरुषो वा शरीरस्थोऽपि न किञ्चित् करोति न च कर्मफलेन उपलिप्यते। यथा- आकाशः। शुन्यगुणकमाकाशं यथा सर्वगतमपि न केनापि तमुपलिप्यते तथैव अव्ययपुरुषः सर्वगतोऽपि न कोऽपि तां द्रष्टुं समर्थमस्ति।

साङ्ख्ययोगमतेन प्रकृतिपुरुषसंयोगेन इयं सृष्टिः प्रचलति। प्रकृतिरचेतनमपि पुरुषसंयोगेन चेतनवद् भूत्वा सर्वाणि कर्माणि सम्पादयति। अनयोः सम्बन्धः पङ्गन्धवत्। सूर्यवत् सर्वलोकानां प्रकाशकोऽयमात्मा चेतनपुरुषो वा जीवशरीरे क्षेत्रज्ञो भूत्वा कृत्स्नं प्रपञ्चं प्रकाशयति संचालयति च। तयोः दर्शनं सामान्ययोगेन नैव सम्भवः परन्तु ध्यानयोगेन ज्ञानचक्षुसा वा एतत् सम्भवम्। अतः ये साधकाः क्षेत्रक्षेत्रज्ञयोर्भेदं तथा विकारसहितस्य भूतप्रकृतेः मोचनस्योपायं दृष्टिगतं कुर्वन्ति, ते खलु महात्मनः परब्रह्मणि परमात्मनि प्रविशन्ति।[21] अयमेव योगिनां परमं लक्ष्यमिति।

सत्त्वरजस्तमांसि इति त्रीभिर्गुणैः अयं देहः निबन्धः।[22] तेषां प्रभावेन सामान्यमनुष्यः जीवः वा सुख-दुःखादीनां विषयानुभूतिं करोति। परन्तु योगी देहसमुद्भवान्गुणत्रयानतिक्रम्यः जन्ममृत्युजरादुःखेभ्यः आत्मानं विमुच्य अमृतत्त्वं लभते।[23] गुणातीतः योगी निःत्रैगुण्यं प्राप्य परं ब्रह्माभिगच्छतीति।[24]

---

[19] श्रीमद्भगवद्गीता – १२/१९-२३

[20] श्रीमद्भगवद्गीता – १२/२६

[21] श्रीमद्भगवद्गीता – १२/३४

[22] श्रीमद्भगवद्गीता – १४/५

[23] श्रीमद्भगवद्गीता – १४/२०

[24] श्रीमद्भगवद्गीता – १४/२६

महर्षिकृष्णद्वैपायणव्यासः गीतायाः चतुर्दशोऽध्याये गुणातीतस्य योगिनः लक्षणं निरूपितवान्।[25] वस्तुतया यो योगी सत्त्व-रज-तमसां स्वभावः साधनावलेन अनुभवति तस्य मुक्तिः सम्भय इति वक्तुं पारयामः।

एतेषां त्रयाणां गुणानामुच्छेदनार्थमेव बहुशास्त्रेषु विविधोपायानां प्रतिपादनमवलोक्यते। योगिनः शरीरस्थं सूक्ष्मतमं यथायथमनुशीलनं ज्ञानचक्षुषा कुर्वन्ति तेन परमात्मना सह तेषां साक्षात्कारो भवति इति। मूढास्तु न तथा कर्तुं पारयन्ति। अतः परब्रह्मणः दर्शनं तेषां पक्षे दुःसाध्यमेव। परन्तु योगसाधनेन यः पुरुषोत्तं जानाति सः बुद्धिमान् कृतकृत्यश्च भवति।[26]

गीतानुसारं दैवी–आसुरीभेदाभ्यां द्विधा सम्पद् वर्तते। तत्र दैवीसम्पद् विमोक्षाय कल्पते आसुरीसम्पच्च बन्धाय इति।[27] योगदर्शने चित्तस्य वृत्तयः पञ्चतय्यः भवन्ति क्लिष्टाऽक्लिष्टारूपा। क्लिष्टाऽक्लिष्टयोः क्लिष्टा वृत्तयः जीवमशुचौ नरके पातयन्ति। यथा आसुरी सम्पत्। अक्लिष्टा वृत्तयस्तु जीवं विवेकोन्मुखी कुर्वन्ति। यथा दैवी सम्पत्। गीता उपदिशदि यत् सात्त्विकराजसतामसभेदानां श्रद्धात्रयानां विवेचनेन साधकस्य परमुपादेयः कायिक-वाचिक-मानसिकमिति तपः त्रयस्य सिद्धिमाप्नोति।[28]

गीतायाः अन्तिमेऽध्याये योगीनां कृते पालनीयावश्यकतत्त्वानां सङ्केतो लभ्यते। तेषु पालनीयतत्त्वेषु एकान्तसेवनं, मिताहारः, वैराग्यः, अनहङ्कारः, कामक्रोधादीनां त्यागः प्रमुख्याः सन्ति। एतेषां सम्यक् परिपालनेन योगी शान्तो, निर्मलो भूत्वा ब्रह्मभूयाय कल्पते।[29] अतः गीतायां श्रीकृष्णः कर्मफलत्यागाय पौनःपुण्येन उपदिषति। अत्र त्रिविधं कर्माणां फलमिष्टमनिष्टं मिश्रितञ्च।[30] अयं भावः 'कर्मशुक्लः कृष्णं योगिनः त्रिविधमितरेषाम्' इति योगसूत्रे ध्वनितो भवति।

सर्वधर्माणां सर्वकार्याणां सर्वकामनानाञ्च त्यागेनैव परब्रह्मणः परमात्मनो वासुदेवस्य शरणग्रहणमपेक्षितम्। स्मरणागतसाधको अतःपरं मोक्षमपि न काम्यते। तस्य मोक्षाय रुचि न भवति वासुदेवेन सह एकात्मत्वात् सः केवलं वासुदेवरूपं परमात्मनमेव निजगतित्वेन स्वीकरोति। अर्जुनस्य तादृशी अवस्था संभूता। अतः स भगवन्तं विनिवेदयति यत् भो अच्युत! अधुना भवत्कृपया विगतमोहोऽहं संवृत्तः स्मृतिश्च मया लब्धा अतः निःसंशयमहं भवदाज्ञापालनाय तत्परोऽस्मि-

---

[25] श्रीमद्भगवद्गीता – १४/२२-२५

[26] श्रीमद्भगवद्गीता – १५/२०

[27] श्रीमद्भगवद्गीता – १६/५

[28] श्रीमद्भगवद्गीता – १७/२, १४-१६

[29] श्रीमद्भगवद्गीता – १८/५३

[30] श्रीमद्भगवद्गीता – १८/१२

CC BY

नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत।

स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव॥[31]

